अथ

कर्मविपाकसंहिता

अथ प्रथमोऽध्यायः।

मङ्गलाचरणम्

नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः।
नमस्ते रुद्ररूपाय नमस्ते विश्वरूपिणे॥ १॥
लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥ २॥
विघ्नेश्वराय वरदाय सुरप्रियाय
लम्बोदराय सकलाय जगद्धिताय।

नागाननाय श्रुतियज्ञविभूषिताय
गौरीसुताय गणनाथ नमो नमस्ते ॥ ३ ॥

अथ प्रश्नविधिः ।

रविवारे च संक्रान्तौ शुभयोगे यथाविधि ।
वैधृतौ च व्यतीपाते विप्राणां च गृहे तथा ॥ ४ ॥
देवतायतने चैव नद्यां वै सङ्गमोत्तमे ।
अथवा स्वगृहे चैव शुभे स्थाने विशेषतः ॥ ५ ॥
स्नानं समाचरेद्रोगी मृतपुत्रः सपुत्रकः ।
कर्मणा पीडितो योऽसौ नारी वा पुरुषोऽथवा ॥ ६ ॥
धात्रीफलानि लोध्रञ्च गोमयं तिलसर्षपान् ।
मृत्तिकाः[1] सप्त कर्पूरमुशीरं मुस्तसंयुतम् ॥ ७ ॥
औषधैः समभागैस्तु स्नानं कुर्यात्प्रयत्नतः ।
देवान्पितॄंश्च संतर्प्य दत्त्वा सूर्यार्घ्यमेव[2] च ।
एवं सर्वविधिं कृत्वा संकल्पं कारयेत्ततः ॥ ८ ॥

---

१. अश्वस्थानाद् गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् । राजद्वाराच्च गोष्ठाच्च मृदमानीय निक्षिपेत् ॥
२. एहि सूर्य सहस्रांशो तेजोराशे जगत्पते । अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ॥

अद्येत्यादिप्राचीनसंचितकर्मविलोकनार्थं मनः-कामनासिद्ध्यर्थं शिवपूजनपूर्वकं कर्मविपाकपुस्तक-पूजनमहं करिष्ये ॥

अङ्गन्यासपूर्वकं षोडशोपचारपूजासंकल्पःवैश्व-देवं श्राद्धं च। अत्रान्तरे देहशुद्ध्यर्थं पुरश्चरणाङ्ग-त्वेन गोमिथुनदानं कुम्भदानं च प्रजापतिसंतुष्ट्यै षोडशब्राह्मणान्भोजयेत् । भोजनानन्तरं प्रार्थना-ऽऽचार्यस्य ॥

ब्राह्मण त्वं महाभाग भूमिदेव द्विजोत्तम।
यथाविधं प्रतिज्ञाय प्राचीनं च शुभाशुभम् ॥ ९ ॥
कथं मे कथयस्वाशु कृपां कृत्वा ममोपरि।
एवं तु ब्राह्मणाचार्यं नमस्कृत्य प्रसादयेत् ॥ १० ॥
दश पञ्च तथा विप्रानुपवेश्य प्रयत्नतः।
तेषामनुज्ञया सर्वं प्रायश्चित्तमुपक्रमेत् ॥ ११ ॥

वस्त्रालङ्करणैराचार्यं पूजयित्वा प्रजापतिस्वरूपं गुरुं प्रार्थयेत्।

प्रजापते महाबाहो वेदवेदाङ्गपारग ।
पुत्रकामसमृद्ध्यर्थं पूजां गृह्णीष्व ते नमः ॥ १२ ॥
विष्णो त्वं पुण्डरीकाक्ष भुवनानां च पालकः ।
लक्ष्म्या सह हृषीकेश पूजां गृह्णीष्व ते नमः ॥१३॥
रुद्र त्वं दैन्यनाशाय सदा भस्माङ्गधारकः ।
नागहारोपवीती च पूजां गृह्णीष्व ते नमः ॥ १४ ॥
स्वर्गे सुराश्च गन्धर्वाः पाताले पन्नगादयः ।
मृत्युलोके मनुष्याश्च सर्वे ध्यायन्ति भास्करम्॥१५॥
महायज्ञादिकं चैव अग्निहोत्रादिकर्म च ।
तीर्थस्नानं तथा ध्यानं वर्तते भास्करोदयात् ॥१६॥
ब्रह्मा विष्णुः शिवः शक्तिर्देवदेवो मुनीश्वराः ।
ध्यायन्ति भास्करं देवं साक्षीभूतं जगत्त्रये ॥ १७ ॥
त्वं ब्रह्मा त्वं च वै विष्णुस्त्वं रुद्रस्त्वं प्रजापतिः ।
त्वमग्निस्त्वं वषट्कारस्त्वामाहुः सर्वसाक्षिणम् १८
योगिनां प्रथमो ध्येयो यतीनां ब्रह्मचारिणाम् ।
आधिव्याध्योश्च कर्त्ता त्वं सर्वपापक्षयं कुरु॥१९॥

दीनानां कृपणानाञ्च सर्वेषां व्याधिनाशनम् ।
एवं च भास्करं ध्यात्वा नमस्कृत्य प्रसादयेत् ॥२०॥

अथ पृच्छकप्रार्थना—

पापी चैव दुराचारी परनिन्दापरो जनः ।
ब्रह्महा हेमहारी च सुरापी गुरुतल्पगः ॥ २१ ॥
स्त्रीहन्ता बालघाती च अगम्यागमनं तथा ।
एवमादिकपापानि मया वै पूर्वजन्मनि ॥ २२ ॥
कृतानि विविधान्येव सर्वाणि मार्ष्टुमर्हसि ।
शरणं तव संप्राप्तस्त्वं मामुद्धर्तुमर्हसि ॥ २३ ॥
ममोपरि कृपां कृत्वा कर्म मे कथय प्रभो ।
लग्नं तात्कालिकं कृत्वा जन्मपत्रं निरीक्ष्य च ॥२४॥
लग्नं ग्रहविचारेण ज्ञातव्यं कर्म मामकम् ।
ग्रहलग्नविचारेण कर्म जानन्ति पण्डिताः ॥ २५ ॥

सूत उवाच

कैलासशिखरे रम्ये सुखासीनं महेश्वरम् ।
प्रणम्य पार्वती भक्त्या पप्रच्छ च सदाशिवम् ॥२६॥

पार्वत्युवाच

देवदेव जगन्नाथ भक्तानुग्रहकारक।
लोकोपकारकं प्रश्नं वद मे परमेश्वर ॥ २७॥
कलौ च मानवास्तुच्छाः पापमोहसमन्विताः।
महामोहग्रहग्रस्ताः पुत्रकन्याविवर्जिताः ॥ २८ ॥
कुत्सिता रूपविभ्रष्टा मृतवत्सा नपुंसकाः।
नारीणां पुरुषाणां च पूर्वकर्म च यत्प्रभो ॥ २९ ॥
तत्सर्वं वद मे स्वामिन् सर्वज्ञोऽसि मतो मम।
तच्च श्रुत्वा वचो देव्याः प्रीतिमान् स महेश्वरः॥३०॥
प्रहस्य जगतामीशो वल्लभां प्रीतिसंयुताम्।
उवाच प्रश्नं तद्गूढं त्रैलोक्ये चापि दुर्लभम् ॥ ३१॥

शिव उवाच

शृणु त्वं गिरिजे देवि नृणां कर्म विशेषतः।
कथयामि न सन्देहो यत्ते मनसि वर्तते ॥ ३२ ॥
मर्त्याः सर्वे जगज्जाताः कर्म कुर्वन्ति सर्वदा।
स्वकर्माणि ततो देवि भुज्यन्ते देवमानुषैः ॥ ३३ ॥

पुण्यापुण्ये हि पुरुषः पर्यायेण समश्नुते ।
भुञ्जतश्च क्षयं याति पापं पुण्यमथापि वा ॥ ३४ ॥
न तु भोगादृते पुण्यं किंचिद्वा कर्म मानवम् ।
पावकं वा पुनात्याशु क्षयो भोगात्प्रजायते ॥ ३५ ॥
परित्यजति भोगाच्च पुण्यापुण्ये निबोध मे ।
दुर्भिक्षादेव दुर्भिक्षं क्लेशात् क्लेशं भयाद्भयम् ॥ ३६ ॥
मृतेभ्यः प्रमृता यान्ति दरिद्राः पापकर्मिणः ।
गतिं नानाविधां यान्ति जन्तवः कर्मबन्धनात्॥३७॥
उत्सवादुत्सवं यान्ति स्वर्गात्स्वर्गं सुखात्सुखम् ।
श्रद्दधानाश्च शान्ताश्च धनदाः शुभकारिणः ॥ ३८॥
सुगन्धिमाल्यासद्वस्त्रसाधुपानासनाशनाः ।
स्तूयमानाः सदा यान्ति पुण्यैः पुण्याटवीष्वपि॥३९॥
अनेकशतसाहस्रजन्मसंचयसंचितम् ।
पुण्यापुण्यं नृणां तद्वत् सुखदुःखांकुरोद्भवम् ॥४०॥
मानवैस्तु विशेषेण सुखदुःखादिकं च यत् ।
कर्मत्रयं च सर्वेषां तन्मध्ये संचितं च यत् ॥ ४१ ॥

वक्तव्यं नात्र संदेहो यत्कृत्वा फलमाप्नुयात् ।
प्रारब्धं विस्तरं कर्म वर्तमानं च दृश्यते ॥ ४२ ॥
अश्विन्यादिकनक्षत्रे सर्वेषां जन्म जायते ।
तदापि पादभेदेन ज्ञातव्यं च शुभाशुभम् ॥ ४३ ॥

इति श्रीकर्मविपाकसंहितायां पूजनविधिर्नाम
प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः ।

अश्विन्याः प्रथमे पादे यदा जन्म प्रजायते ।
तदा ब्राह्मणवर्णोऽयं मध्यदेशसमुद्भवः ॥ १ ॥
द्वितीयचरणे देवि पुरा क्षत्री न चान्यथा ।
अयोध्यापुरतः पूर्वं पुत्रकन्याविवर्जितः ॥ २ ॥
तृतीयचरणे देवि वैश्यवर्णसमुद्भवः ।
रोगी कुत्सितवर्णोऽयं मृतवत्सो नपुंसकः ॥ ३ ॥
चतुर्थचरणे देवि यदा भवति मानवः ।
तदा शूद्रं विजानीयाद्रोगवान् मृतवत्सकः ।
श्यामलः पुष्टदेहश्च कुष्ठरोगेण पीडितः ॥ ४ ॥

शिव उवाच ।

अथ कर्म प्रवक्ष्यामि यत्कृतं ब्राह्मणादिभिः ।
एको ब्राह्मणवेदज्ञो गुणरूपसमन्वितः ॥ १ ॥
तस्य पत्नी विशालाक्षी पुंश्चली क्षत्रवंशजा ।
तस्यां पुत्रोऽभवद्देवि नाम्ना नरहरिस्तदा ॥ २ ॥
ब्रह्मकर्मपरिभ्रष्टो व्याधिभिः पीडितः सदा ।
तस्य मित्रो द्विजोऽप्येको धनपुत्रैश्च संयुतः ॥ ३ ॥
नामतो लग्नशर्मेति निकटे तस्य चागतः ।
आदरं बहुधा कृत्वा स्वर्णं दृष्ट्वा प्रहर्षितः ॥ ४ ॥
स्वर्णलोभेन तं विप्रं हतवान् पुत्रसंयुतम् ।
स्वर्णं सर्वं हृतं देवि व्ययं कृत्वा दिने दिने ॥ ५ ॥
षडंशैर्गुप्तदानं च गङ्गायमुनसङ्गमे ।
चकार तद्धनैर्भक्त्या विष्णुप्रीतिकरं तदा ॥ ६ ॥
एवं बहुगते काले पत्नी तस्य मृता पुरा ।
पश्चात्सोऽपि ग्रहग्रस्तो मृत्युं प्राप्नोति दुर्जनः ॥७॥
निक्षिप्तो नरके घोरे यमदूतैर्यमाज्ञया ।

युगसप्ततिपर्यन्तं भुक्त्वा नरकयातनाम् ॥ ८ ॥
नरकान्निःसृतो देवि शृगालो गहने वने ।
तत्स्थो निजफलं भुक्त्वा कृमियोनावभूत्पुनः ॥ ९ ॥
पुनर्मानुषयोनिः स तूर्णं च प्रथिते कुले ।
मध्यदेशे शुभे ग्रामे मृतवत्सो ह्यपुत्रकः ॥ १० ॥
रुग्णो बहुधनाढ्यश्च गौडो मांसप्रियः सदा ।
तस्य भार्या महालुब्धा पुरा लोकमती च या ॥ ११ ॥
पुनर्विवाहिता देवि पूर्वजन्मप्रसङ्गतः ।
मासि पुष्पं भवेत्तस्याः सन्तानं नैव वा भवेत् ॥ १२ ॥
सज्वरा दीर्घनेत्रा सा कुक्षिरोगेण पीडिता ।
इति श्रुत्वा वचस्तस्य महादेवप्रिया शिवा ॥ १३ ॥
प्रणम्य पार्वती देवी शङ्करं परमेश्वरम् ।
उवाच वचनं देवं चराचरगुरुं परम् ॥ १४ ॥
प्राणिनां केवलं कर्म तव मायाविचेष्टितम् ।
शुभमेवाशुभं चैव कथं जानामि पूर्वजम् ।
तत्सर्वं कृपया देव वद मे परमेश्वर ॥ १५ ॥

शिव उवाच ।

त्रिविधं प्राणिनां कर्म नृणां चैव स्वभावजम् ।
अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ॥ १६ ॥
अनिष्टं नागलोके च नरके विविधे तथा ।
इष्टं स्वर्गे फलं देवि मिश्रं मर्त्ये प्रजायते ॥ १७ ॥
रोगतश्चेष्टया देवि ज्ञेयं सर्वं शुभाशुभम् ।
राजरोगी भवेद्यस्तु ब्रह्महा पूर्वजन्मनि ॥ १८ ॥
पुत्रकन्याविहीनो यो गोत्रहा गुरुहा भवेत् ।
पाण्डुरोगी नरो यस्तु देवपूजनवर्जितः ॥ १९ ॥
कन्यापत्यं भवेद्यस्य वेदनिन्दा कृता तदा ।
कन्याघाती पक्षिघाती तस्य भार्या न जीवति ॥ २० ॥
भ्रातृहा यः पुरा देवि स ज्वरेण प्रपीडितः ।
घण्टावादित्रहारी च कररोगी नरो भवेत् ॥ २१ ॥
भगिनीनाशनं देवि कृतं यैः पूर्वजन्मनि ।
तेन पापेन भो देवि ते ज्वरेण प्रपीडिताः ॥ २२ ॥
मित्रद्रोही बालघाती पशुघाती तथैव च ।

तत्फलेन महादेवि मृतवत्सश्च रोगवान् ॥ २३ ॥
कायाघाती गर्भपाती धनपुस्तकहारकः ।
जन्मान्धो जायते देवि नात्र कार्या विचारणा ॥ २४ ॥
वस्त्रहा भूमिहारी च परनिन्दापरस्तथा ।
तेन पापेन भो देवि दरिद्रो जायते नरः ॥ २५ ॥
गोत्रदारापहारी च दीर्घरोगी भवेन्नरः ।
महिषीपुत्रघाती च कम्परोगी प्रजायते ॥ २६ ॥
निर्बीजं वृषभं यो वै प्रकरोति नराधमः ।
षण्ढस्संजायते देवि मूत्रकृच्छ्री भवेत्ततः ॥ २७ ॥
मातृहा पितृहा देवि महाकुष्ठी नरो भवेत् ।
अगम्यागमनं यस्तु वीरयोषागमं तथा ॥ २८ ॥
करोति योधमस्तस्य शरीरं ज्वरपीडितम् ।
गोवधी जायते देवि श्वेतकुष्ठी नरः सदा ॥ २९ ॥
कन्यकागमनं यस्तु करोति हठतः पुरा ।
तेन पापेन भो देवि रोगबान्धनवर्जितः ॥ ३० ॥
पुष्पगन्धापहारी च मुखे तस्य विगन्धता ।

घृतहारी भवेत्कुष्ठी तस्माद्भ्रष्टः कृमिर्भवेत् ॥३१॥
वृक्षगन्धापहारी च काकः संजायते नरः ।
वापीकूपापहारी च दद्रुरोगी भवेन्नरः ॥ ३२ ॥
देवयात्रापहारी च कण्ठरोगी भवेन्नरः ।
सारङ्गीतघाती च वने दावाग्निदाहकः ॥ ३३ ॥
अक्षिरोगी नासिकायां व्रणी कृमिसमाकुलः ।
तैलहारी भवेत्तैली गुडहारी ज्वरी सदा ॥ ३४ ॥
स्वर्णरौप्यापहारी च नरो भवति पुत्रहा ।
दासदासीहरो यस्तु नरो भवति कर्णरुक् ॥ ३५ ॥
लोहमूल्यापहारी च पाण्डुरोगी भवेन्नरः ।
दधिदुग्धहरो यस्तु कुक्षिरोगी भवेन्नरः ॥ ३६ ॥
मार्गग्राही वस्त्रहारी बाहुरोगी प्रजायते ।
मयूरकुक्कुटानां च कच्छपानां च बाधकः ॥ ३७ ॥
वातरोगी च खञ्जश्च जन्म जन्म नपुंसकः ।
मद्यपी मांसभोजी च मत्स्यभोजी तथैव च ॥ ३८ ॥
तेन पापप्रभावेण चर्मकारो हि जायते ।

अन्नहा जलहा चैव दन्तरोगी भवेन्नरः ॥ ३९ ॥
ब्राह्मणस्य गृहं यस्तु धनधान्यसमन्वितम् ।
हरणं तस्य वै कुर्यान्मृगीरोगी भवेन्नरः ४०
एवं बहुविधो रोगो नराणां चैव जायते ।
पूर्वकर्मफलं चैव भुज्यते खलु मानवैः ॥ ४१ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे
द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः ।

शिव उवाच ।

शृणु देवि प्रवक्ष्यामि यत्प्रश्नं भुवि जायते ।
प्रायश्चित्तं नराणां च मेषराशिक्रमादनु ॥ १ ॥
ब्राह्मणं स्वर्णलोभेन हत्वा चैव सपुत्रकम् ।
स्वर्णं भुक्तं सदारेण तत्पापात् पुत्रवर्जितः ॥ २ ॥
प्रायश्चित्तं जपं देवि गायत्री त्र्यम्बकं ततः ।
पञ्चलक्षप्रमाणेन ततः पापात् प्रमुच्यते ॥ ३ ॥
ब्राह्मणस्य सपुत्रस्य प्रतिमां कारयेद्बुधः ।

स्वर्णं दशपलस्यैव तां सम्पूज्य प्रयत्नतः ॥ ४ ॥
कुण्डं कृत्वा ततो देवि चतुरस्त्रं प्रसन्नधीः ।
प्रतिमां पूजयेच्चैव मन्त्रेणानेन भोः प्रिये ॥ ५ ॥

ॐ नमो गणाधिपतये गन्धपुष्पादिबलिं समर्पयामि नमः ॥ ॐ इन्द्राय नमः ॥ ॐ अग्नये नमः ॥ ॐ यमाय नमः ॥ ॐ निर्ऋतये नमः ॥ ॐ वरुणाय नमः ॥ ॐ कुबेराय नमः ॥ ॐ कालाय नमः ॥ ॐ शिवाय नमः ॥ ॐ ब्रह्मणे नमः ॥ ॐ अनन्ताय नमः ॥ ॐ गरुडवाहनाय नमः ॥ ॐ विष्णवे नमः ॥ ॐ जयाय नमः ॥ ॐ विजयाय नमः ॥ ॐ पुण्यशीलाय नमः ॥ ॐ सुशीलाय नमः ॥

ॐ सर्वे देवास्तथा दैत्या ब्रह्मविष्णुमहेश्वराः ।
मत्पापं यत्पुरा जातं तत्सर्वं क्षम्यतां सदा ॥ ६ ॥
इमां पूजां गृहाणैवं मम पुत्रं प्रयच्छतु ।
अज्ञानाद्वा प्रमादाद्वा यत्कृतं पूर्वजन्मनि ॥ ७ ॥
तत्सर्वं क्षम्यतां देव प्रयच्छ शरणं मम ।

ततो नवग्रहाः सर्वे दिक्पालाश्चाप्युपग्रहाः ॥ ८ ॥
सर्वे ममापराधान्वै क्षम्यतां पूर्वजन्मनः ।
एवं सर्वं यथान्यायं पूजां कृत्वा विचारतः ॥ ९ ॥
ततो होमं प्रकुर्वीत तिलधान्यादितन्दुलैः ।
दशांशं होमयेद्देवि तर्पणं मार्जनं तथा ॥ १० ॥
गोदानं च ततः कुर्याद्दशवर्णं विशेषतः ।
वृषमेकं प्रदातव्यं स्वर्णशृङ्गं सहाम्बरम् ॥ ११ ॥
ततो वै ब्राह्मणान्देवि भोजयेद्विधिपूर्वकम् ।
भोजनान्ते ततो दानं सुवर्णं दक्षिणां ततः ॥ १२ ॥
प्रतिमालंकृता देवि वाचकाय प्रदापयेत् ।
एवंकृते महादेवि वंशो भवति नान्यथा ॥ १३ ॥
एकादशीव्रतं चैव सप्तमीं रविसंयुताम् ।
यावत्स्वमरणं देवि कुर्यात्सत्ययुतो नरः ॥ १४ ॥
पूर्वपापविशुद्धिःस्याद् व्याधिरेवं विनश्यति ॥ १५ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे
प्रायश्चित्तकथनन्नाम तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः ।

शिव उवाच ।

अथ द्वितीये वक्ष्यामि प्रायश्चित्तं तथाम्बिके ।
अश्विन्यां जायते देवि पूर्वकर्मविपाकतः ॥ १ ॥
अयोध्यापुरतो देवि पूर्वे क्रोशचतुष्टये ।
सरय्वा निकटे चैव वर्णसंकरक्षत्रियः ॥ २ ॥
नामतः श्वेतवर्मेति पुत्रदारसमन्वितः ।
एकदा मातुलो देवि पुत्रेण सह संयुतः ॥ ३ ॥
आगतो निकटे देवि स्वर्णकोटिसमन्वितः ।
आदरं बहुधा कृत्वा गृहे वासं ददौ च सः ॥ ४ ॥
तस्य पत्नी गुणवती रूपयौवनसंयुता ।
मासमेकं तदा देवि प्रत्यहं भगिनीगृहे ॥ ५ ॥
भुज्यते सह पुत्रेण चामिषं विविधं तथा ।
मासान्ते चावधीद्रात्रौ मातुलं सह पुत्रकम् ॥ ६ ॥
भूमिमध्ये शवं ताभ्यां यत्नतः स्थापितं तदा ।
स्वर्णकोटिं प्रजग्राह पापात्मा गुरुघातकः ॥ ७ ॥

पत्न्या सह ततो द्रव्यव्ययं कुर्वन् दिने दिने ।
एवं बहुतिथे काले क्षत्री कालवशोऽभवत् ॥ ८ ॥
पश्चान्मृता ततः पत्नी निर्जने गहने वने ।
कर्दमे नरके घोरे यमदूतैर्यमाज्ञया ॥ ९ ॥
निक्षिप्य महतीं पीडां तयोर्दत्त्वा ततः प्रिये ।
युगमेकं वरारोहे भुक्त्वा नरकयातनाम् ॥ १० ॥
नरकान्निःसृतो देवि गर्दभत्वमजायत ।
पुनः सरटयोनिं तु भुक्त्वा मर्त्यस्ततोऽभवत् ॥ ११ ॥
हतोनेन पुरा देवि मातुलः पुत्रसंयुतः ।
तत्पापफलतो देवि वंशच्छेदश्च जायते ॥ १२ ॥
रोगयुक्ताऽभवद्देवि पत्नी वै पूर्वजन्मनि ।
ततो विवाहिता जाता पुनर्वै पूर्वकर्मतः ॥ १३ ॥
कासश्वाससमायुक्तो विषमज्वरपीडितः ।
प्रायश्चित्तं ततस्तस्य प्रवक्ष्यामि वरानने ॥ १४ ॥
प्रत्यहं ब्राह्मणे दानं भक्तिपूर्वं वरानने ।
दशधेनुं प्रयत्नेन हरिवंशश्रुतिं तथा ॥ १५ ॥

सुवर्णप्रतिमां कृत्वा पलं पञ्चदशस्य च ।
वर्तुलाकारकुण्डे वै होमं कृत्वा प्रसन्नधीः ॥ १६ ॥
गायत्रीलक्षजाप्यं च कारयेत्तु प्रयत्नतः ।
दशांशहोमः कर्तव्यो विप्राणां भोजनं तथा ॥१७॥
शय्यादानं विशेषेण प्रतिमां पूजयेत्ततः ।

अथ प्रतिमापूजनम् ।

षोडशाङ्गुलिका वेदी मृत्तिकासप्तसंयुता ।
चतुरस्रा विचित्रा च गन्धपुष्पसमान्विता ।
तत्रैव प्रतिमां कृत्वा स्थापितां पूजयेत्ततः ॥ १८ ॥

ॐ चक्रधराय नमः ॥ ॐ गदाधराय नमः ॥ ॐ शार्ङ्गिणे नमः॥ ॐ गरुडाय नमः॥ ॐ विष्णवे नमः॥ ॐ शिवाय नमः ॥ ॐ ब्रह्मणे नमः॥ ॐ प्रजापतये नमः ॥ ॐ सर्वेश्वराय नमः ॥ ॐ लक्ष्म्यै नमः ॥

ॐ देवदेव महादेव शङ्खचक्रगदाधर ।
मम पूर्वं कृतं पापं हर त्वं धरणीधर ॥ १९ ॥
एवं पूजां समाप्यैव प्रतिमां तां च दापयेत् ।

आचार्याय तदा देवि सुवर्णं दक्षिणां ततः ॥ २० ॥
ततः प्रदक्षिणां कृत्वा ब्राह्मणे व्यासरूपिणे ।
माघे मासि प्रयागे तु स्नानं पत्नीसमन्वितः ॥२१॥
एवं कृते न संदेहो वंशो भवति नान्यथा ।
मृतवत्सा लभेत्पुत्रं वन्ध्यात्वञ्च विनश्यति ॥२२॥
रोगी च मुच्यते रोगात् कन्यका नैव जायते॥२३॥

इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे
अश्विनीनक्षत्रद्वितीयचरणविचारणन्नाम
चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः ।

शिव उवाच ।

अथातः संप्रवक्ष्यामि नक्षत्रतुरगस्य तु ।
तृतीयस्य ततो देवि प्रायश्चित्तमतः शृणु ॥ १ ॥
अयोध्यापुरतो देवि दक्षिणे पूर्वदिग्गते ।
नारायणपुरे रम्ये राजपुत्रोऽभवत्तदा ॥ २ ॥
स्वकर्मनिरतो दान्तः प्रजापोषणतत्परः ।

नामतश्चोलसिंहेति तस्य पत्नी प्रभावती ॥ ३ ॥
तस्य मित्रं द्विजोप्येकः स्वकर्मपरिवर्जितः ।
एकदा मृगयां यातो राजपुत्रः सब्राह्मणः ॥ ४ ॥
मृगं हत्वा वरारोहे जग्मतुर्गहने वने ।
मांसस्य देवि भागार्थं कलहो हि महानभूत् ॥ ५ ॥
ततः स ब्राह्मणो दुष्टः क्रोधेनैवापि च द्विषन् ।
मरणं तस्य भो देवि बभूव गहने वने ॥ ६ ॥
ततश्चिन्तापरीतात्मा राजपुत्रो गृहं ययौ ।
गृहे च कारयामास तस्य कर्म यथाविधि ॥ ७ ॥
ततो बहुगते काले प्रयागे मकरे मुदा ।
शरीरं त्यक्तवान् देवि भार्यया सहितस्तदा ॥ ८ ॥
स्वर्गं भुक्त्वा युगान् सप्त ततः पुण्यक्षये सति ।
मर्त्यलोकेऽभवज्जन्म धनधान्यसमन्वितः ॥ ९ ॥
भार्यया सहितो देवि मध्यदेशे वरानने ।
पुत्रो न जायते देवि पूर्वकर्मविपाकतः ॥ १० ॥
ब्रह्महत्याफलेनैव मृतवत्सोपि वा भवेत् ।

तस्य शुद्धिं प्रवक्ष्यामि यतः पुत्रः प्रजायते ॥ ११॥
तदुद्देशेन कर्तव्यस्तडागो वापिका पथि ।
हरिवंशश्रवणं देवि विधिपूर्वमतः शिवे ॥ १२ ॥
दशवर्णाः प्रदातव्याः स्वर्णयुक्ताः सहाम्बराः ।
एवं कृते न सन्देहो वंशस्तस्य प्रजायते ॥ १३ ॥
सा स्त्री स्यात्सुखिनी देवि सत्यमेव न संशयः ।
काकवन्ध्यात्वमुक्ता स्यात् मृतवत्सा सुखावहा॥ १४॥
व्याधिनाशो भवेद्देवि नात्र कार्या विचारणा ॥१५॥

इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे
अश्विनीनक्षत्रतृतीयचरणविचारणं नाम
पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठोऽध्यायः ।

शिव उवाच ।

शृणु देवि वरारोहे नृणां कर्मविपाकजम् ।
तदहं संप्रवक्ष्यामि यथाकर्मानुसारतः ॥ १ ॥
पुत्रा बहुविधा देवि लौकिका वै विचक्षणाः ।

जायते नात्र संदेहस्तत्सर्वं शृणु वल्लभे ॥ २ ॥
प्रथमः पुण्यसंबन्धो मातृपितृप्रियः सदा ।
सुसेवानिरतो नित्यं पितुर्मातुश्च यत्नतः ॥ ३ ॥
आजन्ममरणाद्देवि पितुराज्ञां करोति च ।
मरणे पितृमात्रोश्च श्राद्धं कुर्याद्दिने दिने ॥ ४ ॥
पितृश्राद्धं विना देवि भोजनं न करोति हि ।
द्वितीयः शत्रुसंबन्धी तस्य चेष्टाञ्च मे शृणु ॥ ५ ॥
पूर्वजन्मप्रसङ्गेन शत्रुः पुत्रः प्रजायते ।
जन्मतः शत्रुरूपेण मातृपित्रोर्विरोधकृत् ॥ ६ ॥
तत्कर्म कुरुते येन तयोः क्लेशोभिजायते ।
तृतीयो ऋणसंबन्धान्मत्तः शृणु वरानने ॥ ७ ॥
ऋणं यस्य गृहीतन्तु न दत्तं हठतः प्रिये ।
तदा पुत्रत्वमाप्नोति द्रव्यदाता न संशयः ॥ ८ ॥
पितृद्रव्यं प्रयत्नेन गृह्णाति हठतः प्रिये ।
द्यूतवेश्याप्रदानेन व्ययं कुर्याद्दिने दिने ॥ ९ ॥
यदा द्रव्यविहीनश्च पिता भवति वै प्रिये ।

तदा मृत्युमवाप्नोति युवरूपो न संशयः ॥ १० ॥
चतुर्थो मित्ररूपेण पुत्रो जायेत पार्वति ।
स्थापितं द्रव्यमन्यस्य न दत्तं पूर्वजन्मनि ॥ ११ ॥
तत्संबन्धस्वरूपेण पुत्रो जातस्तदा शिवे ।
बहुप्रीतिं पितृभ्याञ्च पितृव्ये गोत्रजे तथा ॥ १२ ॥
बहूद्यमो गुणी भोक्ता पितुः शिक्षासु तत्परः ।
यत्करोति गृहे कर्म सुखदं जायते हि तत् ॥ १३ ॥
पूर्वरूपो यदा देवि पत्नी पुत्रसमन्वितः ।
ततः शरीरं वै त्यक्त्वा धनं गृह्य ततः प्रिये ॥ १४ ॥
अथ वक्ष्यामि ते देवि चतुर्थचरणं शिवे ।
नक्षत्रतुरगस्यैव प्राणिनां नियतं शृणु ॥ १५ ॥
कोशलापुरतो देवि सरय्वा उत्तरे तटे ।
तत्र क्षत्री वसत्येको नगरे नन्दने तदा ॥ १६ ॥
स च धर्मविहीनस्तु लक्ष्मणेति च नामतः ।
तस्य भार्या विशालाक्षी कल्याणीनाम सा प्रिये १७
कुलटा यौवनोन्मत्ता परपुंसि रता सदा ।

व्यापारं कारयामास वस्त्रहेमादिकस्य हि ॥ १८ ॥
उद्यमं बहुधा कृत्वा द्विजैः सह वरानने ।
एवं बहुतिथे काले विप्रद्रव्यं तु चोरितम् ॥ १९ ॥
ततः शोकेन विप्रस्तु शीघ्रं पञ्चत्वमागतः ।
ततो बहुतिथे काले राजपुत्रस्य पञ्चता ॥ २० ॥
गतः स नरकं घोरं निरुच्छ्वासं सुदारुणम् ।
षष्टिवर्षसहस्राणि भुक्त्वा नरकयातनाम् ॥ २१ ॥
नरकान्निःसृतो देवि वृषयोनिः पुराभवत् ।
ततो वै राजपुत्रस्तु मानुषत्वमुपागतः ॥ २२ ॥
पुरा तु यत्कृतं पापं तदिहैव प्रभुज्यते ।
मित्रस्य वंचनाद्देवि पुत्रस्यैव च पञ्चता ॥ २३ ॥
काकवन्ध्या भवेत्पत्नी दुःखशोकसमन्विता ।
तस्य पुण्यं प्रवक्ष्यामि पूर्वपापस्य निग्रहम् ॥ २४ ॥
गायत्रीलक्षजाप्येन सर्वं पापं प्रणश्यति ।
कूष्माण्डं नारिकेलं वा स्वर्णयुक्तं सहाम्बरम् ॥ २५ ॥
गंगामध्ये प्रदातव्यं संतानार्थं वरानने ।

वर्तुलाकारकुंडे च होमं यत्नेन कारयेत् ॥ २६ ॥
स्वर्णशृङ्गीं रौप्यखुरां पट्टवस्त्रसमन्विताम् ।
आचार्याय प्रदद्यात्तु सपात्रां विधिवत् प्रिये ॥२७॥
एवंकृते न संदेहो वन्ध्यात्वञ्च प्रणश्यति ।
पुत्रपौत्राश्च वर्द्धन्ते न संदेहो वरानने ॥ २८ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे
अश्विनीनक्षत्रस्य चतुर्थचरणो नाम
षष्ठोऽध्यायः ॥ ६ ॥

अथ सप्तमोऽध्यायः ।

पार्वत्युवाच ।

देवदेव महादेव सृष्टिस्थितिलयात्मक ।
स्त्रीणां च कर्म सम्ब्रूहि दयां कृत्वा ममोपरि ॥ १ ॥

ईश्वर उवाच ।

नारीणां शृणु मे सर्वं यत्कृतं पूर्वजन्मनि ।
ततोहं संप्रवक्ष्यामि समासेन वरानने ॥ २ ॥
पूर्वजन्मनि या नारी पतिनिन्दां चकार ह ।

तेन पापेन भो देवि न स्त्री पुष्पवती भवेत् ॥ ३ ॥
यदा रौप्यस्य वै वृक्षं स्वांगुष्ठपरिमाणकम् ।
पलपंचमिदं देवि दद्याद्वेदविदे प्रिये ॥ ४ ॥
तदा पुष्पं भवेद्देवि नात्र कार्या विचारणा ।
पतिं सुप्तं परित्यज्य परपुंसि रताभवत् ॥ ५ ॥
तेन पापेन भो देवि वन्ध्या नारी प्रजायते ।
सुवर्णस्य कृतं वृक्षं फलपुष्पसमान्वितम् ॥ ६ ॥
दद्याद्वेदविदे नारी पतिसेवासु तत्परा ।
ततः पुत्रं प्रसूयेत सुवर्णपलतो दश ॥ ७ ॥
परपुंसि रता नारी स्वपतिं मिष्टवादिनी ।
तेन पापेन भो देवि कन्यापत्यञ्च जायते ॥ ८ ॥
रौप्यस्यैव कृतं लिंगं पलपंचदशेन तु ।
पूजयित्वा प्रयत्नेन दद्याद्विप्राय श्रोत्रिणे ॥ ९ ॥
ततः कन्या तु न भवेच्छुभं पुत्रं प्रसूयते ।
सततं वै यदा नारी कुलटा धर्मचारिणी ॥ १० ॥
तेन कर्मविपाकेन नारी गर्भं विनश्यति ।

ततः प्रपूजयेद्देवं शंखचक्रगदाधरम् ॥ ११ ॥
प्रयागे मकरे स्नानं पतिना तु सहाचरेत् ।
स्वर्णशृङ्गं रौप्यखुरं मुक्तालांगूलग्रन्थितम् ॥ १२ ॥
दद्यात्सदक्षिणं देवि वृषभं विदुषे तथा ।
या पतिं दुर्बलं त्यक्त्वापरेण सह संगता ॥ १३ ॥
तेन पापेन भो देवि दरिद्रा पुत्रवर्जिता ।
ततः कुमारीं संपूज्य ब्रह्माविष्णुमहेश्वरान् ॥ १४ ॥
पूजयेदब्दमेकन्तु प्रत्यहं नियता प्रिये ।
वर्षे पूर्णे ततस्तस्यै वस्त्रं दत्त्वा विसर्जयेत् ॥ १५ ॥
व्रतं सूर्यस्य वै कुर्यात्प्रणम्य प्रतिवासरम् ।
तदा नारी पूर्वपापं दहत्येव न संशयः ॥ १६ ॥
मिष्टं भुंक्ते तु या नारी पत्युर्मिष्टं ददाति न ।
तेन पापेन सा नारी मुखे दौर्गन्ध्यधारिणी ॥ १७ ॥
गुडं वा मधु वा खण्डं विप्राय प्रयता सदा ।
प्रयच्छति यदा देवि मुखे शुद्धिश्च जायते ॥ १८ ॥
स्वपतिघ्नी च या नारी रण्डा भवति नान्यथा ।

तया नित्यं प्रपूज्या च तुलसी भक्तिभावतः ॥१९॥
ऊर्जे माघे च वैशाखे प्रातःस्नानं समाचरेत्।
एकादशीव्रतं नित्यं द्वादशाक्षरविद्यया ॥ २० ॥
जपं कृत्वा प्रयत्नेन पतिरूपाय विष्णवे।
समर्पणं ततः कुर्यात् शीघ्रं पापं प्रणश्यति ॥२१॥
यदा पापयुता नारी गर्भपातं च कारयेत्।
तेन दुश्चरितेनेह ज्वरकुक्षिप्रपीडनम् ॥ २२ ॥
योनिशूलं भवेद्देवि गुदरोगो भगंदरः।
तदा कुर्यात् प्रयत्नेन ब्राह्मणीं ब्राह्मणं तथा ॥२३॥
रौप्यस्य च महादेवि दशनिष्कस्य भक्तितः।
प्रत्यहं पूजयेद्देवि पत्युराज्ञां समाचरेत् ॥ २४ ॥
भोजयेद्विविधैश्चान्नैर्घृतखण्डसमन्वितैः।
गोदानं च ततः कुर्यात् भक्त्या विद्योपजीविने २५
यदा नारी च दुष्टात्मा स्वपतौ दुर्वचो वदेत्।
तदा कण्ठे भवेद्रोगो नासिकायां च पीनसम्॥२६॥

---

१ "ॐ नमो भगवते वासुदेवाय" यह द्वादशाक्षर मंत्र है।

वातगुल्मं वापि शिवे श्वेतपुष्पं प्रजायते ।
रौप्यपुष्पयुतं देवि सुवर्णेन समन्वितम् ॥ २७ ॥
दद्याद्विप्राय विदुषे तदा सप्तपलं शुभे ।
कन्यकां कलहा दुष्टा हन्ति नारी यदा हठात् २८॥
तदा कुष्ठं भवेद्देवि जन्मजन्मदरिद्रता ।
सूर्यस्य पूजनं कान्ते सदा नारी व्रतं चरेत् ॥ २९ ॥
मासेमासे शनौ वारे वृक्षे विष्णुस्वरूपिणी ।
विधिवत्पूजनं कुर्यात् पूर्वपापं विशुध्यति ॥ ३० ॥
श्वश्रूं च श्वशुरं चैव नित्यं क्रूरवचो वदेत् ।
तेन पापेन भो देवि श्वेतपुष्पं तनौ भवेत् ॥ ३१ ॥
सूर्यस्य प्रतिमां देवि सुवर्णात्त्रिपलस्य च ।
दद्याद्वेदविदे देवि सूर्यस्यैव व्रतं चरेत् ॥ ३२ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
स्त्रीकर्मकथनं नाम सप्तमोऽध्यायः ॥ ७ ॥

अथ अष्टमोऽध्यायः।

शिव उवाच।

भरण्याः प्रथमे पादे नीलकंठोभवद्द्विजः।
ब्रह्मकर्मपरिभ्रष्टः काकुत्स्थनगरे शुभे ॥ १ ॥
वैश्येन सह मित्रत्वं क्रय्यं कृत्वा दिने दिने।
ब्राह्मणी तत्र वृद्धासीत्पतिपुत्रविवर्जिता ॥ २ ॥
तस्या द्रव्यं गृहीतञ्च विक्रयार्थं द्विजेन तु।
ततो बहुदिनं यातं तस्या द्रव्यं न दत्तवान् ॥ ३ ॥
एवं बहुतिथे काले तस्य मृत्युरजायत।
ब्रह्मकर्मपरिभ्रंशान्नरके पतनं प्रिये ॥ ४ ॥
नरकान्निःसृतो देवि सर्पयोनिरजायत।
सर्पयोनिफलं भुक्त्वा गर्दभत्वमुपागतः ॥ ५ ॥
पुनः संप्राप्तवान् देवि मध्यदेशे च मानुषम्।
धनधान्यसमायुक्तः पुत्रकन्याविवर्जितः ॥ ६ ॥
ततो बहुतिथे काले तदा कन्याभवत्प्रिये।
स्वर्णपूर्वं हृतं देवि स्वर्णसम्बन्धजा सुता ॥ ७ ॥

ततः सा वर्द्धिता कन्या विवाहश्चाभवत्खलु ।
पितृमातृप्रिया नित्यं युवती तु यदाभवत् ॥ ८ ॥
यदा सा विधवा जाता मातापित्रोश्च दुःखदा ।
पुनः पुत्रविहीनत्वं प्रायश्चित्तमतः शृणु ॥ ९ ॥
सूर्यमन्त्रस्य जाप्येन लक्षमेकं वरानने ।
पार्थिवस्यार्चनं सम्यक् त्र्यम्बकेति ततो जपेत् १०
होमं च कारयेद्धीमान् शतब्राह्मणभोजनम् ।
पायसं शर्करायुक्तं कारयेद्विधिपूर्वकम् ॥ ११ ॥
ततः कूपतडागौ च वापिकाश्च महापथे ।
एवंकृते न संदेहो वंशलाभो वरानने ॥ १२ ॥
यदा न क्रियते देवि तदा वंशो न जायते ॥ १३ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
भरणीनक्षत्रस्य प्रथमचरणप्रायश्चित्त-
कथनं नामाष्टमोऽध्यायः ॥ ८ ॥

अथ नवमोऽध्यायः ।

शिव उवाच ।

अथ द्वितीये वक्ष्यामि भरण्याश्चरणे प्रिये ।
तस्य सर्वं प्रवक्ष्यामि यत्कृतं पूर्वजन्मनि ॥ १ ॥
अयोध्यापुरतो देवि क्रोशमात्रे प्रदक्षिणे ।
जानकीनगरे रम्ये द्विजश्चासीत्स तस्करः ॥ २ ॥
ब्रह्मकर्मपरिभ्रष्टो मद्यपानरतः सदा ।
स वेश्या निरतो नित्यं पत्नी तस्य पतिव्रता ॥ ३ ॥
पतिभक्तिरता नित्यं देवपूजासु तत्परा ।
एकदा ब्राह्मणोप्येकः क्षुधार्तो दुर्बलः प्रिये ॥ ४ ॥
अन्नं च याचयामास लम्पटं प्रति वत्सले ।
दुर्वचश्चावदद्देवि भिक्षुकं प्रति दुर्बलम् ॥ ५ ॥
आत्मघातः कृतस्तेन दुर्बलब्राह्मणेन च ।
ततो बहुतिथे काले मरणं तस्य चाभवत् ॥ ६ ॥
पातिव्रत्येन तत्पत्न्याः सत्यलोकं जगाम सः ।
बहुवर्षसहस्राणि स्वर्गे वासोऽभवत्प्रिये ॥ ७ ॥

ततः पुण्यक्षये जाते मर्त्यलोके स मानुषः ।
पूर्वपापफलाद्देवि पुत्रकन्याविवर्जितः ॥ ८ ॥
तदुद्देशेन मरणं ब्राह्मणस्याऽभवत् पुरा ।
मद्यपानं कृतं तेन ततः कुष्ठी प्रजायते ॥ ९ ॥
तस्य शान्तिं प्रवक्ष्यामि यतः पापात्प्रमुच्यते ।
गायत्रीमूलमंत्रेण लक्षजाप्यं प्रयत्नतः ॥ १० ॥
दशांशहोमः कर्तव्यो विप्राणां भोजनं शतम् ।
विधिवत्पूजयेद्देवि कपिलां स्वर्णभूषिताम् ॥ ११ ॥
दद्याद्विप्राय तां देवि विदुषे ज्ञानरूपिणे ।
अतः पुत्रः प्रजायेत रोगनाशो भवेदनु ॥ १२ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
भरणीनक्षत्रस्य द्वितीयचरणप्रायश्चित्त-
कथनं नाम नवमोऽध्यायः ॥ ९ ॥

अथ दशमोऽध्यायः ।

शिव उवाच ।

एको वणिग्जनो देवि काकुत्स्थनगरे शुभे ।
अग्निकोणे शिवपुरो योजनार्द्धप्रमाणके ॥ १ ॥
धनाढ्यो ह्यवसद्देवि वैश्यवृत्तिरतस्सदा ।
विक्रयं कुरुते देवि गुडमन्नं रसादिकम् ॥ २ ॥
एकस्मिन् समये देवि गुडमादाय चाध्वनि ।
वृषभं भारसंपन्नं करोति स वरानने ॥ ३ ॥
भारेण पीडितोऽनड्वान् स वै पथिगतः शिवे ।
न ज्ञातं तेन वै पापं वृषभार्तिसमुद्भवम् ॥ ४ ॥
एवं बहुतिथे काले बिल्वमङ्गलके पुरे ।
वैश्यस्य मरणं जातं सरय्वां सह भार्यया ॥ ५ ॥
स्वर्गलोके गतौ द्वौ च तौ तु क्षेत्रप्रभावतः ।
षष्टिवर्षसहस्राणि स्वर्गे भुक्तं शुभं फलम् ॥ ६ ॥
ततः पुण्यक्षये जाते मर्त्यलोके वरानने ।
अवन्तीनगरे जातौ धनधान्यसमन्वितौ ॥ ७ ॥

मध्यदेशे विशालाक्षि पूर्वकर्मफलेन हि ।
पुत्रो न जायते देवि गर्भपातस्तथा शिवे ॥ ८ ॥
कन्यका वै प्रजायेत वारंवारं वरानने ।
शरीरे च ज्वरोत्पत्तिर्मध्यमा च प्रजायते ॥ ९ ॥
प्रायश्चित्तं प्रवक्ष्यामि पूर्वपापविशुद्धये ।
सुवर्णस्य वृषं शुभ्रं पलपंचमितं तथा ॥ १० ॥
प्रतिमां कारयेद्देवि वृषमेकं विभूषितम् ।
प्रपूज्य शिवमंत्रेण वैदिकेन यथाविधि ॥ ११ ॥
प्रदद्याद्विदुषे तस्मै ज्ञानिने शुद्धबुद्धये ।
नमः शिवाय मन्त्रेण लक्षजाप्यं प्रयत्नतः ॥ १२ ॥
रोगतो मुच्यते देवि नात्र कार्या विचारणा ॥ १३ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
भरणीनक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं
नाम दशमोऽध्यायः ॥ १० ॥

अथ एकादशोऽध्यायः ।

शिव उवाच ।

शृणु देवि वरारोहे नृणां कर्मविपाकजम् ।
प्रवक्ष्यामि न संदेहो यदि ते श्रवणे मतिः ॥ १ ॥
उत्तरे चाप्ययोध्यायास्ततः क्रोशत्रयोपरि ।
तत्र तस्थौ च भो देवि लोकशर्मेति नामतः ॥ २ ॥
तस्य पत्नी शुभाङ्गी वै लीलानाम्नीति विश्रुता ।
ब्राह्मणः कर्मविभ्रष्टो व्याधरूपो वरानने ॥ ३ ॥
मृगान् सबालकान् हत्वा पक्षिणो विविधानपि ।
बुभुजे पत्नीयुक्तस्तु तुतोष बहुधा तदा ॥ ४ ॥
तस्य पत्नी महादुष्टा मुखरा चञ्चला तथा ।
परपुंसि रता नित्यं धर्मकर्मविवर्जिता ॥ ५ ॥
एवं सर्वं वयो जातं वृद्धे सति वरानने ।
मरणं तस्य वै देवि स्वपुरे सर्पतस्तथा ॥ ६ ॥
पत्नी चैव तदा तस्य दुष्टा वै व्यभिचारिणी ।
उभौ च नरके यातौ स्वकर्मवशतः प्रिये ॥ ७ ॥

कुम्भीपाके महाघोरे नाना नरकयातनाम् ।
भुक्त्वा बहुसहस्राणि पुनर्जातश्च सूकरः ॥ ८ ॥
योनिं च सूकरीं भुक्त्वा विडालत्वं पुनः प्रिये ।
ततो विडालयोनिं च भुक्त्वा गृध्रस्ततोभवत् ॥९॥
पुनः कर्मवशाद्देवि मानुषत्वं ततोभवत् ।
इहलोके वरारोहे पूर्वकर्मप्रभावतः ॥ १० ॥
मृतवत्सा भवेन्नारी पुत्रश्चैव न जीवति ।
बहुरोगो भवेद्देवि ज्वरेणैव प्रपीडितः ॥ ११ ॥
पूर्वजन्मकृतं पापमिह जन्मनि भुज्यते ।
इहलोके कृतं कर्म जन्मजन्मनि भुज्यते ॥ १२ ॥
अथ शान्तिं प्रवक्ष्यामि शृणु त्वं गिरिजे मम ।
वंशगोपालमन्त्रेण लक्षजाप्यं वरानने ॥ १३ ॥
दशांशहोमः कर्तव्यो विप्राणां भोजनं शतम् ।
मन्त्रं च सम्प्रवक्ष्यामि येन पुत्रमवाप्स्यसि ॥१४॥
मन्त्रः । ॐ देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः १५

ततो वै सम्मृगान् कृत्वा मृगबालान् सपक्षिणः ।
स्वर्णपञ्चपलेनैव मृगान् कृत्वा सबालकान् ॥१६॥
रौप्यस्यैव वरारोहे पक्षिणः पञ्च कारयेत् ।
पूजनं विधिवत् कृत्वा सम्प्रार्थ्य परमेश्वरम् ॥१७॥
स्रष्टा त्वं सर्वलोकानां सर्वकामप्रदः सताम् ।
देवदेव जगन्नाथ शरणागतवत्सल ॥ १८ ॥
त्राहि मां कृपया देव पूर्वकर्मविपाकतः ।
एवं संपूज्य देवेशं ततो विप्रं प्रपूजयेत् ॥ १९ ॥
सुवर्णेन वरारोहे अश्वादिवाहनेन वै ।
प्रतिमामर्प्पयेद्देवि विप्राय ज्ञानरूपिणे ॥ २० ॥
वापिका कूपखातं च पथि मध्ये वरानने ।
प्रकरोति यदा देवी तदा पुत्रः प्रजायते ।
रोगात्प्रमुच्यते देवि जीवेत् पुत्रो न संशयः ॥२१॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
भरण्याश्चतुर्थचरणप्रायश्चित्तकथनं
नामैकादशोऽध्यायः ॥ ११ ॥

अथ द्वादशोऽध्यायः ।

शिव उवाच ।

कृत्तिकायां वरारोहे प्रथमे चरणे तथा ।
यो जायेत नरो देवि तस्य वक्ष्ये शुभाशुभम् ॥१॥
ईशानेऽपि महादेवि कोशलापुरतोऽनघे ।
राजपुत्रोवसत्कश्चिन्नगरे गूढसंज्ञके ॥ २ ॥
नामतश्चाहिशर्म्मेति तस्य पत्नी कला शुभा ।
धनधान्यसमायुक्तो रूपवान् मन्मथो यथा ॥ ३ ॥
याति चाखेटकं नित्यं मृगीं हत्वा च गर्भिणीम् ।
प्रत्यहं मृगमांसेन पोषयेत्स्वतनुं तथा ॥ ४ ॥
शरीरे वृद्धता जाता दया तस्य न चाभवत् ।
ततो वै मरणाद्देवि सती भार्या ततोभवत् ॥ ५ ॥
सत्यलोकं गतस्तेन भार्यायाः सुकृतेन तु ।
भुक्तं कल्पमितं पुण्यं सत्यलोके वरानने ॥ ६ ॥
पुनः पुण्यक्षये जाते मानुषत्वमुपागतः ।
पत्न्या सह ततो देवि कुले महति पूजिते ॥ ७ ॥

पूर्वजन्मविपाकेन मृतवत्सत्वमाप्नुयात् ।
मृगीं सगर्भां हतवान् पूर्वजन्मनि सुव्रते ॥ ८ ॥
तेन कर्मविपाकेन मर्त्यलोके ह्यपुत्रकः ।
तस्य शान्तिं प्रवक्ष्यामि यतः पुत्रः प्रजायते ॥९॥
गायत्रीजातवेदाभ्यां लक्षमेकं जपं तथा ।
दशांशहोमः कर्त्तव्यो विप्राणां भोजनं ततः ॥१०॥
सौवर्णेन मृगीं कृत्वा मृगबालं तथैव च ।
पूजयित्वा विधानेन कपिलां च ततः प्रिये ॥ ११ ॥
प्रदद्याद्वेदविदुषे ब्राह्मणाय सुतेजसे ।
हरिवंशस्य श्रवणं चण्डीपाठं शिवार्चनम् ॥ १२ ॥
एवं कृत्वा विधानेन शीघ्रं पुत्रः प्रजायते ।
कन्यका न भवेत्तस्य गर्भपातो न जायते ॥ १३ ॥
रोगात्प्रमुच्यते रोगी सर्वकामः प्रजायते ॥ १४ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
कृत्तिकानक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं
नाम द्वादशोऽध्यायः ॥ १२ ॥

अथ त्रयोदशोऽध्यायः।

शिव उवाच।

नराणां पुण्यशीलानामिह जन्मसमुद्भवम्।
सुखं वक्ष्याम्यहं देवि पूर्वकर्मफलं यतः॥ १॥
येन दत्तं पुरा दानं गोसुवर्णगजादिकम्।
तत्फलेन महादेवि इह तस्मात् सुखं भवेत्॥ २॥
शरीरे जन्मतः कान्तिर्लक्ष्मीवान् गुणवानपि।
सौख्यं प्रभुज्यते नित्यं पुत्रतो धनतस्तथा॥ ३॥
न रोगो जायते देवि दुःखं नैव कदाचन।
इहलोके सुखं भुक्त्वा कीर्तिमान् सुखमेधते॥ ४॥
अथ वक्ष्याम्यहं देवि नक्षत्रे कृत्तिकाह्वये।
द्वितीयचरणे देवि पूर्वं यत् फलमुच्यते॥ ५॥
कान्यकुब्जो द्विजः कश्चिदिन्द्रशर्मेति नामतः।
पत्नी रुद्रमती देवि कुशीला कलहप्रिया॥ ६॥
वेदपाठरतो नित्यं षडङ्गस्य च पाठकः।
एकदा तत्र वै देशे कश्चित् क्षत्री नराधिपः॥ ७॥

मरणे तस्य वै याते तद्विप्रस्य निमन्त्रणम् ।
भुक्तं तेन तदा देवि क्षत्रियस्य क्रियासु च ॥ ८ ॥
गृहीतं तस्य वै दानं शय्यां चैव गजादिकम् ।
सर्वं गृह्य गृहं गत्वा भुक्तं बहुदिनं प्रिये ॥ ९ ॥
ततो बहुगते काले तस्य विप्रस्य पञ्चता ।
स यातो यमलोके वै नरके च सुदारुणे ॥ १० ॥
भुक्तं स्वकर्मजं दुःखं युगमेकं वरानने ।
गजव्याघ्रकृमेर्योनिं ततो भुंक्ते पृथक् पृथक् ॥ ११ ॥
मनुष्यत्वं ततः प्राप्तः पूर्वकर्मविपाकतः ।
पुत्रो न जायते देवि कन्यका विविधास्तथा ॥ १२ ॥
मृतवत्सा भवन्नारी रोगाश्च विविधाः प्रिये ।
शान्तिं तस्य प्रवक्ष्यामि यतः पुत्रमवाप्स्यते १३
गायत्रीलक्षजाप्येन त्र्यम्बकेण तथा प्रिये ।
होमं च कारयामास षडंशं दानमेव च ॥ १४ ॥
दशवर्णाश्च गां दद्याद्विधिवद् ब्राह्मणाय वै ।
भोजयेच्छतसंख्यं च ब्राह्मणं वेदपारगम् ॥ १५ ॥

एवंकृतेन भो देवि पुत्रश्चैव प्रजायते।
रोगाणां च निवृत्तिः स्यात् पूर्वपापक्षयो भवेत् १६

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे कृत्तिकानक्षत्रस्य द्वितीयचरणप्रायश्चित्त-कथनं नाम त्रयोदशोऽध्यायः ॥१३॥

अथ चतुर्दशोऽध्यायः।

शिव उवाच।

तृतीयं तस्य वै देवि चरणं वदतः शृणु।
कान्यकुब्जकुले कश्चिन्नगरे सूर्यसंज्ञके ॥ १ ॥
उद्योतशर्मा विख्यातस्तस्य स्त्री गिरिजाभवत्।
वेदपाठरतो नित्यं दारिद्र्येणैव पीडितः ॥ २ ॥
कर्कशा भामिनी तस्य निष्ठुरं वदती स्मृता।
एकदा सूर्यग्रहणे तैलकारस्तदागतः ॥ ३ ॥
गङ्गामध्ये ततो दानं तस्मै विप्राय वै शिवे।
प्रददौ लक्षसंख्यां वै स्वर्णमुद्रां तु दक्षिणाम् ॥४॥
प्रतिगृह्य ततो दानं गृहं गत्वा द्विजस्तदा।

व्ययं करोति स्म तदा भार्यापुत्रेण चैव हि ॥ ५ ॥
वेदपाठं ततस्त्यक्त्वा प्रत्यहं ससुखं प्रिये ।
मरणं वृद्धसमये गृहे शय्योपरिस्थिते ॥ ६ ॥
स्वर्णमध्ये च दानं वै न दत्तं गिरिनन्दिनि ।
स गतो नरके घोरे यमराजेन प्रेरितः ॥ ७ ॥
भुंक्ते नरकजं दुःखं स्त्रीपुत्रेण च संयुतः ।
युगमेकं वरारोहे! प्रेतत्वं काकतां गतः ॥ ८ ॥
ततः शृगालयोनिं च मानुषत्वं ततो गतः ।
पूर्वजन्मकृतं कर्म इहलोके प्रभुज्यते ॥ ९ ॥
पाठयामास वै वेदान् ब्राह्मणेभ्यो वरानने ।
तत्संचितफलाद्देवि महदैश्वर्यमाप्नुयात् ॥ १० ॥
भार्या मृता ततः पुत्रो द्वितीया च विवाहिता ।
शरीरे बहवो रोगाः सुखं तस्य न जायते ॥ ११ ॥
वृद्धे सति वरारोहे पुत्रः शत्रुर्भवेदिति ।
मृतवत्सा भवेन्नारी पूर्वजन्मविपाकतः ॥ १२ ॥
तस्य पुण्यमहं वक्ष्ये ततो रोगो निवर्तते ।

पुनः पुत्रो भवेद्देवि कन्यका नैव जायते ॥ १३ ॥
जातवेदादिमंत्रेण जपं वै कारयेद्बुधः ।
लक्षत्रयं प्रयत्नेन ततो होमं तिलादिभिः ॥ १४ ॥
चतुरस्रे शुभे कुंडे हरिवंशश्रवणं ततः ।
भूदानं विधिवत्कुर्याच्छय्यां पात्राय दापयेत् ॥ १५ ॥
एवं कृते न संदेहो रोगनाशो भविष्यति ।
पुत्रश्च जायते देवि नात्र कार्या विचारणा ॥ १६ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
कृत्तिकानक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं
नाम चतुर्दशोऽध्यायः ॥ १४ ॥

अथ पञ्चदशोऽध्यायः ।

शिव उवाच ।

कान्यकुब्जो द्विजः कश्चिन्नर्मदादक्षिणे तटे ।
माहिष्मत्यां वसत्येको द्विजः परमवैष्णवः ॥ १ ॥
नामतो योधशर्मेति तस्य भार्या तु दानवी ।
प्रत्यहं वैश्यवृत्तिस्तु विक्रयं चाकरोत्सदा ॥ २ ॥

तत्र वैश्य उवासैको धनधान्यसमन्वितः ।
वैश्यतस्तेन विप्रेण स्वर्णं नीतमृणं बहु ॥३॥
ततो बहुतिथे काले स विप्रो मृत्युमागतः ।
ऋणं तस्मै न दत्तं वै वैश्याय तु स्वकर्मणे ॥ ४ ॥
मरणे सति विप्रस्तु रौरवं नरकं गतः ।
वैश्यकर्म कृतं तेन स्वकर्म परिमुच्यते ॥ ५ ॥
विंशद्वर्षसहस्राणि यमलोके वसत्यसौ ।
नरकान्निःसृतो देवि यातो वृषभशूकरौ ॥ ६ ॥
योनिद्वयफलं भुक्त्वा मनुष्यत्वमवाप्नुयात् ।
धनधान्यसमायुक्तस्तत्पुण्यस्य प्रभावतः ॥ ७ ॥
ऋणसंबन्धतो देवि वैश्यः पुत्रत्वमागतः ।
प्रत्यहं तस्य वै द्रव्यं व्ययं कुर्याद्दिने दिने॥ ८ ॥
मद्यवेश्याप्रदानेन धनं सर्वं व्ययं कृतम् ।
यदा पुत्रः समुत्पन्नो युवा तस्य भवेत्प्रिये ॥ ९ ॥
तदा मृत्युमवाप्नोति शोकं दत्त्वा तयोस्तदा ।
पुनः पुत्रो न जातो वै पूर्वजन्मविपाकतः ॥ १० ॥

प्रायश्चित्तं प्रवक्ष्यामि पूर्वपापविशुद्धये।
गायत्रीलक्षजाप्येन तदर्थं वाटिका पथि ॥ ११ ॥
कूपं प्रयत्नतः कुर्यात्तडागं विधिपूर्वकम्।
होमं वै कारयेच्चैव विधिपूर्वं वरानने ॥ १२ ॥
पलपञ्चसुवर्णस्य दानं दद्याद्विशेषतः।
दशवर्णाः प्रदातव्याः स्वर्णयुक्ताः सहाम्बराः १३॥
भोजयेच्छतविप्रांस्तु यथाशक्ति सदक्षिणान्।
एवंकृते न संदेहो रोगनाशो भवेदनु ॥ १४ ॥
पुत्राः पौत्रा विवर्द्धन्ते मम वाक्यं न चाऽन्यथा १५॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे कृत्तिकानक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं नाम पञ्चदशोऽध्यायः ॥ १५ ॥

अथ षोडशोऽध्यायः।

शिव उवाच।

अथातः संप्रवक्ष्यामि ब्रह्मनक्षत्रजं फलम्।
रोहिण्याः प्रथमे पादे यस्य जन्म च जायते ॥ १ ॥

तस्य कर्म पुरा देवि संचितं संब्रवीम्यहम् ।
अन्तर्वेद्यां द्विजः कश्चिद्घोपनामावसत्प्रिये ॥ २ ॥
ब्रह्मकर्मविहीनश्च चौरकर्मरतस्सदा ।
सार्द्धं चौरेण भो देवि बहुद्रव्यमुपार्जितम् ॥ ३ ॥
परस्त्रीलम्पटो देवि स्वां भार्यां परिमुच्य च ।
एवं बहुगते काले कालवश्यस्ततोभवत् ॥ ४ ॥
यमः कर्मप्रभावेण नरके नामकर्दमे ।
वासयामास भो देवि षष्टिवर्षसहस्रकम् ॥ ५ ॥
नरकान्निःसृतो देवि कुक्कुटत्वं प्रजायते ।
ततो यातो महादेवि नरयोनिं च दुर्लभाम् ॥ ६ ॥
पाण्डुरोगेण संयुक्तः पुत्रो नैव प्रजायते ।
वेश्याः कन्याः प्रजायन्ते पुत्रस्य मरणं भवेत् ॥७॥
तस्योपदानं वक्ष्यामि तत्सर्वं शृणु हे प्रिये ।
ॐ नमः शिवाय मन्त्रेण लक्षजाप्यं च कारयेत्॥८॥
पार्थिवं तिलपिष्टेन गोमयेन तथा प्रिये ।
पूजयामास विधिवद्भक्तियुक्तेन चेतसा ॥ ६ ॥

होमं वै कारयेद्देवि षडंशं दक्षिणां ततः ।
आचार्याय सुवर्णं च पूर्वपापविशुद्धये ॥ १० ॥
कूपखातं ततो देवि वाटिकां चैव कारयेत् ।
एवं कृते न संदेहो रोगनाशो भवेदनु ॥ ११ ॥
कन्यका न भवेद्देवि पुत्रश्चैव प्रजायते ।
मृतवत्सा लभेत्पुत्रं चिरंजीविनमुत्तमम् ॥ १२ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे रोहिणीनक्षत्रस्य प्रथमचरणप्रायश्चित्त-कथनं नाम षोडशोऽध्यायः ॥१६॥

अथ सप्तदशोऽध्यायः ।

शिव उवाच ।

द्वितीयचरणं देवि रोहिण्याः शृणु विस्तरम् ।
गङ्गाया उत्तरे कूले पुरं वैमानिकं शुभम् ॥ १ ॥
वासुदेवश्च नाम्ना हि ब्राह्मणो वेदपारगः ।
लीलावती पवित्रा च तस्य पत्नी शुभा तथा ॥ २ ॥
युवती रूपसम्पन्ना स्वैरिणी च सदा प्रिये ।

बहुद्रव्यं तया लब्धं परपुंसः प्रसङ्गतः ॥ ३ ॥
पापादुपार्जितं द्रव्यं भुज्यते पतिना सह ।
गङ्गायां मरणं तस्य विप्रस्य भार्यया सह ॥ ४ ॥
स्वर्गवासो हि दम्पत्योः षष्टिवर्षसहस्रकम् ।
ततः पुण्यक्षये जाते मर्त्यलोके वरानने ॥ ५ ॥
धनधान्यसमायुक्तो धर्मे मतिरथाधिका ।
पुत्राश्च बहवस्तेषां मरणं चैव जायते ॥ ६ ॥
कन्यका विविधास्तासां मृत्युश्चैव प्रजायते ।
पुनश्च तस्य हानिश्च बहुरोगः प्रजायते ॥ ७ ॥
तस्य शान्तिं प्रवक्ष्यामि यत्कृतं पूर्वजन्मनि ।
त्र्यम्बकेति च मन्त्रेण लक्षजाप्यं च कारयेत् ॥ ८ ॥
देवस्य प्रतिमां कृत्वा पूजयेच्चैव शास्त्रतः ।
सुवर्णस्य शिवं कुर्यात् पलपञ्चप्रमाणकम् ॥ ९ ॥
धूपैर्दीपैश्च नैवेद्यैर्मन्त्रेणानेन पूजयेत् ।

ॐ ह्रौं ह्रीं जूँ सः हराय नमः । इति प्रतिमा-
स्थापनम् । रौप्यपात्रे । ॐ ह्रौं ह्रीं जूं सः महेश्वराय

नमः इति धूपम्। ॐ ह्रौं ह्रीं जूँ सः पिनाकधृजे नमः इति स्पृश्यावाहनम्।

आवाहये महादेव देवदेव सनातन।
इमां पूजां गृहाण त्वं मम पापं व्यपोहतु॥

ॐ ह्रौं ह्रीं जूँ सः यँ रँ लँ वँ शँ षँ सँ हँ क्षँ सोहं शङ्करस्य सर्वेन्द्रियवाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राण इहागत्य इह जीवस्थितिं सुखं चिरं तिष्ठन्तु। इति प्राणप्रतिष्ठां विधाय, शिवं ध्यायन् पूजयेत्। ॐ ह्रौं ह्रीं जूँ सः पशुपतये नमः इति पञ्चामृतेन स्नानम्। ॐ ह्रौं ह्रीं जूँ सः शिवाय नमः इति चन्दनादिभिः पूजनम्। ॐ ह्रौं ह्रीं जूँ सः महादेवाय नमः इति विसर्जनम्।

गोदानं च ततः कुर्यात् कृष्णां च कपिलां ततः।
विप्राय वेदविदुषे सुवर्णं दक्षिणां ततः॥ १०॥
प्रदक्षिणां ततः कुर्याद्विप्रस्येशानरूपिणः।
शतसंख्यद्विजांश्चैव भोजयित्वा विसर्जयेत्॥ ११॥

प्रयागे मकरे माघे पत्न्या सह वरानने।
स्नानं कुर्याच्च भो देवि व्रतमेकादशीं चरेत् ॥ १२ ॥
एवंकृते न संदेहो रोगनाशश्च जायते।
पुत्रं चापि लभेद्देवि चिरजीविनमुत्तमम् ॥ १३ ॥
यद्येवं च प्रकुरुते सप्तजन्मसपुत्रकः ॥ १४ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे रोहिणीनक्षत्रस्य द्वितीयचरणप्रायश्चित्त-कथनं नाम सप्तदशोऽध्यायः ॥ १७ ॥

अथाष्टादशोऽध्यायः।

शिव उवाच।

गोमत्या उत्तरे कूले क्रोशद्वयप्रमाणतः।
विष्णुदासेति विख्यातो देवीपुत्रो वरानने ॥ १ ॥
शङ्करे वै पुरे रम्ये तस्य भार्या च सुन्दरी।
कर्कशा कुलटा सा वै पतिविद्वेषकारिणी ॥ २ ॥
शुश्रूषां कुरुते नैव श्वश्रूणां च वरानने।
स्वधर्मनिरतो नित्यं शिवभक्तिपरायणः ॥ ३ ॥

कृषिं वै सोकरोच्चैव विप्राणां चैव सेवकः ।
पित्रोश्च परमो दासः सदा च प्रियभाषणः ॥ ४ ॥
एतस्मिन्नगरे देवि व्रती कश्चित्समागतः ।
भिक्षार्थमागतो द्वारे तया भिक्षा ददे न च ॥ ५ ॥
अपभ्रंशमवोचत्सा भिक्षुकं प्रति सुन्दरी ।
विष्णुदासो गृहे नासीत्तद्दिने कुत्रचिद्गतः ॥ ६ ॥
एवं बहुगते काले तस्य मृत्युर्बभूव ह ।
भक्तत्वान्मम भो देवि यक्षलोके गतः स वै ॥ ७ ॥
त्रिंशद्वर्षसहस्राणि यक्षेण सह भोगवान् ।
तस्य भार्या मृता क्रूरा श्वश्रूणां दुःखदायिनी ॥८॥
सा गता नरके घोरे रौरवे नाम्नि भामिनि ।
भुक्त्वा नरकजं दुःखं पुनर्व्याघ्री बभूव ह ॥ ९ ॥
पुनः शृगाली वै जाता मानुषी च ततोऽभवत् ।
पुनर्विवाहिता सा वै मर्त्यलोके वरानने ॥ १० ॥
वन्ध्या चैव विशालाक्षि पूर्वजन्मविपाकतः ।
रोगो बहु भवेद्देवि सुखं नैवोपजायते ॥ ११ ॥

तस्याः पुण्यं प्रवक्ष्यामि पूर्वपापप्रणाशनम् ।
स्वपतिं प्रत्यहं माघे स्नापयेदुष्णवारिणा ॥ १२ ॥
श्वश्रूचरणयोः प्रातर्नमस्कुर्यात् प्रयत्नतः ।
अलाबूं नैव खादेत्तु षोडशाब्दप्रमाणतः ॥ १३ ॥
माघे नियमतो देवि पतिना सह सुव्रते ।
स्नानं प्रतिदिनं कुर्याद्दीपं दद्याद्यथाविधि ॥ १४ ॥
ततः कृत्वा सुवर्णस्य वृक्षं वै द्विपलस्य च ।
रौप्यां दशपलां देवि वेदीं शुभ्रां च कारयेत् ॥१५॥
वृक्षं तस्यां च संस्थाप्य कल्पवृक्षस्वरूपिणम् ।
पूजयित्वा ततो देवं शंखचक्रगदाधरम् ॥ १६ ॥
सगणं देवदेवेशं वृषकेतुं वरप्रदम् ।
ततो वै पूजयेद्देवि विधिवद्ब्रह्मरूपिणम् ॥ १७ ॥
वस्त्रकांचनकेयूरैः कुंडलाभ्यां विशेषतः ।
तद् वृक्षं वेदिकायुक्तं तस्मै विप्राय दापयेत्॥ १८ ॥
अन्यान्विप्रान् वरारोहे भोजयेद्विविधै रसैः ।
पायसैर्मोदकैः शुभ्रैः षट्षष्टिप्रमितान्प्रिये ॥ १९ ॥

ततो गां कपिलां दद्यात्स्वर्णशृङ्गीं सनूपुराम् ।
सप्तम्यां रवियुक्तायां व्रतं कुर्यान्मम प्रिये ॥ २० ॥
गोपालस्य च मंत्रेण लक्षजाप्यं च कारयेत् ।
हवनं तद्दशांशेन मार्जनं तर्पणं तथा ॥ २१ ॥
एवंकृते न संदेहः शीघ्रं पुत्रमवाप्नुयात् ।
कन्यका नैव जायन्ते रोगश्चैव निवर्त्तते ॥ २२ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
रोहिणीनक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं
नामाष्टादशोऽध्यायः ॥ १८ ॥

अथैकोनविंशोऽध्यायः ।

शिव उवाच ।

रोहिण्याश्चरणं देवि चतुर्थं साम्प्रतं शृणु ।
यत्कृतं संचितं पूर्वमिह जन्मनि तत्फलम् ॥ १ ॥
बुद्धिशर्मा द्विजः कश्चिदन्तर्वेद्यां बभूव ह ।
पुरोहितो महाभ्रष्टः परपाके सदा रतः ॥ २ ॥
भार्या पररता तस्य चंचला चपला सदा ।

धनं च संचितं तेन प्रतिग्रहप्रसंगतः ॥ ३ ॥
मरणं तस्य वै जातं पश्चाद्भार्या मृता तु सा ।
गतोऽसौ नरके घोरे पूर्वजन्मविपाकतः ॥ ४ ॥
युगमेकं वरारोहे भुक्त्वा नरकयातनाम् ।
वृषयोनिं च संप्राप्तो रासभत्वं ततोऽलभत् ॥ ५ ॥
मानुषत्वं पुनर्याति मध्यदेशे वरानने ।
अपुत्रता भवेद्देवि कन्यका चैव जायते ॥ ६ ॥
शरीरे रोगमुत्पन्नं सुखं नैव प्रजायते ।
प्रायश्चित्तं ततो देवि प्रवक्ष्यामि वरानने ॥ ७ ॥
आकृष्णेति जपेन्मंत्रं लक्षं वै विधिवत्प्रिये ।
होमं कुर्यात्प्रयत्नेन तिलाज्यमधुना सह ॥ ८ ॥
कुण्डे वै वर्त्तुलाकारे दशांशं तर्पणं तथा ।
मार्जनं तु विशेषेण ततो ब्राह्मणभोजनम् ॥ ९ ॥
दशवर्णा प्रदातव्या गुडधेनुस्तथा प्रिये ।
शय्यां दद्यात्प्रयत्नेन विधिवद्ब्राह्मणाय च ॥ १० ॥
भोजयेद्ब्राह्मणाञ्छुद्धान् वेदपाठरतान् प्रिये ।

सप्तसप्ततिसंख्यान्वै दीक्षिताञ्छुद्धमानसान् ११॥
प्रयागे माघमासे वै प्रातःस्नानं सभार्यया।
एवंकृते न संदेहः पुत्रस्तस्य प्रजायते॥ १२॥
रोगः प्रमुच्यते तस्य वन्ध्यात्वं च प्रणश्यति।
मृतवत्सा लभेत्पुत्रं कन्यका नैव जायते॥ १३॥

इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे रोहिणीनक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं नामैकोनविंशोऽध्यायः॥ १९॥

अथ विंशोऽध्यायः।

शिव उवाच।

अथ वक्ष्ये महादेवि चन्द्रनक्षत्रजं फलम्।
यत्कृतं मानुषैः पूर्वं तच्छृणुष्व वरानने॥ १॥
मध्यदेशे पुरे शुभ्रे वसत्येको द्विजः खलु।
ब्रह्मकर्मरतो नित्यं वेदवेदांगपारगः॥ २॥
प्रत्यहं पाठयामास चतुर्वेदान् सविस्तरान्।
वेदशर्मा द्विजः ख्यातस्तस्य पत्नी सुशीलिका॥३॥

प्रत्यहं पाठयेद्वेदं जीविकार्थं वरानने ।
लोहकारस्य मरणं तत्पुरेऽभूद्वरानने ॥ ४ ॥
न दत्तं तस्य वै स्वर्णं लोहकारस्य संस्थितम् ।
तत्स्वर्णं प्रत्यहं देवि बुभोज सह भार्यया ॥ ५ ॥
एवं बहुगते काले मरणं ब्राह्मणस्य वै ।
सूर्यलोकोभवद्देवि यतः सूर्यस्य सेवकः ॥ ६ ॥
त्रिंशद्वर्षसहस्राणि सूर्यलोकेऽवसत्प्रिये ।
ततः पुण्यक्षये जाते मर्त्यलोके च मानवः ॥ ७ ॥
पुत्रकन्याविहीनस्तु धनधान्यसमन्वितः ।
लोहकारस्य स्वर्णं हि गृहीतं नैव दत्तवान् ॥ ८ ॥
तेन कर्मविपाकेन लोहकारः सुतोभवत् ।
प्रीतिमांश्चैव सर्वेषां पितृमातृप्रियंकरः ॥ ९ ॥
युवारूपसमापन्नस्तदा मृत्युर्भवेदनु ।
पुनः पुत्रस्य चाभावः कन्या चैव प्रजायते ॥१०॥
तत्पापस्य विशुद्ध्यर्थं प्रायश्चित्तमतः शृणु ।
गायत्रीलक्षजाप्येन दुर्गायाः पूजनेन च ॥ ११ ॥

दशवर्णाप्रदानेन भूमिदानेन पार्वति ।
सर्वं पापं क्षयं याति पूर्वजन्मसमुद्भवम् ॥ १२ ॥
गयाश्राद्धं प्रयत्नेन तदर्थं नियतः प्रिये ।
प्रयागे मकरे मासि स्नानं कुर्यात्प्रयत्नतः ॥ १३ ॥
ततः पापं क्षयं याति पुनः पुत्रश्च जीवति ।
रोगाः सर्वे क्षयं यान्ति नात्र कार्या विचारणा॥ १४॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
मृगशिरानक्षत्रस्य प्रथमचरणप्रायश्चित्त-
कथनं नाम विंशोऽध्यायः ॥ २० ॥

अथ एकविंशोऽध्यायः ।

शिव उवाच ।

कान्यकुब्जे शुभे देशे कश्चिच्च नन्दने पुरे ।
बोधशर्मा द्विजश्चासीत् भिक्षुवृत्तिस्तु निर्धनः ॥१॥
परान्नं भुज्यते नित्यं परप्रेष्यरतः सदा ।
तस्य पत्नी समाख्याता वाधमानाम वै पुरा ॥ २ ॥

जन्मतो मरणं यावत् परान्नं भुज्यते च वै ।
नरके पतनं तेन तयोर्जातं प्रतिग्रहात् ॥ ३ ॥
बहुवर्षसहस्राणि प्रवासो नरकेऽभवत् ।
नरकान्निःसृतो देवि काकश्चैव मृगोऽभवत् ॥ ४ ॥
पुनर्वै मेषयोनिश्च पूर्वकर्मविपाकतः ।
ततो वै मानुषो जातो मध्यदेशे वरानने ॥ ५ ॥
रोगवान्नृत्यशीलश्च पुत्रकन्याविवर्जितः ।
परान्नं प्रत्यहं भुंक्ते श्राद्धं नैव कृतं पुरा ॥ ६ ॥
अतो वंशस्य वै छेदः फलञ्चैव तु पूर्वजम् ।
शान्तिं तस्य प्रवक्ष्यामि पूर्वपापक्षयस्ततः ॥ ७ ॥
गायत्रीजातवेदाभ्यां द्विलक्षं जापयेच्छिवे ।
ततः पापविशुद्धिः स्याद्दशांशहवनं यदा ॥ ८ ॥
तर्पणं मार्जनं देवि ब्राह्मणान् भोजयेत्ततः ।
शतसंख्यामिताञ्छुद्धान् गृहस्थानतिभक्तितः ॥६॥
वृषमेकं प्रदद्यात्तु नीलवर्णं विभूषितम् ।
एवंकृते न संदेहो रोगनाशो भवेद् ध्रुवम् ।

पुत्रस्तु जायते देवि वंध्यात्वं च प्रणश्याति ॥१०॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
मृगशिरानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं
नामैकविंशतितमोऽध्यायः ॥ २१ ॥

अथ द्वाविंशोऽध्यायः ।

शिव उवाच ।

नर्मदादक्षिणे तीरे पुरीका नाम वै पुरी ।
तस्यां पुर्यां विशालाक्षि कुलालो धनवानपि ॥ १ ॥
कुलालकर्मतो देवि बहुद्रव्यमुपार्जितम् ।
कर्मचन्द्र इति ख्यातस्तस्य पत्नी च देवकी ॥ २ ॥
स्वकर्मनिरतो नित्यं पात्रं कृत्वा दिने दिने ।
एवं सर्वं वयो जातं वृद्धत्वं च ततोऽभवत् ॥ ३ ॥
वृद्धे जाते तदा देवि दारिद्र्यत्वमजायत ।
सूर्पकारस्य वै द्रव्यं व्यवहारे गृहीतवान् ॥ ४ ॥
शतसंख्यामितं स्वर्णं व्ययं सर्वं कृतं शिवे ।
कुलालस्याभवन्मृत्युः पत्नी तस्य मृता पुरा ॥ ५ ॥

नर्मदायां महादेवि तावुभौ मृत्युमापतुः ।
तत्तीर्थस्य फलाद्देवि स्वर्गलोकं गतावुभौ ॥ ६ ॥
बहुवर्षसहस्राणि ताभ्यां भुक्तं फलं शुभम् ।
ततः पुण्यक्षये जाते मृत्युलोके च जायते ॥ ७ ॥
मानुषेपि शुभं जन्म धनधान्यसमन्वितः ।
पुनर्विवाहिता नारी पूर्वजन्मप्रसङ्गतः ॥ ८ ॥
ऋणसंबन्धतो देवि पुत्रो जातस्तदा शिवे ।
सूर्पकारो महादेवि वैरुद्धयं बालतः कृतम् ॥ ९ ॥
प्रत्यहं वसु यल्लब्धं तत्सर्वं च व्ययं तथा ।
द्यूतवेश्याप्रदानेन धनं सर्वं व्ययं गतम् ॥ १० ॥
युवा जातो यदा देवि पुत्रकन्यासमन्वितः ।
मरणं तस्य वै जातं पुनः पुत्रो न जायते ॥ ११ ॥
अथ शान्तिं प्रवक्ष्यामि शृणु सर्वं वरानने ।
गायत्रीलक्षजाप्येन त्र्यम्बकेण तथा प्रिये ॥ १२ ॥
कर्तव्यं कुंडमुच्चैस्तु त्रिकोणं विधिवत्प्रिये ।
होमं च कारयेद्देवि दशांशं तर्पणं ततः ॥ १३ ॥

ततो वै कपिलां दद्याद्धेमशृंगीं सहाम्बराम् ।
एवंकृत्वा वरारोहे पुनः पुत्रः प्रजायते ॥ १४ ॥
सूर्पकारस्य प्रतिमां पलसप्तदशस्य तु ।
सुवर्णस्यैव भो देवि रचितां वस्त्रछादिताम् ॥१५॥
सूर्परौप्यस्य वै कुर्यात्पलषष्टिप्रमाणतः ।
प्रदद्याद्वेदविदुषे ब्राह्मणाय सुतेजसे ॥ १६ ॥
तस्योद्देशेन भो देवि ऋणबन्धात्प्रमुच्यते ।
पुत्रश्च जायते देवि नात्र कार्या विचारणा ॥१७॥
इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे मृग-
शिरानक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं
नाम द्वाविंशोऽध्यायः ॥ २२ ॥

अथ त्रयोविंशोऽध्यायः ।

शिव उवाच ।

अथ वक्ष्याम्यहं देवि चतुर्थचरणं तथा ।
मृगशिरो नाम नक्षत्रं तस्य पूर्वं च संचितम् ॥ १ ॥
अवन्तीपुरतो देवि दक्षिणे क्रोशपंचके ।

पुरं तत्रैव विख्यातं केशवं नाम शोभनम् ॥ २ ॥
वसत्येको हि देवेशि ब्राह्मणो वेदपारगः ।
किशोरशर्मा विख्यातो मृतगेहे प्रभुज्यते ॥ ३ ॥
कष्टेनैव महादेवि व्ययं कुर्याद्दिने दिने ।
धनं च बहुधा कृत्वा पुण्यकार्यं न कारयेत् ॥ ४ ॥
ततो भ्रातुः कनिष्ठस्य भागं नैव ददौ च सः ।
त्रिकोटिप्रमितं द्रव्यं स्वगृहे चैव संचितम् ॥ ५ ॥
द्रव्यस्यैव विभागाय मरणं ब्राह्मणोपरि ।
कृतं भ्रात्रा कनिष्ठेन द्रव्यं तस्मै न दत्तवान् ॥ ६ ॥
एवं बहुतिथे काले किशोरः स मृतस्तु वै ।
गतो वै नरके घोरे युगमेकोनविंशतिम् ॥ ७ ॥
पुनः कर्मवशाद्देवि गर्दभत्वं च जायते ।
वृषयोनिस्ततो जातो मानुषत्वं भवेत्पुनः ॥ ८ ॥
मध्यदेशे वरारोहे पुत्रो नैव प्रजायते ।
कन्यका बहवो गर्भा विनश्यन्ति वरानने ॥ ९ ॥
पूर्वजन्मकृतं कर्म भुज्यते देवि मानवैः ।

इहलोके वरारोहे पुरायं पापमनूनकम् ॥ १० ॥
भ्रातस्तस्य कनिष्ठस्य मरणं पूर्वजन्मनि ।
तदुद्देशेन भो देवि तस्माद् रोगं च जायते ॥११॥
तस्य पापस्य शुद्धिं च शृणु देवि प्रयत्नतः ।
गायत्रीमूलमंत्रेण लक्षजाप्यं च कारयेत् ॥ १२ ॥
गृहवित्तषडंशेन पुरायकार्यं च कारयेत् ।
गायत्रीजातवेदेन त्र्यम्बकेन तथैव च ॥ १३ ॥
लक्षत्रयं जपं चैव दशवर्णाः प्रदापयेत् ।
हवनं विधिवत्कुर्यात् तर्पणं मार्जनं तथा ॥ १४ ॥
सौवर्णस्य वरारोहे सूर्यं कुर्यात्प्रयत्नतः ।
पलपञ्चप्रमाणेन द्विगुणं चंद्रमेव च ॥ १५ ॥
रौप्यस्यैव प्रकुर्यात्तु यथाशास्त्रं प्रपूजयेत् ।
मंत्रेणानेन भो देवि दद्याद्विप्राय तद्द्वयम् ॥१६॥

"ॐ ह्रीं मार्तण्डाय स्वाहा"

सूर्यदेव महाभाग त्रैलोक्यतिमिरापह ।
मम पूर्वकृतं पापं क्षम्यतां परमेश्वर ॥ १७ ॥

"ॐ सोमाय स्वाहा"

ॐ सौम्यरूप महाभाग मंत्रराज द्विजोत्तम ।
पूर्वजन्मकृतं पापमोषधीश क्षमस्व मे ॥ १८ ॥
ततश्च ब्राह्मणान्पूज्य भोजयित्वा विसर्जयेत् ।
एवंकृते न संदेहो विद्वान् पुत्रोऽभिजायते ॥ १९ ॥
रोगः सर्वः क्षयं याति नात्र कार्या विचारणा॥२०॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे मृगशिरानक्षत्रस्य चतुर्थचरणप्रायश्चित्त-कथनं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

अथ चतुर्विंशोऽध्यायः ।

शिव उवाच ।

अथातः संप्रवक्ष्यामि रौद्रनक्षत्रजं फलम् ।
येन कर्मविपाकेन मृत्युलोके च भुज्यते ॥ १ ॥
अवन्तीपुर्यां भो देवि रंगकारश्च तिष्ठति ।
वस्त्राणि रंगयन्नित्यं स्वधर्मं पालयेत्सदा ॥ २ ॥
कुबेर इति तन्नाम लीलानाम्नी च तत्प्रिया ।

पतिव्रता च सा देवि रंगकारश्च तां त्यजन् ॥३॥
ब्राह्मणीं रमते चैकां पापप्रीतिं समुद्वहन् ।
त्यक्त्वा पतिव्रतां भार्यां ब्राह्मणीं प्रीतितोऽभजत् ४
द्रव्यं च संचितं तेन रङ्गकारेण वै शिवे ।
भूमिमध्ये च तद् द्रव्यं कृतं तेन च सुन्दरि ॥५॥
किञ्चिद्दानं कृतं तेन गंगायमुनसंगमे ।
मरणं तस्य वै जातं सा च भार्या विवाहिता ॥ ६ ॥
तत्पुरे च सती जाता लीलानाम पतिव्रता ।
सत्यलोकं गतः सोपि लक्षद्वयमितं प्रिये ॥ ७ ॥
पुनः पुण्यक्षये जाते मनुष्योऽभूत्सदाशिवे ।
मध्यलोके च विख्यातो धनधान्यसमन्वितः ॥ ८ ॥
पुत्राश्च बहवो जाताः कोपि तेषु न जीवति ।
शरीरे च ज्वरोत्पत्तिः खंजत्वं चरणे तथा ॥ ९ ॥
ब्राह्मणीगमनं देवि पूर्वजन्मनि वै कृतम् ।
तेन पापेन भो देवि पुत्रस्तस्य न जीवति ॥ १० ॥
अस्य शान्तिं प्रवक्ष्यामि तां शृणुष्व वरानने ।

दशायुतं जपेद्देवि गायत्रीं वेदमातरम् ॥ ११ ॥
हवनं तद्दशांशेन तर्पणं मार्जनं तथा ।
षडंशं चैव दानं वै दद्याद्वेदविदे शिवे ॥ १२ ॥
ब्राह्मणान्भोजयेत्पश्चाच्छर्करापायसेन च ।
गामेकां विधिवद्दद्याद्धेमवर्णां सुभूषिताम् ॥ १३ ॥
एवंकृते न संदेहो बहुपुत्रश्च जायते ।
रोगस्यैव विमुक्तिः स्यान्नात्र कार्या विचारणा॥१४॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
रौद्रनक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं
नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

अथ पञ्चविंशोऽध्यायः ।

शिव उवाच ।

शृणु देवि वरारोहे नृणां वै पूर्वजन्मनि ।
यत्कृतेन महाघोरे नरके परिपच्यते ॥ १ ॥
अवन्त्यां पश्चिमे द्वारे वैश्यो वसति भाग्यवान् ।
धनधान्यसमायुक्तः स्वधर्मनिरतः सदा ॥ २ ॥

एवमर्द्धं वयो जातं दरिद्रत्वं ततोऽभवत् ।
व्ययार्थं वै ततो देवि विप्रस्वर्णं गृहीतवान् ॥ ३ ॥
पलविंशप्रमाणं तद् व्ययं जातं वरानने ।
ततो वैश्यस्य मृत्युर्वै भार्यया सहितस्य वै ॥ ४ ॥
स्वर्गं जातं ततो देवि नर्मदामरणादपि ।
षष्टिवर्षसहस्राणि स्वर्गस्यैव फलं शुभम् ॥ ५ ॥
भुक्तं बहुविधं देवि भार्यया सहितेन वै ।
ततः पुण्यक्षये जाते पुनर्मर्त्यौ बभूवतुः ॥ ६ ॥
धनधान्यसमायुक्तौ पुत्रकन्याविवर्जितौ ।
रुग्णौ दुर्बलगात्रौ च पूर्वकर्मफलेन तु ॥ ७ ॥
ऋणसम्बन्धतो देवि विप्रः पुत्रोऽभवत्तदा ।
ऋणं यावत्प्रमाणं वै गृहीतं पूर्वजन्मनि ॥ ८ ॥
तावन्मात्रं गृहीत्वा तु ततो वै मरणं भवेत् ।
पुनः पुत्रो न तस्यैव विंशद्वर्षे गते सति ॥ ९ ॥
तस्य दानं शृणुष्वादौ पूर्वपापक्षयो यतः ।
गृहवित्ताष्टमं भागं ब्राह्मणाय समर्पयेत् ॥ १० ॥

स्वर्णपञ्चपलेनैव पुष्पं च मकराकृतिम् ।
प्रदद्याद्वेदविदुषे पूर्वपापक्षयो भवेत् ॥ ११ ॥
गायत्र्याश्च जपं कुर्याल्लक्षमेकं वरानने ।
होमं च तद्दशांशेन मार्जनं च तथाविधम् ॥ १२ ॥
गामेकां स्वर्णशृङ्गीं च वत्सवस्त्रविभूषिताम् ।
दद्याद्वेदविदे देवि ब्राह्मणाय तदा भवेत् ॥ १३ ॥
पुनः पुत्रः प्रसूयेत नात्र कार्या विचारणा ॥ १४ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
रौद्रनक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं
नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

अथ षड्विंशोऽध्यायः ।

शिव उवाच ।

अवन्तीनगरी नाम्ना ततः क्रोशद्वयोपरि ।
अग्निकोणे महादेवि मङ्गलं नाम वै पुरम् ॥ १ ॥
तस्मिन्ग्रामे वसत्येको ब्राह्मणो द्यूततत्परः ।
अन्ये तु बहवस्तत्र वसन्ति सुद्विजोत्तमाः ॥ २ ॥

मद्यपानरतो नित्यं चौरविद्यासु तत्परः ।
परस्त्रीलम्पटो देवि वेश्यायां निरतः सदा ॥ ३ ॥
प्रत्यहं स च भो देवि द्विजरूपो नरोधमः ।
चौरत्वाद् द्रव्यमुत्पाद्य नैव दानं समाचरेत् ॥ ४ ॥
एवं बहुदिने याते तस्य मृत्युर्बभूव ह ।
नरके पातयामास यमदूतो यमाज्ञया ॥ ५ ॥
सप्ततिर्वै सहस्राणि रौरवे परिपच्यते ।
महाकष्टं लभेद्देवि कृमिसूचीमुखादिभिः ॥ ६ ॥
पुनः कर्मवशाद्देवि नरकान्निर्गतो यदा ।
विडालकाकयोनिं च तदा प्राप्तो द्वयं हि च ॥ ७ ॥
योनिद्वयफलं भुक्त्वा मानुषत्वं ततो लभेत् ।
मध्यदेशे वरारोहे ततः पीडा महत्यपि ॥ ८ ॥
वंशच्छेदो भवेद्देवि पूर्वकर्मविपाकतः ।
तस्योपरि विशालाक्षि शान्तिं शृणु वरानने ॥ ९ ॥
गायत्रीजातवेदाभ्यां त्र्यम्बकेण यथाविधि ।
जपं वै कारयामास हवनं तर्पणं तथा ॥ १० ॥

लक्षत्रयं जपेद्देवि पूर्वपापविशुद्धये ।
ततो वै पूजयेद्देवि तुलसीं शुद्धिरूपिणीम् ॥ ११ ॥
पूजयेद्विविधैश्चान्नैर्धूपनैवेद्यदीपकैः ।
भूमिदानं ततो देवि यथाशक्ति प्रदापयेत् ॥ १२ ॥
एवंकृते महादेवि सर्वरोगक्षयो भवेत् ।
पुत्रश्च जायते देवि वन्ध्यात्वं च प्रणश्यति ॥ १३ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
रौद्रनक्षत्रस्य प्रायश्चित्तकथनं नाम
षड्विंशोऽध्यायः ॥ २६ ॥

अथ सप्तविंशोऽध्यायः ।

शिव उवाच ।

अथातः संप्रवक्ष्यामि चतुर्थचरणं शिवे ।
कृतं नरेण यद्देवि पूर्वजन्मनि किल्बिषम् ॥ १ ॥
अवन्तीपुरतोऽवात्सीच्छूद्र एको महाधनः ।

विक्रयं क्रियते छागमेषयोर्गृहवासिनोः ॥ २ ॥
गजमश्वं तथा रत्नवस्त्राणि विविधानि च ।
एकदा सूर्यग्रहणं दृष्टं तेन वरानने ॥ ३ ॥
गोसहस्रं कृतं दानं भार्यया सहितेन वै ।
नर्मदायां विशालाक्षि स्वर्णवस्त्रयुतं तथा ॥ ४ ॥
तत्रैव चाभवत् पीडा मृत्युलोकसमुद्भवा ।
स्वर्णकारस्य वै द्रव्यं व्यवहारनिमित्तकम् ॥ ५ ॥
गृहीतं चैव नो दत्तं ततः शृणु वरानने ।
ततो बहुगते काले शूद्रस्य मरणं ह्यभूत् ॥ ६ ॥
ततोऽसौ नरके घोरे वर्षलक्षद्वयं तथा ।
तत्रैव बहुधा पीडां भुक्त्वा चैव स्वकर्मतः ॥ ७ ॥
पुनर्जातो मर्त्यलोके काकश्च महिषो बकः ।
मानुषत्वं ततो देवि कुले महति वै शुभे ॥ ८ ॥
स्वर्णकारस्य द्रव्यं वै गृहीतं पूर्वजन्मनि ।
न दत्तं वै ऋणं देवि पुत्रस्य मरणं ततः ॥ ९ ॥
युवरूपो यदा जातो व्याधिग्रस्ततनुस्तदा ।

देहार्द्धवातरोगश्च पुत्रस्य मरणं ततः ॥ १० ॥
भार्याद्वयसमायुक्त एका प्रीतिमती भवेत् ।
पूर्वजन्मनि यत्कर्म पुण्यं पापं शरीरतः ॥ ११ ॥
मर्त्यलोके मनुष्येण भुज्यते नात्र संशयः ।
अथातः संप्रवक्ष्यामि पापनिग्रहहेतवे ॥ १२ ॥
गायत्रीलक्षजाप्येन हरिवंशश्रुतेन च ।
रथाश्ववस्त्रदानेन ग्रामदानेन वै तथा ॥ १३ ॥
तिलधेनुप्रदानेन सर्वपापक्षयो भवेत् ।
स्वर्णमुद्रासहस्रस्य प्रतिमां कारयेद् बुधः ॥ १४ ॥
पूर्वोक्तेन विधानेन पूजयित्वा प्रदापयेत् ।
पार्थिवं पूजयेच्छम्भुं तथा गोमयनिर्मितम् ॥ १५ ॥
लक्षत्रयं प्रमाणं च पञ्चगव्येन पूजयेत् ।
पञ्चामृतेन भो देवि गोदुग्धेनैव पूजयेत् ॥ १६ ॥
तथा च विविधैर्मन्त्रैः षडङ्गैर्वेदसंभवैः ।
मुच्यतेऽर्द्धाङ्गरोगेण नात्र कार्या विचारणा ॥१७॥
वन्ध्यात्वं प्रशमं याति लभेत्पुत्रं न संशयः ।

मृतवत्सा लभेत्पुत्रं चिरजीविनमुत्तमम् ॥ १८ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
रौद्रनक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं
नाम सप्तविंशोऽध्यायः ॥२७॥

अथाष्टाविंशोऽध्यायः ।

शिव उवाच ।

ये नराश्च परद्रव्यं हरन्ति सततं प्रिये ।
ते नरा दुःखतां यान्ति रोगेण च प्रपीडिताः ॥१॥
ऋणं तस्य गृहीतं वै तदृणं न ददाति च ।
ऋणसंबन्धतो देवि पुत्रो भवति दारुणः ॥ २ ॥
गृहीतमात्रं वै भग्नं धातुभग्नस्तथा नरः ।
कन्याघातात्तु पूर्वं हि फलं भवति तादृशम् ॥ ३ ॥
अवन्तीपुरतो देवि ख्यातं चैव सुशोभनम् ।
क्रोशमात्रं ततो देवि चोत्तरे नगरे तथा ॥ ४ ॥
वसन्तपुरमित्याख्यं वसन्ति बहवो जनाः ।
नाम्ना तन्मध्य आभीरो नन्दनो वसति प्रिये ॥५॥

तस्य भार्या तु विख्याता नाम्ना वै सुन्दरी प्रिये ।
सर्वथा च महादेवि कृपणः सह भार्यया ॥ ६ ॥
मित्रं तस्य महादेवि ब्राह्मणो वेदपारगः ।
स तिष्ठति पुरीमध्ये धनं तस्य स्थितं बहु ॥ ७ ॥
प्रत्यहं च परान्नेन भोजनं कुरुते स तु ।
यदा वृद्धत्वमायातः पुरीं चैव तदात्यजत् ॥ ८ ॥
आगतो मित्रपार्श्वे वै वसन्ते वै पुरे शुभे ।
आभीरेण गृहे वासं मित्रत्वाद्दत्तवान् स्वयम् ॥९॥
बहुकालमवात्सीत्स तत्प्रीत्या सुरसुन्दरि ।
आभीरस्तु ततो देवि स्वर्णं दृष्ट्वा प्रहर्षितः ॥१०॥
तस्य स्वर्णं समाहृत्य स्वगृहे स्थापितं तदा ।
ब्राह्मणेन महत्कष्टं कृतं द्रव्यस्य शोकतः ॥ ११ ॥
महाशोकसमायुक्तः काश्यां चैव समागतः ।
शरीरं चापि तत्याज स्वर्णशोकेन वै द्विजः ॥१२॥
शूद्रेणैव महादेवि तस्य स्वर्णं प्रभुज्यते ।
ततो बहुगते काले मरणं तस्य चाभवत् ॥ १३ ॥

नरके पातयामास यमदूतो यमाज्ञया ।
षष्टिवर्षसहस्राणि भुक्त्वा नरकयातनाम् ॥ १४ ॥
ततस्तेन तु प्रेतत्वं भुक्तमब्दसहस्रकम् ।
उलूकत्वं वरारोहे कौशिक्या निकटे ततः ॥ १५ ॥
सरय्वा उत्तरे कूले मानुषत्वं ततोऽभवत् ।
मध्यदेशे च भो देवि पत्न्या सह वरानने ॥ १६ ॥
धनधान्यसमायुक्तो राजसेवासु तत्परः ।
जातः पुनर्वसोर्देवि प्रथमे चरणे खलु ॥ १७ ॥
पूर्वजन्मनि भो देवि यतो गोशतमदात्सः ।
भूपतित्वं ततो देवि धनाढ्यत्वं भवेत् खलु ॥१८॥
ब्राह्मणस्य हृतं स्वर्णं स्वयं चौर्येण यत्पुरा ।
तेन पापेन भो देवि पुत्रस्य मरणं खलु ॥ १९ ॥
तस्य शान्तिं प्रवक्ष्यामि तत्सर्वं शृणु पार्वति ।
गृहवित्ताष्टमैर्भागैः पुण्यकार्यं च कारयेत् ॥ २० ॥
गायत्रीजातवेदाभ्यां याः फलेति तथा प्रिये ।
लक्षत्रयं जपं कुर्याद्दशांशहवनं ततः ॥ २१ ॥

तर्पणं मार्जनं चैव दशांशः क्रमतस्तथा ।
हरिवंशस्य श्रवणं चण्डिकार्चनमेव च ॥ २२ ॥
शिवार्चनमशेषेण वापिकां चैव कारयेत् ।
कूपं चैव तडागं च पथि मध्ये च कारयेत् ॥२३॥
कूष्माण्डं नारिकेलं च पञ्चरत्नसमन्वितम् ।
गंगामध्ये प्रदातव्यं शनौ चाश्वत्थपूजनम् ॥२४॥
पलसप्तदशेनैव प्रतिमां कारयेद् बुधः ।
चतुष्कोणगतां वेदीं रौप्यैर्दशपलान्वितैः ॥ २५ ॥
तन्मध्ये प्रतिमां स्थाप्य सपुत्रस्य द्विजस्य तु ।
पूजां कुर्यात्तु वै भक्त्या मन्त्रेणानेन वै शिवे ॥२६॥
वासुदेवादिदशभिर्मन्त्रैरेभिः पृथक् पृथक् ।
पूजयेत्प्रतिमां तां तु ततो दद्याद् द्विजन्मने॥२७॥
पूजयेद्देवदेवेशं सर्वपापापनुत्तये ।
ततः सम्प्रार्थ्य देवेशं शङ्खचक्रगदाधरम् ॥ २८ ॥
पीताम्बरं चतुर्बाहुं पुण्डरीकनिभेक्षणम् ।
वासुदेवं जगन्नाथं धराधरगुरो हरे ॥ २९ ॥

मम पूर्वकृतं पापं क्षम्यतां परमेश्वर ।
ततो गां कपिलां दद्यात्स्वर्णशृङ्गीं सनूपुराम् ॥३०॥
विधिवद्वेदविदुषे ब्राह्मणाय तपस्विने ।
दशवर्णास्ततो दद्याद् ब्राह्मणान्भोजयेत्ततः ॥३१॥
भूमिदानं ततो दद्याद्विप्राय विदुषे ततः ।
एवंकृते न संदेहः पूर्वपापं विनश्यति ॥ ३२ ॥
सन्तानो जायते देवि रोगाणां संक्षयस्ततः ।
कन्यका नैव जायन्ते वन्ध्यात्वं च प्रणश्यति ॥३३॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
पुनर्वसुनक्षत्रस्य प्रथमचरणप्रायश्चित्त-
कथनं नामाष्टाविंशोऽध्यायः ॥ २८ ॥

अथ एकोनत्रिंशोऽध्यायः ।

शिव उवाच ।

अथातः संप्रवक्ष्यामि यत्कृतं पूर्वजन्मनि ।
अवन्तीपुरतो देवि पूर्वे क्रोशप्रमाणतः ॥ १ ॥
लक्ष्मणस्य पुरं ख्यातं तत्रैव बहवो जनाः ।

वसन्ति वैष्णवाः सर्वे वेदकर्मविचक्षणाः ॥ २ ॥
स्वर्णकारो वसत्येकः स्वकर्मनिरतः सदा ।
दामोदर इति ख्यातस्तस्य पत्नी प्रभावती ॥ ३ ॥
विष्णुभक्तिरतः शान्तः सज्जनानां च सेवकः ।
पत्नी पतिव्रता तस्य पतिशुश्रूषणे रता ॥ ४ ॥
तस्य पुत्रद्वयं जातं गुणज्ञं पितृसेवकम् ।
एका च बल्लवी तत्र निवासाय तदागता ॥ ५ ॥
पुत्रद्वयसमायुक्ता बहुगोधनसंयुता ।
एको द्यूतरतः पुत्रो द्वितीयश्चौरसंमतः ॥ ६ ॥
उपार्जितं महिषीस्वं गोधनं बहुधा तथा ।
चौरद्यूतोपचाराभ्यां धनाढ्यत्वमजायत ॥ ७ ॥
दुग्धादिकं महादेवि भुज्यते प्रत्यहं तदा ।
स्वर्णकारो महाद्रव्यामाभीरीं सर्वसंयुताम् ॥ ८ ॥
आनीतवान् स्वगेहे तां तदा च वरवर्णिनीम् ।
ततो बहुगते काले महामारीज्वरादिना ॥ ९ ॥
पुत्राभ्यां सममद्राक्षीद् बल्लव्या मरणं तदा ।

द्रव्यं तस्यास्तदा देवि स्वर्णकारो गृहीतवान्॥१०॥
भुक्तं द्रव्यं च तत्सर्वं यावत्तिष्ठति भूतले ।
भार्यया सह पुत्राभ्यां महिषीगोधनादिकम् ॥११॥
ततो वयोत्तरे देवि मृत्युस्तस्याभवत्किल ।
पत्नी तस्य मृता साध्वी ताभ्यां स्वर्गमभूत्पुरा ॥१२॥
पञ्चवर्षसहस्राणि स्वर्गे सुखमजीजनत् ।
पुनः पुण्यक्षये जाते मानुषत्वं भवेद्भुवि ॥ १३ ॥
अयोध्यानगराद्देवि सरय्वा उत्तरे तटे ।
कोशद्वये विशालाक्षि पुरे देहलसंज्ञके ॥ १४ ॥
स्वकर्मनिरतः प्राज्ञः स्वविद्यायां विचक्षणः ।
स्वदेशे चैव विख्यातः शत्रूणां च विमर्दनः ॥१५॥
पुनर्विवाहिता पत्नी साध्वी या पूर्वजन्मनि ।
तस्य नेत्रे विशालाक्षि पूर्वजन्मफलाद्गते ॥ १६ ॥
बाल्ये चैव तु पुत्रस्य नेत्रं वामं प्रणाशितम् ।
तेन पापेन भो देवि गतं नेत्रद्वयं शिवे ॥ १७ ॥
भक्षितं तस्य तत्स्वर्णं न दत्तं ब्राह्मणाय वै ।

तेन पापेन भो देवि मृतः पुत्रो वरः शुभे ॥ १८ ॥
मित्रसंबन्धतः पापात् पुत्रपौत्रद्वयं मृतम् ।
पूर्वजन्मकृतं देवि शुभाशुभफलं तथा ॥ १९ ॥
भुज्यते प्राणिभिः सर्वैस्तथा देवि विशेषतः ।
म्लेच्छसेवारतो नित्यं म्लेच्छस्यैव च सङ्गतिः २०॥
कुमार्गतो भवेद्देवि मर्त्यलोके जनिर्यदा ।
शान्तिं शृणु महादेवि पूर्वपापप्रणाशिनीम् ॥ २१ ॥
गृहवित्ताष्टमैर्भागैः पुण्यकार्यं च कारयेत् ।
गायत्रीजातवेदाभ्यां याः फली त्र्यम्बकेण वा २२॥
विष्णोरराटमन्त्रेण जपं वै कारयेत्तथा ।
पञ्चलक्षप्रमाणेन यथापापं प्रणश्यति ॥ २३ ॥
होमं वै कारयेद्देवि दशांशं विधिपूर्वकम् ।
ततो वै तर्पणं कुर्यान्मार्जनं तु विशेषतः ॥ २४ ॥
प्रतिमां कारयेत्तद्वद्विष्णोश्चैव सदाशिवे ।
अष्टादशपलस्यैव सुवर्णस्य हरिं विभुम् ॥ २५ ॥
तद्वदेव शिवस्यैव रजतस्य परं विभुम् ।

प्रतिमां पूजयेद्देवि मन्त्रेणानेन सुव्रते ॥ २६ ॥
ॐ गरुडध्वज देवेश चराचरगुरो हरे ।
वासुदेव जगन्नाथ पूर्वपापं विनाशय ॥ २७ ॥
ॐ नन्दिकेश्वर भूतेश देवदेव सुरेश्वर ।
मम पूजां गृहाण त्वं पूर्वपापं प्रणाशय ॥ २८ ॥
ततः इन्द्रादिदशदिक्पालान्पूजयेत् ।

ॐ इन्द्राय नमः ॥ १ ॥ ॐ अग्नये नमः ॥ २ ॥
ॐ यमाय नमः ॥ ३ ॥ ॐ नैर्ऋतये नमः ॥ ४ ॥
ॐ वरुणाय नमः ॥ ५ ॥ ॐ वायवे नमः ॥ ६ ॥
ॐ कुबेराय नमः ॥ ७ ॥ ॐ ईशानाय नमः ॥ ८ ॥
ॐ ब्रह्मणे नमः ॥ ६ ॥ ॐ अनन्ताय नमः ॥१०॥

गन्धपुष्पाक्षतैः सर्वान्पूजयेच्च पृथक् पृथक् ।
ततो गां कपिलां देवि स्वर्णशृङ्गीं प्रपूजयेत् ॥२९॥
मन्त्रेणानेन भो देवि सर्वपापहरां शुभाम् ।
ॐनमोभगवत्यै कामेश्वर्यै ममपापंव्यपोहतुस्वाहा॥

पुरा मम कृतं पापं कामधेनो सुरेश्वरि ।
कपिले त्वं जगन्मातर्मम कार्यं प्रसाधय ॥ ३० ॥
ततश्च दद्याद्गां देवि ब्राह्मणाय शिवात्मने ।
दशवर्णास्ततो दद्यात् पात्राणि विविधानि च॥३१॥
वृषभं च ततो देवि नीलवर्णं सुसंस्कृतम् ।
ब्राह्मणाय प्रदद्यात्तु सर्वपापस्य संक्षयः ॥ ३२ ॥
पूजयेद्विविधैरन्नैः पायसैश्च समोदकैः ।
ब्राह्मणाञ्छतसंख्याकान् रुद्रविष्णुस्वरूपिणः३३॥
प्रतिमां दापयेत्पश्चाद्ब्राह्मणेभ्यश्च दक्षिणाम् ।
बन्धुभिः सह भुञ्जीत ततो विप्रविसर्जनम् ॥ ३४ ॥
यथाशक्ति प्रदद्याद्वै ब्राह्मणेभ्यश्च दक्षिणाम् ।
हरिवंशस्य श्रवणं पार्थिवस्य च पूजनम् ॥ ३५ ॥
भूमिदानं विशेषेण ब्राह्मणाय च दापयेत् ।
एवंकृते वरारोहे पूर्वजन्मसमुद्भवम् ॥ ३६ ॥
पापं प्रशमयेच्छीघ्रं मम वाक्यं च नान्यथा ।
रोगादिविविधं दुःखं तत्सर्वं विलयं व्रजेत् ॥ ३७ ॥

वंशवृद्धिर्भवेद्देवि नात्र कार्या विचारणा ॥ ३८ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे पुनर्वसुनक्षत्रस्य द्वितीयचरणप्रायश्चित्त-कथनं नामैकोनत्रिंशोऽध्यायः ॥ २६ ॥

अथ त्रिंशोऽध्यायः ।

शिव उवाच ।

पुर्यामवन्तिकायां वै नापितो वसति प्रिये ।
स्वकर्मणः परिभ्रष्टः कृषिकर्मरतः सदा ॥ १ ॥
पत्नी तस्य महादेवि परपुंसि रता सदा ।
कर्कशानाम विख्याता दर्दुरानाम नामतः ॥ २ ॥
एकस्मिन्दिवसे देवि वैश्यो धनसमन्वितः ।
स्वर्णकोटिं च संगृह्य निकटे तस्य चागतः ॥ ३ ॥
नापितेन ततो देवि वैश्यो धनसमन्वितः ।
अर्द्धरात्रे गते काले ततः खड्गेन वै हतः ॥ ४ ॥
द्रव्यं सर्वं गृहीत्वा तु तां पुरीं च ततस्त्यजन् ।
सर्वं स्वर्णं व्ययीकृत्य न दानं च कृतं क्वचित् ॥ ५ ॥

एकदा समये देवि नापितेन सह स्त्रिया ।
प्रयागे मकरे मासि मासमेकं निरन्तरम् ॥ ६ ॥
प्रत्यहं क्रियते स्नानं प्रातःकाले सदाशिवे ।
गोदानं च कृतं तेन वृषभं स्वर्णभूषितम् ॥ ७ ॥
ततो वै मरणं तस्य नापितस्य सुरेश्वरि ।
निर्जले तस्य भो देवि चोपले पथिमध्यगे ॥ ८ ॥
यमदूतैर्महादेवि नरके नामकर्दमे ।
क्षिप्तो यमाज्ञया वर्षसहस्रं षष्टिसंमितम् ॥ ९ ॥
नरकान्निर्गतो देवि व्याघ्रयोनिस्ततोऽभवत् ।
पुनर्महिषयोनिं च मानुषत्वं ततो गतः ॥ १० ॥
ऋक्षे पुनर्वसौ देवि तृतीयचरणे वरे ।
प्रातःस्नानफलं देवि नृपवंशसमुद्भवः ॥ ११ ॥
मध्यदेशे वरारोहे सरय्वा उत्तरे तटे ।
महाधनेन संयुक्तश्चौराणां कर्मकारकः ॥ १२ ॥
पत्नी तस्य भवेद् वन्ध्या मृतवत्सा सुतायुता ।
कफरोगसमायुक्ता ज्वरेणैव प्रपीडिता ॥ १३ ॥

मित्रस्यैव वधः पूर्वं नापितेन यतः कृतः ।
तेन कर्मफलेनैव महारोगसमुद्भवः ॥ १४ ॥
पुत्रोपि जायते देवि तस्य मृत्युर्भवेत्किल ।
शान्तिं तस्य प्रवक्ष्यामि शृणु देवि समासतः १५॥
गायत्रीमूलमन्त्रेण पञ्चलक्षजपो यदा ।
तदा पापं क्षयं याति पूर्वजन्मनि यत्कृतम् ॥१६॥
हरिवंशस्य श्रवणं चण्डीपाठं शिवार्चनम् ।
विधिवद्देवि कर्तव्यं पापं सर्वं विनश्यति ॥ १७ ॥
चतुरस्रे ततः कुण्डे होमं चैव तु कारयेत् ।
तिलधान्यादिभिर्देवि दशांशजपसंख्यया ॥ १८ ॥
वैश्यस्य प्रतिमां देवि कारयेद्वै सुवर्णतः ।
पञ्चविंशपलेनैव रचितां च प्रयत्नतः ॥ १९ ॥
ताम्रपात्रे शुभे स्थाप्य पूजयेत्प्रतिमां ततः ।
मन्त्रेणानेन भो देवि गन्धपुष्पाक्षतादिभिः ॥२०॥
मन्त्रः । ॐ नमस्ते देवदेवेश शङ्खचक्रगदाधर ।
अज्ञानाद्वा प्रमादाद्वा मया पापं कृतं पुरा ।

तत्सर्वं क्षम्यतां देव शरणागतवत्सल ॥ २१ ॥
ॐ चक्रधराय नमः ॐ गोविन्दाय नमः ।
ॐ दामोदराय नमः ॐ कृष्णाय नमः ।
ॐ हंसाय नमः ॐ परमहंसाय नमः ।
ॐ अच्युताय नमः ॐ हृषीकेशाय नमः ।
ॐ चक्रादिनामभिश्चैतैः सर्वदिक्षु प्रपूजयेत् ।
प्रतिमां पूजयित्वा तु तां विप्राय प्रदापयेत् ॥२२॥
ततो गां कृष्णवर्णां तु ब्राह्मणाय प्रदापयेत् ।
पञ्चसंख्यामितं देवि प्रदद्याद्वै कुटुम्बिने ॥ २३ ॥
ब्राह्मणान्भोजयेद्देवि यथासंख्यान्वरानने ।
एवंकृते वरारोहे शीघ्रं पुत्रः प्रजायते ॥ २४ ॥
वन्ध्यात्वं नाशयत्याशु सर्वरोगो विनश्यति ॥२५॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
पुनर्वसुनक्षत्रस्य तृतीयचरणप्रायश्चित्त-
कथनं नाम त्रिंशोऽध्यायः ॥ ३० ॥

अथ एकत्रिंशोऽध्यायः ।

शिव उवाच ।

अवन्त्याः पश्चिमे देवि क्रोशमात्रोपरि प्रिये ।
कैवर्त्तको वसत्येको नन्दने च पुरे शुभे ॥ १ ॥
मनोहर इति ख्यातो धनाढ्यो जायते महान् ।
मत्ता तस्याभवत्पत्नी पतिशुश्रूषणे रता ॥ २ ॥
मत्स्यमांसस्य भो देवि विक्रयं चाकरोत्खलु ।
सञ्चितं बहु रत्नञ्च न दानं बहुधाकरोत् ॥ ३ ॥
एकदा चन्द्रग्रहणे शतस्वर्णयुतं वृषम् ।
अदाद्विप्राय विदुषे भार्यया सह भक्तितः ॥ ४ ॥
ततो मृत्युवशं यातो भार्या तस्य मृता पुरा ।
यमदूतैर्महाघोरे नरके पातितः पुरा ॥ ५ ॥
यमाज्ञया महादेवि षष्टिवर्षसहस्रकम् ।
नरकान्निःसृतो देवि शृगालो गहने वने ॥ ६ ॥
पुनः काको वरारोहे ततो भवति मानुषः ।
गुणज्ञो देवताभक्तो वेश्यासुरततत्परः ॥ ७ ॥

रागी सूक्ष्मतनुर्वक्ता ज्ञानवान्सुतवर्जितः ।
तस्य भार्या भवेत्स्थूला कुरूपा कर्कशा तथा ॥८॥
पूर्वजन्मप्रसङ्गाच्च मत्स्यमांसोपभोगिनी ।
मासि पुष्पं भवेद्देवि गर्भस्य पतनं तथा ॥ ९ ॥
तस्य शान्तिं प्रवक्ष्यामि शृणु देवि सुशोभने ।
यत्कृतेन वरारोहे शीघ्रं पुत्रमवाप्नुयात् ॥ १० ॥
हरिवंशस्य श्रवणं त्रिवारं च विधानतः ।
गायत्रीमूलमन्त्रेण पञ्चलक्षजपं तथा ॥ ११ ॥
दशांशं हवनं देवि दशांशं चैव तर्पणम् ।
मार्जनं च विशेषेण दशांशं चैव कारयेत् ॥ १२ ॥
ततो गां कपिलां दद्याद्दशवर्णां ततः प्रिये ।
सूर्यस्य प्रतिमां देवि स्वर्णैर्दशपणैस्तथा ॥ १३ ॥
भूषितं विविधैर्वस्त्रैः स्वर्णरौप्यविभूषणैः ।
पूजयित्वा विधानेन मन्त्रेणानेन पार्वति ॥ १४ ॥

मन्त्रः ।

ॐ त्वं ज्योतिःसर्वलोकानां पूज्यस्त्वं सर्वदेहिनाम् ।

पूर्वजन्मकृतं पापं हर मे तिमिरापह ॥ १५ ॥
(१) ॐ श्रीसूर्याय नमः (२) ॐ सवित्रे नमः ।
(३) ॐ साक्षिणे नमः (४) ॐ त्रिगुणात्मने नमः ।
(५) ॐ द्वादशात्मने नमः (६) ॐ केयूरधारिणे नमः ।
(७) ॐ तीक्ष्णांशुधारिणे नमः (८) ॐ कलाकाष्ठादि-
रूपिणे नमः (९) ॐ विष्णवे नमः (१०) ॐ ब्रह्मणे नमः
(११) ॐ रुद्राय नमः (१२) ॐ मार्त्तण्डाय नमः
ॐ मन्त्रैर्द्वादशभिर्देवि पूजयेत्प्रतिमां ततः ।
धूपदीपादिभिश्चैव ताम्बूलैश्च विधानतः ॥ १६ ॥
पूजितां प्रतिमां दद्याद् ब्राह्मणाय वराय च ।
दासीं दासं धनं धान्यं ब्राह्मणाय प्रदापयेत् १७
अश्वदानं रथं वस्त्रं पात्राणि विविधानि च ।
शय्यादिकं वरारोहे वित्तशाठ्यं न कारयेत् १८
एवंकृते न सन्देहश्चिरंजीविसुतं लभेत् ।
पूर्वजन्मकृतं पापं क्षयं याति न चान्यथा १९
सप्तम्यां रवियुक्तायां व्रतं कुर्यात्सुरेश्वरि ।

पापं व्याधिः क्षयं याति ज्वरः क्वापि न जायते २०
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
पुनर्वसुनक्षत्रस्य चतुर्थचरणप्रायश्चित्त-
कथनं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

अथ द्वात्रिंशोऽध्यायः ।

शिव उवाच ।

पापेन जायते व्याधिः पापेनैवासुतो भवेत् ।
पापेन जायते मूर्खः पापेनैव दरिद्रता ॥ १ ॥
पूर्वजन्मकृतं यत्तु पापं वा पुण्यमेव वा ।
इहजन्मनि भो देवि भुज्यते सर्वदेहिभिः ॥ २ ॥
पुण्येन जायते विद्या पुण्येन जायते सुतः ।
पुण्येन सुन्दरी नारी पुण्येन लभते श्रियम् ॥ ३ ॥
अथातः संप्रवक्ष्यामि पुष्यनक्षत्रजं फलम् ।
तत्सर्वं शृणु मे देवि यत्कृतं पूर्वजन्मनि ॥ ४ ॥
मध्यदेशे वरारोहे धनाढ्यो बल्लवोऽवसत् ।

हंसकेतुरिति ख्यातो भार्या तस्य तु केकयी ॥ ५ ॥
बहवो वृषभास्तस्य महिष्यो गास्तथा प्रिये ।
धर्मकर्मरतः शूद्रो विक्रयेद्गोवृषादिकम् ॥ ६ ॥
घृततक्रस्य भो देवि विक्रयं कुरुते सदा ।
एको वैश्यो धनाढ्यो वै तस्य मित्रं तदाभवत् ॥७॥
महाप्रीतिस्तयोर्जाता बहुवर्षप्रमाणतः ।
एकदा तु निशायां वै शूद्रेण वणिकः प्रिये ॥ ८ ॥
शुभरत्नादिलाभाय कटारेण तदा हतः ।
द्रव्यं सर्वं गृहीतं तु भूमिमध्ये तथा धृतम् ॥ ९ ॥
तन्मध्ये तु षडंशस्य व्ययं कुर्याद् दिने दिने ।
बहुवर्षगते काले शूद्रो मृत्युवशोभवत् ॥ १० ॥
पातयामास घोरे तु यमदूतो यमाज्ञया ।
षष्टिवर्षसहस्राणि भुक्त्वा नरकयातनाम् ॥ ११ ॥
ततो जातो महादेवि राक्षसो गहने वने ।
पुनः शृगालयोनिं च मानुषत्वं भवेत्पुनः ॥ १२ ॥
धनधान्यसमायुक्तो भार्या जाता तु या पुरा ।

वन्ध्यारोगसमायुक्ता कन्यका चैव जायते ॥१३॥
तस्य रोगो भवेत्पश्चाद्विविधश्च वयोन्तरे।
पूर्वजन्मनि भो देवि मित्रञ्च निहतं यतः ॥ १४ ॥
तत्पापेन च भो देवि पुत्रो नैवोपजायते।
बहुपुत्रप्रघाती च कम्परोगी प्रजायते ॥ १५ ॥
तस्य शान्तिं प्रवक्ष्यामि शृणु देवि सुशोभने।
षडंशं वै ततो दानं विदुषे ब्राह्मणाय च ॥ १६ ॥
गां तथा महिषीं दद्याद्विधिवद्भोजयेद् द्विजान्।
गायत्रीजातवेदाभ्यां द्विलक्षं च जपं ततः ॥ १७ ॥
कुण्डे कोणत्रये चैव होमं वै कारयेत्ततः।
जपस्यैव दशांशेन हवनादिकमाचरेत् ॥ १८ ॥
ततो वै प्रतिमां कुर्याद्वैश्यस्यैव विधानतः।
द्वादशेन पलेनैव सुवर्णस्य विशेषतः ॥ १९ ॥
पूजयेत्पूर्वजैर्मन्त्रैस्ततो विप्राय दापयेत्।
एवंकृते न संदेहः पुत्रो भवति नान्यथा ॥ २० ॥

सर्वरोगः क्षयं याति नात्र कार्या विचारणा ॥२१॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
पुष्यनक्षत्रस्य प्रथमचरणप्रायश्चित्त-
कथनं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥

अथ त्रयस्त्रिंशोऽध्यायः ।

शिव उवाच ।

अथातः संप्रवक्ष्यामि शृणु देवि विशेषतः ।
आदौ पापफलं देवि भुज्यते देवमानुषैः ॥ १ ॥
पश्चात्पुण्यफलं देवि परलोक इहापि वा ।
एकः शिल्पकरो देवि वसते हस्तिनापुरे ॥ २ ॥
हेमदास इति ख्यातो भार्याद्वयसमन्वितः ।
प्रत्यहं शिल्पकार्यं च करोति व्ययकारणात् ॥३॥
काशीतः पश्चिमे देवि स्वकर्मनिरतः सदा ।
अश्वत्थानां च वृक्षाणां छेदनानि चकार सः ॥४॥
एवं बहुगते काले शिल्पकारी मृतः प्रिये ।
नरके तस्य पतनं षष्टिवर्षसहस्रकम् ॥ ५ ॥

पत्न्या सह वरारोहे यातो योनिं विडालकाम् ।
विडालयोनिं वै भुक्त्वा वृषयोनिं ततोभवत् ॥ ६ ॥
पुनः स्यान्मानुषो देवि मध्यदेशे सुपूजितः ।
पूर्वजन्मनि वृक्षाणां छेदनं प्रत्यहं कृतम् ॥ ७ ॥
तेन पापेन भो देवि पुत्रो नैव प्रजायते ।
कन्यकाश्चैव सञ्जाताः स्त्रिया रोगः सुदारुणः॥८॥
शरीरे महती पीडा रात्रौ निद्रा न लभ्यते ।
कन्यकायाश्च वैधव्यं वृक्षच्छेदनतः प्रिये ॥ ९ ॥
तस्य शान्तिं प्रवक्ष्यामि ततः पापनिवर्त्तनम् ।
चतुर्थांशं तु वै दानं ब्राह्मणाय प्रदापयेत् ॥ १० ॥
दशायुतं जपं कुर्याद्गायत्रीमूलमन्त्रतः ।
पलपञ्चसुवर्णस्य वृक्षं वै कारयेत्ततः ॥ ११ ॥
पूजयित्वा यथान्यायं वृक्षं विप्राय दापयेत् ।
पञ्चधेनुं तथा दद्यात् वृषं चाभरणान्वितम् ॥१२॥
कूष्माण्डं नारिकेरं च पञ्चरत्नसमन्वितम् ।
गङ्गामध्ये च दातव्यं ततः पापक्षयो भवेत् ॥१३॥

सर्वव्याधिः क्षयं याति कन्यका च सुखान्विता ।
पुत्रश्चैव प्रजायेत नात्र कार्या विचारणा ॥ १४ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
पुष्यनक्षत्रस्य द्वितीयचरणप्रायश्चित्त-
कथनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

अथ चतुस्त्रिंशोऽध्यायः ।

शिव उवाच ।

मध्यदेशे वरारोहे लोहकारश्च तस्थिवान् ।
गौरेका लोहकारेण बाल्यतः पालिता शिवे ॥ १ ॥
एकस्मिन्दिवसे पङ्के मग्ना च गौर्वराभवत् ।
तच्छ्रुत्वा लोहकारस्तु न गतस्तत्र वै शिवे ॥ २ ॥
मृता रात्रौ तदा देवि पङ्के वै तरणी च सा ।
बहुघस्रात्ततो देवि मरणं तस्य वै गृहे ॥ ३ ॥
तस्य पत्नी सती जाता सत्यलोकं गतौ च तौ ।
दशलक्षमितं वर्षं सत्यलोके च तस्थिवान् ॥ ४ ॥
पुनः पुण्यक्षये जाते मर्त्यलोके तदाभवत् ।

मानुषः शुभजन्मा च धनधान्यसमन्वितः ॥ ५ ॥
पत्न्या सह वरारोहे ब्राह्मणानां च सेवकः ।
पूर्वजन्मनि देवेशि पङ्के मग्ना च यत्र गौः ॥ ६ ॥
न गतस्तत्र भो देवि तस्मात्पुत्रो न जायते ।
कन्या जाता पुरा देवि तस्या मृत्युश्च जायते ॥७॥
तदर्थं वाटिकां कूपं पथिमध्ये च कारयेत् ।
कुर्याच्चैव तुलादानं पात्राणि विविधानि च ॥ ८ ॥
गोयुग्मं घृतकुम्भं च ब्राह्मणाय प्रदापयेत् ।
गायत्रीमन्त्रजाप्यं च लक्षमेकं तु कारयेत् ॥ ९ ॥
होमं कुर्यात्ततो देवि तिलधान्यादितण्डुलैः ।
ब्राह्मणान्भोजयेद्देवि शतसंख्यान्वराननने ॥ १० ॥
एवं कृत्वा वरारोहे पुत्रो भवति नान्यथा ।
वन्ध्यात्वं नाशमायाति व्याधिनाशोभवेद्ध्रुवम् ११

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
पुष्यनक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं
नाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

अथ पञ्चत्रिंशोऽध्यायः ।

शिव उवाच ।

अयोध्यानगराद्देवि पूर्वे क्रोशचतुर्दशे ।
तत्राप्येकोवसच्छाककारो वैडुम्बराभिधः ॥ १ ॥
चिन्ता तस्याभवत्पत्नी पतिसेवापरायणा ।
शाककारो महासाधुर्विष्णुभक्तिरतः सदा ॥ २ ॥
गुरुसेवारतो नित्यं प्रत्यहं शाकविक्रयी ।
एका मार्जारिका श्वेता पालिता तेन वै हता ॥ ३ ॥
प्राप्तो वै तमसातीरे तीर्थे मृत्युर्मम प्रिये ।
विष्णुभक्तिरतो यस्मात्तीर्थे मृत्युफलादपि ॥ ४ ॥
न गतो यमलोकं तु भुक्त्वा स्वर्गं तु चाभवत् ।
षष्टिवर्षसहस्राणि पुनः पुण्यक्षये यदा ॥ ५ ॥
तदा वृषभयोनिश्च मृत्युलोकेऽभवत्पुनः ।
मानुषत्वं ततो यातो धनधान्यसमन्वितः ॥ ६ ॥
सुन्दरो विष्णुभक्तित्वात्पुत्रेण रहितः शिवे ।
गर्भाणां पतनं यातं यतो मार्जारिका हता ॥ ७ ॥

सगर्भा च तदा देवि ततो गर्भो विनश्यति ।
तस्य शान्तिं प्रवक्ष्यामि शृणु त्वं गिरिजे वरे ॥८॥
गृहवित्तार्द्धभागं वै ब्राह्मणाय प्रदापयेत् ।
तदा पापं क्षयं याति नात्र कार्या विचारणा ॥ ९ ॥
शिवार्चनं कारयित्वा रौप्यमार्जारिकां तथा ।
पलानां सप्तकैः कुर्यात्सगर्भां विमलां शुभाम्॥१०॥
पूजयित्वा ततो देवि ततो दद्याद् द्विजन्मने ।
लक्षजाप्यं ततो देवि त्र्यम्बकेण विशेषतः ॥११॥
ततो भवति वै शुद्धः पूर्वपापान्न संशयः ।
पुत्रो भवति वै देवि रोगाणां संक्षयस्तथा ॥ १२ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
पुष्यनक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं
नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

अथ षट्त्रिंशोऽध्यायः ।

शिव उवाच ।

अथातः संप्रवक्ष्यामि शृणु देवि सुशोभने ।

जातस्य सर्पनक्षत्रे प्रथमे चरणे शुभे १
पुरी काशी समाख्याता त्रैलोक्ये देवि पूजिता।
तस्यास्तु पश्चिमे भागे क्रोशपञ्चदशे मिते ॥ २ ॥
माण्डव्यस्य पुरे शुभ्रे वसन्ति बहवो जनाः।
तन्मध्ये शूद्र एको हि प्राकरोल्लवणं सदा ॥ ३ ॥
डिण्डिभेति समाख्यातो गौरी तस्य वरानना।
बह्वर्थं संचितं तेन न दानमकरोत्क्वचित् ॥ ४ ॥
एकदा दैवयोगेन ब्राह्मणानां निमन्त्रणम्।
भोजनं प्रददौ कृत्वा दक्षिणां वै समर्पयेत् ॥ ५ ॥
गामेकां कपिलां दत्त्वा भूषितां स्वपुरोधसे।
ब्राह्मणोकथयत्कश्चित् शूद्रं प्रति तदा प्रिये ॥६॥
अहं ग्रामस्य वै पूज्यो मदीया गौः कथं प्रभो।
पुरोहिताय दत्तासि प्राणं ते च ददाम्यहम् ॥ ७ ॥
इति श्रुत्वा वचस्तस्य सोवदद्ब्राह्मणं प्रति।
क्रोधेन महता देवि ब्राह्मणाय तदाधमः ॥ ८ ॥
तदा क्रोधेन महता स शूद्रोऽताडयद् द्विजम्।

मरणं तस्य वै जातं तद्धस्ताद्वै वरानने ॥ ९ ॥
ततो बहुतिथे काले सस्त्रीकः प्रमृतः खलः ।
पातनं तस्य वै जातं कर्मपाके तदा खलु ॥ १० ॥
निक्षिप्य यमदूतेन तत्रैव च यमाज्ञया ।
पञ्चलक्षं ततो वर्षं कष्टं दत्तं मुहुर्मुहुः ॥ ११ ॥
तत्र जाता महापीडा नरकान्निःसृतस्ततः ।
सर्पयोनिं स वै यातो गृध्रयोनिस्ततोभवत् ॥ १२ ॥
मानुषत्वं ततो लब्धं मध्यदेशे वरानने ।
पूर्वपापाच्च भो देवि पुत्रो नैव प्रजायते ॥ १३ ॥
शरीरे रोग उत्पन्नो विग्रहस्तु वरानने ।
प्रायश्चित्तं प्रवक्ष्यामि पूर्वकिल्बिषशान्तये ॥१४॥
गायत्रीसूर्यमन्त्राभ्यां पञ्चलक्षजपं शिवे ।
करोतु विधिवद्भक्त्या तदा वै वरवर्णिनि ॥ १५ ॥
होमं कारयितुं त्वाज्यं कुण्डे चाष्टदले तथा ।
दशांशतर्पणं तस्य मार्जनं तद्दशांशतः ॥ १६ ॥
प्रतिमां रुचिरां कृत्वा सुवर्णस्य महेश्वरि ।

पलषष्ट्या: प्रयत्नेन पूजयित्वा यथाविधि ॥ १७ ॥
मन्त्रेणानेन विधिना गन्धधूपादिभिस्तथा ।
दुर्गे देवि नमस्तुभ्यं सर्वसिद्धिप्रदेश्वरि ॥ १८ ॥
इमां पूजां गृहीत्वा तु मम कार्यं प्रसाधय ॥१९ ॥

मन्त्रः । ॐ ह्रीं महेश्वर्यै नमः । ॐ दुर्गायै नमः । ॐ सर्वकामप्रदे नमः । ॐ ईश्वर्यै नमः । ॐ त्र्यम्बकाय नमः । ॐ ब्रह्मणे नमः । ॐ विष्णवे नमः । ॐ सर्वेश्वराय नमः । ॐ भैरवाय नमः । ॐ मार्त्तण्डाय नमः ॥

एतैश्च दशभिर्मन्त्रैः प्रतिमां पूजयेत्प्रिये ।
ब्राह्मणाय ततो दद्याद्भक्तियुक्तेन चेतसा ॥ २० ॥
पञ्चपात्रं ततो दद्यात् तदुद्देशेन पार्वति ।
तिलदानं ततो दद्याद्वस्त्रदानं यथाविधि ॥ २१ ॥
कूष्माण्डं नारिकेरं च पञ्चरत्नसमन्वितम् ।
गङ्गामध्ये प्रदातव्यं पूर्वपापप्रणाशनम् ॥ २२ ॥

रोगात्प्रमुच्यते देवि वन्ध्यापि पुत्रमाप्नुयात् ॥२३॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
आश्लेषानक्षत्रस्य प्रथमचरणप्रायश्चित्त-
कथनं नामषट्त्रिंशोऽध्यायः ॥ ३६ ॥

अथ सप्तत्रिंशोऽध्यायः ।

शिव उवाच ।

अलर्कस्य पुरे देवि शूद्र एकोऽवसत्पुरा ।
शूद्राचाररतो नित्यं विक्रयं कुरुते सदा ॥ १ ॥
गोमहिष्यादिव्यापारैर्व्ययं कुर्याद्दिने दिने ।
गोधनानि बहून्येव तेषां रक्षा न जायते ॥ २ ॥
दुर्लभ इति विख्यातो तत्राज्ञानी सदाभवत् ।
एकदा तस्य गोवृन्दे वने तिष्ठति भोऽनघे ॥ ३ ॥
वृष्टिस्तत्र महाजाता गावश्च पीडिता भृशम् ।
तासां मध्ये भूरि गावो वर्षणेन मृताः पुरा ॥ ४ ॥
रक्षां शूद्रो नाकरोत्स तृणैराच्छादनादिभिः ।
एवं बहुगते काले शूद्रः पापी मृतो यदा ॥ ५ ॥

नरके पातयामास यमदूतो यमाज्ञया ।
बहुवर्षसहस्राणि भुक्त्वा नरकजं फलम् ॥ ६ ॥
नरकान्निर्गतो देवि गजयोनिमवाप्तवान् ।
गजयोनिं ततो भुक्त्वा मानुषत्वं ततोगमत् ॥ ७ ॥
स्वकर्मणा परित्यागं यतोऽकार्षीद्भवां पुरा ।
ततः कर्मफलाद्देवि नैव पुत्रः प्रजायते ॥ ८ ॥
कृतं दानं पुरा देवि सर्वपर्वणि चाञ्जसा ।
तेन पुण्येन भो देवि धनधान्यगजादिकम् ॥ ९ ॥
गोसंग्रहः कृतः पूर्वं मृतस्तृणकणं विना ।
तेन पापेन भो देवि महाव्याधिः प्रजायते ॥ १० ॥
तस्य शान्तिं प्रवक्ष्यामि शृणु देवि सुशोभने ।
ब्राह्मणाय दशांशं च दानं दद्यात्सुरप्रिये ॥ ११ ॥
गायत्रीलक्षजाप्येन जपं कुर्यात्प्रसन्नधीः ।
दशांशं हवनं देवि मार्जनं तर्पणं तथा ॥ १२ ॥
दशवर्णास्ततो दद्याद्ब्राह्मणाय वरानने ।
एवंकृते न संदेहो वरः पुत्रः प्रजायते ॥ १३ ॥

रोगाः सर्वे क्षयं यान्ति नात्र कार्या विचारणा॥१४॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे आश्लेषानक्षत्रस्य द्वितीयचरणप्रायश्चित्त-कथनं नाम सप्तत्रिंशोऽध्यायः॥ ३७॥

अथाष्टत्रिंशोऽध्यायः।

शिव उवाच।

गङ्गाया उत्तरे कूले मालाकारोऽवसत्पुरा।
डेलचन्द्रेति विख्यातो महाज्ञानी गुणाकरः॥ १॥
स्वकर्मनिरतो नित्यं द्विजसेवासु तत्परः।
तस्य पत्नी विशालाक्षि नाम्ना चन्द्रावती शुभा॥२॥
गुरुदास इति ख्यातो वैश्यवर्गेषु पूजितः।
आसीत्तस्मै तदा तेन स्वर्णं दत्तं प्रियाय वै॥ ३॥
लक्षत्रयं स्थितं स्वर्णं तस्य वैश्यपतेः प्रिये।
मालाकारेण तत्सर्वं भूमौ स्थाप्य तदा प्रिये॥४॥
स्वयं गतः स वैश्येन सार्द्धं वेण्यां तदा प्रिये।
माघे नियमतः स्नानं कृते ताभ्यां यथाविधि॥५॥

शूद्रस्तु स्वगृहं प्राप्तो वैश्यः काश्यां समागतः ।
तत्र काश्यां विशालाक्षि मरणं तस्य चाभवत्॥६॥
अविमुक्ते महातीर्थे देवदानवपूजिते ।
मम पार्श्वे समायातो धर्मक्षेत्रप्रभावतः ॥ ७ ॥
मालाकारस्तु तत्स्वर्णं भुक्त्वा पुत्रस्त्रिया युतः ।
बहुवर्षगते काले मरणं तस्य चाभवत् ॥ ८ ॥
तदा गन्धर्वनगरे बहुवर्षसहस्रकम् ।
पत्न्या सह वरारोहे भुक्तं वै स्वर्गजं फलम् ॥ ९ ॥
ततो बहुगते काले मानुषत्वमवाप्तवान् ।
धनाढ्यो गुणवान्भोक्ता देवब्राह्मणतत्परः ॥ १० ॥
तस्य पत्नी विशालाक्षि पूर्वजन्मप्रसङ्गतः ।
पुनर्विवाहिता देवि पतिसेवासुतत्परा ॥ ११ ॥
पुष्पं च जायते देवि मासि मासि निरन्तरम् ।
पुत्रो न जायते देवि कन्यका खलु जायते ।
यतो वैश्यस्य वै स्वर्णं न दत्तं पूर्वजन्मनि ॥ १२ ॥
तत्कर्मणः फलाद्देवि पुत्रो नैव प्रजायते ।

तस्य शान्तिं प्रवक्ष्यामि शृणु देवि यथार्थतः १३
गृहद्रव्यषडंशेन पुण्यं कार्यं च कारयेत् ।
हेम्नो दशपलस्यापि वैश्यं कृत्वा प्रयत्नतः ॥ १४ ॥
पूजयित्वा विधानेन ब्राह्मणाय प्रदापयेत् ।
षडङ्गजातवेदानां पाठं वै कारयेत्ततः ॥ १५ ॥
जीर्णोद्धारं ततो देवि वापिकां कूपमेव च ।
एवं कृते न संदेहः पुत्रो भवति नान्यथा ॥ १६ ॥
रोगस्तस्य निवर्तेत धनं च बहु जायते ॥ १७ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे आश्लेषानक्षत्रस्य तृतीयचरणप्रायश्चित्त-कथनं नामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥

अथैकोनचत्वारिंशोऽध्यायः ।

शिव उवाच ।

अयोध्यानगरी श्रेष्ठा सर्वदेवसुपूजिता ।
यस्याः प्रवेशमात्रेण सर्वपापैः प्रमुच्यते ॥ १ ॥
तस्यास्तु पश्चिमे देवि योजनानां दशोपरि ।

लक्ष्मणाख्यं पुरं यत्र वसन्ति बहवो जनाः ॥ २ ॥
तन्मध्ये शूद्र एको हि कैवर्तो धनधान्यवान् ।
डालेति नाम विख्यातस्तस्य पत्नी च केशवी ॥३॥
तेन व्यापारतो देवि धनं च बहु संस्थितम् ।
मांसं प्रभुज्यते नित्यं मांसं हि बहुधा प्रियम् ॥ ४ ॥
निर्दयः सर्वजन्तूनां कच्छपानां विशेषतः ।
एवं बहुगते काले तस्य मृत्युरभूत्किल ॥ ५ ॥
यमदूतैर्महाघोरे निक्षिप्तश्च यमाज्ञया ।
षष्टिवर्षसहस्राणि भुक्त्वा नरकयातनाम् ॥ ६ ॥
नरकान्निःसृतो देवि दर्दुरत्वं तथा गतः ।
ऋक्षत्वं च ततो देवि मानुषत्वं ततोलभत् ॥ ७ ॥
पाण्डुरोगेण संयुक्तो वंशो नैव तु जीवति ।
कन्याश्च बहवो जाता विधवा व्यभिचारिकाः ॥८॥
अपत्यानां निरोधश्च पुत्रत्वसमये सति ।
अस्य पुण्यं प्रवक्ष्यामि यथा पापात्प्रमुच्यते ॥ ९ ॥
षडंशं ब्राह्मणे दानं श्रीविष्णोः पूजनं तथा ।

विष्णोरराटमन्त्रेण लक्षजाप्यं च कारयेत् ॥१०॥
एवंकृते न संदेहो वंशो भवति नान्यथा ।
रोगाश्च विलयं यान्ति नात्र कार्या विचारणा ११

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे आश्लेषानक्षत्रस्य चतुर्थचरण प्रायश्चित्तकथनं नामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

अथ चत्वारिंशोऽध्यायः ।

शिव उवाच ।

पुरा देवि शुभं ख्यातं पुरं मङ्गलनामकम् ।
तत्र वैश्यो वसत्येको धनधान्यसमन्वितः ॥ १ ॥
तस्य नाम समाख्यातं मङ्गलं देवि वै शुभम् ।
तस्य पत्नी विशालाक्षी सुन्दरी सुखदायिनी ॥२॥
विष्णुभक्तिरतो नित्यं गुरुब्राह्मणसेवकः ।
आचारे नियतश्चैव क्रयविक्रयतत्परः ॥ ३ ॥
एकदा तु गृहे देवि मित्रं तस्य समागतम् ।

आदरं बहुधा कृत्वा भोजयामास शास्त्रतः ॥ ४ ॥
स्वर्णदानं ततो लक्षमुद्रादानं तु तत्प्रिये ।
दत्तं वैश्येन भो देवि ब्राह्मणाय स्वशान्तये ॥ ५ ॥
ब्राह्मणेनापि तत्सर्वं स्थापितं तस्य वै गृहे ।
ततोऽगात्तीर्थयात्रार्थं वाराणस्यां वरानने ॥ ६ ॥
तस्य मृत्युरभूद्देवि काश्यां चैव स्वकर्मतः ।
बहुकाले गते देवि वैश्यो दारिद्र्यपीडितः ॥ ७ ॥
पुत्रदारैश्च संयुक्तस्तस्य द्रव्यं तदा प्रिये ।
भुक्तं सर्वं तदा देवि स्वदत्तं चैव पुण्यदम् ॥ ८ ॥
वृद्धत्वे च पुनर्जाते तस्य मृत्युरभूत्किल ।
अयोध्यामरणात्तस्य स्वर्गवासस्ततोऽभवत् ॥ ९ ॥
बहुवर्षसहस्राणि विष्णुलोके वरानने ।
भुक्त्वा बहुविधं भोगं ततः पुण्यक्षयेऽनघे ॥ १० ॥
मृत्युलोके भवेज्जन्म धनधान्यसमन्वितः ।
विष्णुपूजारतो नित्यं ब्राह्मणे भक्तिरुत्तमा ॥ ११ ॥
मित्रद्रव्यं स्वयं दत्तं भुक्तं तेन ततः प्रिये ।

पुत्रोत्पत्तिः प्रथमतस्तस्य वै मरणं भवेत् ॥ १२ ॥
पुनः पुत्रो न जायेत काकवन्ध्या ततः प्रिया।
शरीरे कफवातादिरोगाश्च विविधास्तथा ॥१३॥
वृद्धत्वं च तथा तस्य जायते नात्र संशयः।
तत्पापशमनार्थं च पुण्यं शृणु वरानने ॥ १४ ॥
षडंशं च ततो दानं ब्राह्मणाय वरानने।
गायत्रीमन्त्रजाप्यं च लक्षमेकं प्रयत्नतः ॥ १५ ॥
हवनं विधिवत्कुर्यात्तर्पणं मार्जनं तथा।
गामेकां कपिलां दद्यात्स्वर्णशृङ्गीं सहाम्बराम् १६॥
दद्यात्प्रयत्नतो देवि ब्राह्मणाय महात्मने।
तिलधेनुं ततो दद्यात्पात्रं वस्त्रं तथा प्रिये ॥ १७ ॥
हरिवंशश्रुतिर्ब्रह्मदम्पत्योः पूजनं चरेत्।
एवं कृते ततो देवि पुनः पुत्रः प्रजायते ॥ १८ ॥
रोगाः सर्वे क्षयं यान्ति नात्र कार्या विचारणा॥१६॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
मघानक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं
नाम चत्वारिंशोऽध्यायः ४०

अथैकचत्वारिंशोऽध्यायः ।

शिव उवाच ।

अयोध्यानगराद्देवि योजनोपरि वल्लभे ।
दक्षिणे नन्दिनि ग्रामे वसन्ति बहवो जनाः ॥ १ ॥
द्विजस्तत्र वसत्येको मद्यवेश्यारतः सदा ।
परस्त्रीलम्पटो नित्यं मद्यमांसरतस्तदा ॥ २ ॥
नामतो मित्रशर्मेति तस्य पत्नी तु कर्कशा ।
प्रत्यहं द्यूतकरणे व्ययं कुर्याद्दिने दिने ॥ ३ ॥
एवं बहुगते काले तस्य मृत्युरभूत्पुरा ।
पश्चान्मृता तु तत्पत्नी कर्कशा दुःखदायिनी ॥ ४ ॥
यमस्य किङ्करैरेव निक्षिप्तो नरकार्णवे ।
सप्ततिर्वै सहस्राणि वर्षाणि सुरवल्लभे ॥ ५ ॥
भुक्तं दुःखं नरकजं दम्पतीभ्यां तदा शिवे ।
ततः पापक्षये देवि शुनो योनिरभूत्पुरा ॥ ६ ॥
शुनो योनिं ततो भुक्त्वा शूकरो निर्जने वने ।
मानुषस्य पुनर्योनिं मध्यदेशे ततोऽलभत् ॥ ७ ॥

नन्दिग्रामफलाद्देवि धनधान्यसमन्वितः ।
परस्त्रीलम्पटाद्देवि पादपीडा प्रजायते ॥ ८ ॥
मद्यपानफलाद्देवि गर्भपातः पुनः पुनः ।
बह्व्यः कन्याः प्रजाताश्च बहुस्त्रीगमनात्प्रिये ॥९॥
पुत्रस्य मरणं देवि जातं वेश्याऽतिसङ्गमात् ।
पूर्वजन्मकृतं पापं पुण्यं च गिरिजे वरे ॥ १० ॥
मानुषैर्भुज्यते सर्वं मृत्युलोके सुरेश्वरि ।
अस्य शान्तिं प्रवक्ष्यामि यथार्थं शृणु भामिनि ।
गृहवित्ताष्टमं भागं ब्राह्मणाय समर्पयेत् ॥ १२ ॥
वापीकूपतडागेषु जीर्णोद्धारः प्रयत्नतः ।
माघकार्त्तिकवैशाखे श्रावणे च विशेषतः ॥ १३ ॥
प्रत्यहं भोजयेद्विप्राञ्छ्रोत्रियान्वेदपारगान् ।
गायत्रीजातवेदाभ्यां द्विलक्षं जपमाचरेत् ॥ १४ ॥
जपतो हवनं तद्वत्तर्पणं मार्जनं तथा ।
महाभारतमाख्यानं श्रुत्वा पापं व्यपोहति ॥१५॥
दशवर्णाः प्रदातव्याः पूर्वपापविशुद्धये ।

एवं कृते वरारोहे सर्वरोगः प्रणश्यति ॥ १६ ॥
पुत्रो भवति भो देवि वन्ध्यात्वं च प्रणश्यति ।
काकवन्ध्या च या नारी पुनः पुत्रमवाप्नुयात्॥१७॥
कन्यका नैव जायन्ते धनवृद्धिर्भवेत्किल ।
पूर्वजन्मकृतं पापं क्षयं याति न चान्यथा ॥ १८ ॥
इहजन्मनि शं भुंक्ते पुनः पापं न बाधते ॥ १९ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे मघानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नामैकचत्वारिंशोऽध्यायः ४१ ॥

अथ द्विचत्वारिंशोऽध्यायः ।

शिव उवाच ।

अयोध्यायां विशालाक्षि कुलालो वसति प्रिये ।
मथुराग्राममध्ये वै स्वकर्मनिरतः सदा ॥ १ ॥
पात्रं वै मृन्मयं देवि प्रकरोति तदा प्रिये ।
तस्य मित्रं समायातो ब्राह्मणो वेदपारगः ॥ २ ॥
तस्य स्त्री च महादुष्टा ब्राह्मणी व्यभिचारिणी ।

कुलालेनाभवत्प्रीतिर्मैथुनं प्रकरोति सा ॥ ३ ॥
ब्राह्मण्यां गमनं नित्यं बहुवर्षे निरन्तरम् ।
एवं बहुगते काले समतीते सुरेश्वरि ॥ ४ ॥
कुलालस्य ततो मृत्युर्वृद्धे जाते सुरेश्वरि ।
पश्चात्तस्य मृता पत्नी या पुरा व्यभिचारिणी ॥५॥
यमदूतैर्महाघोरैः कर्दमे नरके प्रिये ।
यमाज्ञया च निक्षिप्तो वर्षं लक्षत्रयं शुभे ॥ ६ ॥
पतिव्रता समायाता लक्षत्रयगते सति ।
नरकाब्धेः समुद्धृत्य स्वपतिं च ततः प्रिये ॥ ७ ॥
सत्यलोके समायाता स्वपत्या सह भामिनी ।
भुक्त्वा लक्षत्रयं देवि भोगांश्च विविधानपि ॥ ८ ॥
ततः पुण्यक्षये जाते धवेन सह शोभने ।
मर्त्यलोके ततो जातो धनधान्ययुतस्तदा ॥ ९ ॥
पुत्रकन्याविहीनश्च मृतवत्सत्वमाप्तवान् ।
ब्राह्मण्यां गमनाद्देवि बहुरोगश्च जायते ॥ १० ॥
अथ शान्तिं प्रवक्ष्यामि शृणु त्वं गिरिजे शुभे ।

सर्वस्वदानं कर्तव्यं रुद्रंमंत्रजपं तथा ॥ ११ ॥
पूजा कार्या पार्थिवानां वाटिकारोपणं तथा ।
हरिवंशश्रुतिः कार्या भूमिदानं तथैव च ॥ १२ ॥
गायत्रीमूलमंत्रेण लक्षं जाप्यं तथा प्रिये ।
होमं च कारयेद्देवि तिलधान्यादितंडुलैः ॥ १३ ॥
कुण्डे कुर्याद् द्विजद्वारा चतुष्कोणे सुरेश्वरि ।
दशांशं हवनं देवि विधिवत्पापशुद्धये ॥ १४ ॥
दशवर्णास्ततो दद्यात्स्वर्णनिष्कं चतुष्टयम् ।
ब्राह्मणान् भोजयेच्छुद्धान्षष्टिपायसलड्डुकैः॥१५॥
भूमिदानं ततः कुर्यात्तिलं दद्यात्प्रयत्नतः ।
एवंकृते न संदेहो वंशो भवति नान्यथा ॥ १६ ॥
सर्वरोगाः क्षयं यान्ति न च कन्यां प्रसूयते ।

१—ओं आवोराजानमध्वरस्यरुद्रं होतारं सत्ययजं रादस्योः । अग्निंपुरातनयित्नोराचित्ताद्धिरण्यरूपमवसेकृणुध्वम् ॥ इति सामः ॥

यह रुद्र मंत्र है ॥

काकवंध्या लभेत्पुत्रं मृतवत्सा च पुत्रिणी ॥ १७॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
मघानक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं
नाम द्विचत्वारिंशोऽध्यायः ४२ ॥

अथ त्रयश्चत्वारिंशोऽध्यायः ।

शिव उवाच ।

काञ्चीपुर्यां महादेवि वैश्य एकोऽवसत्पुरा ।
मेदसिन्द इति ख्यातस्तस्य स्त्री पालिका शुभा १
अश्वादिविक्रयं देवि छागपद्व्यादिकं तथा ।
प्रत्यहं क्रियते देवि बहुद्रव्यस्य सञ्चयम् ॥ २ ॥
न देवान्मन्यते देवि पितॄन्नैव च मन्यते ।
बहुष्वहस्सु गच्छत्सु प्रमृतौ पितरौ ततः ॥ ३ ॥
स तयोर्नाकरोच्छ्राद्धं यत्कर्तव्यं सुतैः प्रिये ।
ततो बहुदिने याते वृद्धे सति वरानने ॥ ४ ॥
मरणं तस्य वै जातं वैश्यस्य कृपणस्य च ।
यमाज्ञया तु दूतेन कुम्भीपाके सुदारुणे ॥ ५ ॥

निक्षिप्तं शृङ्खलैर्बद्ध्वा युगपञ्चदशं समाः ।
भुक्त्वा नरकजं दुःखं महाकृमिसमाकुलम् ॥ ६ ॥
नरकान्निःसृतो देवि महिषत्वं ततोऽलभत् ।
पुनर्वै व्याघ्रयोनिश्च मूषयोनिस्ततोऽभवत् ॥ ७ ॥
काकयोनिं ततो भुक्त्वा गजयोनिस्ततोऽभवत् ।
शुभे देशे विशालाक्षि धनधान्यसमन्वितः ॥ ८ ॥
व्याधिग्रस्तोऽभवद्देवि पुत्रकन्याविवर्जितः ।
काकवन्ध्या भवेन्नारी मृतवत्सा ह्यपुत्रिणी ॥ ९ ॥
पूर्वजन्मकृतं पापं यतः शान्तिमवाप्नुयात् ।
तत्सर्वं शृणु मे देवि विस्तरेण समन्वितम् ॥ १० ॥
प्रयागे नियतः स्नायी प्रतिमाघं भवेद्यदा ।
गायत्रीजातवेदाभ्यां दशायुतजपं तथा ॥ ११ ॥
भूमिदानं च वै कृत्वा ततः पुत्रः प्रजायते ।
वन्ध्यात्वं शमनं याति काकवन्ध्यात्वमप्यथ॥ १२॥
मृतवत्सा लभेत्पुत्रं चिरंजीविनमुत्तमम् ।

सर्वे रोगाः क्षयं यान्ति नात्र कार्या विचारणा १३

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
मघानक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं
नाम त्रयश्चत्वारिंशोऽध्यायः ४३ ॥

अथ चतुश्चत्वारिंशोऽध्यायः ।

शिव उवाच ।

सौराष्ट्रविषये देवि शोभनं नाम वै पुरम् ।
तत्र क्षत्री वसत्येको धनधान्यसमन्वितः ॥ १ ॥
मोहनेति च विख्यातस्तस्य पत्नी सती शुभा ।
वैश्यवृत्तिरतो नित्यं व्यापारं कुरुते सदा ॥ २ ॥
व्यापारार्थं ततो देवि वृषभा बहुपालिताः ।
द्वौ वृषौ योजितौ देवि कूपे वै पतितौ प्रिये ॥ ३ ॥
मृतौ तौ रात्रिकालेपि जगाम स तदा न च ।
पापं च स न जानाति गर्वद्वारा वरानने ॥ ४ ॥
यत्किञ्चित्क्रियते कर्म शुभं तु कलुषं बहु ।
गुणाः स्वल्पा बह्वगुणाः मोहनं नाम क्षत्रिणः ॥५॥

ततो बहुगते काले मरणं तस्य चाभवत् ।
पश्चान्मृता तस्य पत्नी महालुब्धा वरानने ॥ ६ ॥
निक्षिप्तो नरके घोरे यमदूतैर्यमाज्ञया ।
षष्टिवर्षसहस्राणि भुक्त्वा नरकयातनाम् ॥ ७ ॥
पुनः सरटयोनिश्च वृषयोनिस्ततोऽभवत् ।
मानुषत्वं ततो देवि मध्यदेशे वरानने ॥ ८ ॥
वृषयोश्च पुरा मृत्युर्न कृतं पापमोचनम् ।
तस्माद् व्याधिः समुत्पन्ना पूर्वकर्मप्रयत्नतः ॥ ९ ॥
मुखरा याऽभवत्पत्नी पुरा च प्रबला प्रिये ।
पुनर्विवाहिता देवि तद्रूपा मुखरा तथा ॥ १० ॥
तत्पापशमनार्थाय षडंशं दानमाचरेत् ।
गायत्रीमूलमन्त्रेण पञ्चलक्षजपं यदा ॥ ११ ॥
ततः पापं क्षयं याति शीघ्रं पुत्रो भवेत्प्रिये ।
अपुत्रा मृतवत्सा च काकवन्ध्या च या शिवे १२
पुत्रिण्यश्चैव ताः सर्वा नात्र कार्या विचारणा ।

रोगाः सर्वे विनश्यन्ति शीघ्रमेव न संशयः ॥१३॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
पूर्वानक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं
नाम चतुश्चत्वारिंशोऽध्यायः ४४ ॥

अथ पञ्चचत्वारिंशोऽध्यायः ।

शिव उवाच ।

कर्णाटविषये देवि काष्ठकारोऽवसत् पुरा ।
छिनत्ति सर्वकाष्ठानि व्ययं कृत्वा दिने दिने ॥ १ ॥
एका वै गोत्रजा कन्या तस्यां च मैथुनं कृतम् ।
ततो बहुगते काले तस्य मृत्युरभूत्पुरा ॥ २ ॥
पश्चात्तस्य मृता नारी कुलटा व्यभिचारिणी ।
यमदूतैर्महाघोरैर्निक्षिप्तो नरकार्णवे ॥ ३ ॥
यमाज्ञया महादेवि भुक्त्वा नरकयातनाम् ।
षष्टिवर्षसहस्राणि नरके पच्यते च सः ॥ ४ ॥
कुक्कुटत्वं ततो जातं चक्रवाकस्ततोऽभवत् ।
मानुषत्वं ततो जातं देशे पूज्यतमे तथा ॥ ५ ॥

शूद्रसेवारतो नित्यं शूद्रस्नेहेन यन्त्रितः ।
पितुर्मातुर्भवेद्वैरं महिष्याः क्रयविक्रये ॥ ६ ॥
पूर्वजन्मनि भो देवि कृतं वृक्षस्य छेदनम् ।
तस्माद्रोगः समुत्पन्नः कटिशूलं निरन्तरम् ॥ ७ ॥
गोत्रकन्याभिगमनं यत्कृतं पूर्वजन्मनि ।
तेन पापेन भो देवि पुत्रस्य मरणं भवेत् ॥ ८ ॥
गर्भस्रावी ततो भार्या काकवन्ध्यात्वमाप्नुयात् ।
बह्व्यःकन्यास्ततो जाताः कष्टं प्राप्नोत्यहर्निशम् ९
अतः शान्तिं प्रवक्ष्यामि पूर्वपापविशुद्धये ।
गृहवित्ताष्टमं भागं ब्राह्मणाय समर्पयेत् ॥ १० ॥
गायत्रीलक्षजाप्येन गोदानेन विशेषतः ।
वाटिकारोपणेनापि गृहदानेन वै शिवे ॥ ११ ॥
रोगाः सर्वे क्षयं यान्ति नात्र कार्या विचारणा ।
पूर्वजन्मकृतं पापं क्षयं याति न संशयः ॥ १२ ॥
जायन्ते बहवः पुत्राः शूराः कीर्तिविवर्द्धनाः ।

कन्यका नैव जायन्ते काकवन्ध्या तु शाम्यति १३

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे पूर्वानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नाम पञ्चचत्वारिंशोऽध्यायः ४५ ॥

अथ षट्चत्वारिंशोऽध्यायः ।

शिव उवाच ।

सिंहले वै महाद्वीपे तत्र सिंहं पुरं शिवे ।
कायस्थो वैष्णवोप्येकष्टीकारामेति नामतः ॥ १ ॥
तस्य भार्या विशालाक्षी सूर्या नाम्नी शुभा सती ।
आतिथ्यकरणे शक्ता देवतात्यन्तपूजिका ॥ २ ॥
कार्त्तिके माघवैशाखे दीपदानं करोति सा ।
कदाचिद्दैवयोगेन तीर्थयात्रार्थमागता ॥ ३ ॥
स्वर्णकारो महादेवि बहुस्वर्णेन संयुतः ।
आगतः सिंहनगरे तत्र वासमकारयत् ॥ ४ ॥
प्रीतिः परस्परं चैव कायस्थस्वर्णकारयोः ।
स्वर्णकारस्य कन्यैका सुन्दरी कमलानना ॥ ५ ॥

कायस्थस्याभवद्भार्या दैवयोगात्तदा शिवे ।
स्वर्णकारस्य यत्सर्वं स्थितं तेन हृतं धनम् ॥ ६ ॥
द्रव्यक्षयमथो ज्ञात्वा स्वर्णकारो मृतः पुरा ।
पुत्रदारादिकं त्यक्त्वा कायस्थश्च तदा शिवे ॥ ७ ॥
तया सार्द्धं रमत्येको पापात्मा कमलानने ।
एवं बहुगते काले कायस्थोपि मृतः प्रिये ॥ ८ ॥
कुम्भीपाकेऽभवद्वासो वर्षलक्षत्रयं तथा ।
पुनः कर्मवशाद्देवि मृगयोनिस्ततोऽभवत् ॥ ९ ॥
मानुषत्वं वरारोहे पुनः प्राप्तो महीतले ।
धनधान्यसमायुक्तो वंशो नैव प्रजायते ॥ १० ॥
बहुरोगसमायुक्तो ज्वरोतीव मृतेः समः ।
पुत्राणां मरणं देवि शीतलाद्यैरुपद्रवैः ॥ ११ ॥
पूर्वजन्मनि भो देवि परस्त्रीगमनं कृतम् ।
त्यक्ता विवाहिता नारी पुत्रकन्यासमन्विता ॥ १२ ॥
तत्पापेनैव भो देवि पुत्रादीनां विनाशनम् ।
गर्भनाशो भवेद्देवि वन्ध्यात्वं जायते शिवे ॥ १३ ॥

काकवन्ध्या भवेन्नारी सुखं नैव प्रजायते ।
स्वल्पयोनिः कृशाङ्गश्च कथाश्रवणतत्परः ॥ १४ ॥
विद्यादानविहीनश्च स्वकुले बहुनिष्ठुरः ।
अस्य शान्तिं प्रवक्ष्यामि कृतं यत्पूर्वजन्मनि॥१५॥
तत्सर्वं शृणु मे देवि यतः शुद्धिमवाप्नुयात् ।
गायत्रीमूलमन्त्रेण लक्षजाप्यं वरानने ॥ १६ ॥
हवनं तद्दशांशेन तर्पणं मार्जनं तथा ।
हरिवंशश्रुतिं कुर्यात् त्रिवारावृत्तिसंख्यया ॥ १७ ॥
दशवर्णां ततो दद्यात्स्वर्णदानं विशेषतः ।
निष्कत्रयं प्रदद्याच्च ततः पापक्षयो भवेत् ॥ १८ ॥
भोजयेद् ब्राह्मणान्षष्टिं तथा दद्याच्च दक्षिणाम् ।
एवं कृते विधाने च पुत्रो भवति नान्यथा ॥ १९ ॥
रोगाः सर्वे क्षयं यान्ति नात्र कार्या विचारणा ।
एवं यदा न कुर्यात्तु तदा रोगाः पुनः पुनः ॥ २० ॥

जायन्ते नात्र संदेहः पूर्वजन्मफलात्किल ॥ २१ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
पूर्वानक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं
नाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

अथ सप्तचत्वारिंशोऽध्यायः ।

शिव उवाच ।

नर्मदादक्षिणे कूले ब्राह्मणो वसति प्रिये ।
ब्रह्मकर्मकरो नित्यं सदा वेदपरायणः ॥ १ ॥
शंकरस्य पुरे देवि प्रत्यहं वेदपाठनम् ।
अर्भकान्ब्रह्मजातीयान्पाठयामास वै तदा ॥ २ ॥
तस्य भार्याद्वयं चासीदेका प्रीतिमती सदा ।
विरोधिनी ततो ह्येका ज्येष्ठा भार्या न तां त्यजेत् ३
एवं बहुगते काले ब्राह्मणस्य तदा शिव ।
ततो मृत्युवशं यातस्तस्य भार्या गरीयसी ॥ ४ ॥
चितां कृत्वा प्रयत्नेन भर्तुः खलु वरानन ।
भर्त्रा सह च भो देवि सती जाता महामतिः ॥५॥

सत्यलोकस्त्वभूत्तस्य जायया सहितस्य वै ।
बहुवर्षसहस्राणि सत्यलोकेऽवसत्तदा ॥ ६ ॥
ततः पुण्यक्षये जाते मर्त्यलोकेऽभवत्पुनः ।
मानुषत्वं शुभे जन्म कुले महति पूजिते ॥ ७ ॥
धनधान्यसमायुक्तो वंशहीनो विचक्षणः ।
पूर्वजन्मनि भो देवि भार्यात्यागः कृतस्तथा ॥ ८ ॥
तेन दोषेण भो देवि ततः पुत्रो न जीवति ।
दिने दिने कुक्षिपीडा तस्य चाभिनवा भवेत् ॥ ९ ॥
पुण्यं शृणु महादेवि यतः शान्तिर्भविष्यति ।
गृहवित्तषडंशेन पुण्यकार्यं च कारयेत् ॥ १० ॥
वापीकूपतडागांश्च पथिमध्ये च कारयेत् ।
गायत्रीजातवेदाभ्यां जपं कुर्याद्विचक्षणः ॥ ११ ॥
होमं च तद्दशांशेन तिलतण्डुलपायसैः ।
दशवर्णाः प्रदातव्या विप्राणां भोजनं शतम् ॥ १२ ॥
एवं कृते न संदेहो वंशलाभो भवेदनु ।

व्याधेश्चैव प्रमुच्येत सत्यं सत्यं वरानने ॥ १३ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे पूर्वानक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

अथाष्टचत्वारिंशोऽध्यायः ।

शिव उवाच ।

अयोध्यानगरे देवि वैश्योऽवात्सीत्सुरेश्वरि ।
स्वकर्मनिरतो दक्षो विष्णुभक्तिपरायणः ॥ १ ॥
धनधान्यसमायुक्तो विप्रसेवासु तत्परः ।
पत्नी तस्य वरारोहे सुन्दरी च पतिव्रता ॥ २ ॥
कश्चिन्मित्रं प्रियस्तस्य ब्राह्मणो वेदपारगः ।
प्रत्यहं निकटे तस्य बहुस्वर्णमुपार्जयेत् ।
ब्राह्मणोप्यात्मनः स्वर्णं ददौ वैश्याय वै शिवे ॥ ३ ॥
तीर्थयात्राप्रसङ्गेन वाराणस्यां गतः स वै ।
गत्वा काश्यां वरारोहे शरीरं ब्राह्मणोऽत्यजत् ॥ ४ ॥
सर्वं वैश्येन तद् द्रव्यं भुक्तं बहुदिनोपरि ।

शरीरत्याजनाद्देवि पुण्यतीर्थे स्त्रिया सह ॥ ५ ॥
अयोध्यायां विशालाक्षि स्वर्गवासं तथाऽक्षयम् ।
दशपंचयुगं भुक्त्वा फलं चैव मनोहरम् ॥ ६ ॥
ततः पुण्यक्षये जाते मृत्युलोके सुरेश्वरि ।
कुले महति वै पूज्ये नरजन्म ततोऽभवत् ॥ ७ ॥
धनधान्यसमायुक्तो विष्णुपूजासु तत्परः ।
ब्राह्मणस्यैव स्वर्णादि न दत्तं वै गृहीतवान् ॥ ८ ॥
तस्मात्खलु वरारोहे पुत्रस्तस्य न जायते ।
शरीरे च महाकष्टं मध्ये मध्ये प्रजायते ॥ ९ ॥
तस्य चोत्तरफाल्गुन्याः प्रथमे चरणे शुभे ।
जन्म वै चाप्यभूद्देवि पुत्रकन्याविवर्जितः ॥ १० ॥
अस्य पापस्य वै शान्तिं पुण्यं शृणु वरानने ।
हरिवंशश्रुतिं कुर्याद्वारमेकं च तत्परः ॥ ११ ॥
गृहवित्तषडंशेन पुण्यकार्यं च कारयेत् ।
गायत्रीमूलमंत्रेण दशायुतजपं तथा ॥ १२ ॥
होमं च तद्दशांशेन तर्पणं मार्जनं तथा ।

दशवर्णाः प्रदातव्याः स्वर्णयुक्ताः सहाम्बराः १३
भूमिदानं ततो देवि विप्राय विदुषे प्रिये ।
व्रतं सूर्यस्य वै कुर्यात्पत्न्या सह वरानने ॥ १४ ॥
कूष्मांडं नारिकेरं च पंचरत्नसमन्वितम् ।
गंगामध्ये प्रदातव्यं सुवर्णं दक्षिणां ततः ॥ १५ ॥
शय्यादानं प्रयत्नेन प्रकुर्यान्नियतेन्द्रियः ।
एवं कृते न संदेहः सर्वरोगो विनश्यति ॥ १६ ॥
अपुत्रो लभते पुत्रं काकवंध्या सुतं लभेत् ।
मृतवत्सा सुतं सूते चिरंजीविनमुत्तमम् ॥ १७ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे उत्तरानक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं नामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

अथैकोनपञ्चाशत्तमोऽध्यायः ।

शिव उवाच ।

पुरुषोत्तमपुरे रम्ये स्वर्णकारोऽवसत् पुरा ।
स्वकर्मनिरतो नित्यं हेमकृत्ये विचक्षणः ॥ १ ॥

ब्राह्मणस्तस्य वै मित्रं धनाढ्यो वेदवर्जितः ।
तेन विप्रेण भो देवि स्वर्णं दत्तं शतं पलम् ॥ २ ॥
स्वर्णकाराय मित्राय माल्यार्थं च विचक्षणः ।
ब्राह्मणाय न दत्तं हि माल्यं दिव्यं वरेऽनघे ॥ ३ ॥
ब्राह्मणस्याभवन्मृत्युः किंचित्काले गते सति ।
स्वर्णं तत्स्वेच्छया भुक्तं पुत्रदारयुतेन च ॥ ४ ॥
ततो बहुगते काले स्वर्णकारस्य वै शिवे ।
मरणं वै तदा जातं पुत्रदारायुतस्य च ॥ ५ ॥
महाकटाहनरके दूतैः क्षिप्तो यमाज्ञया ।
युगमेकं वरारोहे भुक्तं नरकजं फलम् ॥ ६ ॥
नरकान्निर्गतो देवि व्याघ्रयोनिस्ततोऽभवत् ।
व्याघ्रयोनिं ततो भुक्त्वा शृगालत्वं ततोऽभवत् ७
ततः काकस्य वै योनिं भुक्त्वा नरकमाप्नुयात् ।
देशे पुण्यतरे देवि मानुषत्वं सुरेश्वरि ॥ ८ ॥
पूर्वजन्मनि यत्स्वर्णं ब्राह्मणस्य हृतं प्रिये ।
तेन पापेन भो देवि पुत्रो नैव प्रजायते ॥ ९ ॥

गर्भस्रावो भवेन्नार्याः काकवन्ध्या च जायते।
अस्य पापस्य वै शान्तिं शृणु देवि सुशोभने १०
षडंशं च ततो देवि ब्राह्मणाय समर्पयेत्।
दशायुतजपं कुर्याद्गायत्र्या नियमेन च॥ ११॥
हरिवंशश्रुतिं देवि संकल्प्य श्रद्धया युतः।
होमं वै कारयेद्देवि स्वर्णदानं शतं पलम्॥ १२॥
गोदानं विधिवत्कुर्याच्छिवपूजनमेव च।
एवं कृते न संदेहः शीघ्रं पुत्रमवाप्नुयात्॥ १३॥
मृतवत्सा लभेत्पुत्रं चिरंजीविनमुत्तमम्।
काकवन्ध्या प्रसूयेत सत्यमेव न संशयः॥ १४॥
रोगात्प्रमुच्यते शीघ्रं ज्वरं सर्वं क्षयं व्रजेत्॥ १५॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे उत्तरानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नामैकोनपञ्चाशत्तमोऽध्यायः॥ ४९॥

अथ पञ्चाशत्तमोऽध्यायः।

शिव उवाच ।

पुरे वै गहने देवि तैलकारोऽवसत्पुरा ।
महाधनाढ्यो वै देवि कोटिद्रव्येण संयुतः ॥ १ ॥
तस्य च स्त्रीद्वयं चासीज्ज्येष्ठायां वै विषं ददौ ।
कनिष्ठा च गृहे तस्य गृहिणी धर्मचारिणी ॥ २ ॥
एवं बहुगते काले तैलकारस्य वै शिवे ।
मरणं तस्य वै जातं यमदूतैर्यमाज्ञया ॥ ३ ॥
महाकटाहे नरके निक्षिप्तश्च सुदारुणे ।
तत्र च बहुधा पीडा नानानरकयातना ॥ ४ ॥
त्रिंशत्सहस्रं वै वर्षं तीव्रदुःखं च जायते ।
भुक्तं नरकजं दुःखं योनिं सर्पस्य वै शिवे ॥ ५ ॥
गृध्रत्वं कुक्कुटत्वं वै द्वे योनी च तदागतः ।
मानुषस्य च वै योन्यां जातः खलु वरानने ॥ ६ ॥
धनधान्यसमायुक्तो गुणज्ञो ज्ञानवानपि ।
ततो वै तस्य मरणं गङ्गायां देव्यभूत्पुरा ॥ ७ ॥

तत्पुण्येन महादेवि मानुषो धनवानभूत् ।
तैलकारो यतः पूर्वं ज्येष्ठायै च विषं ददौ ॥ ८ ॥
तत्पापेन च भो देवि पुत्रो नैव प्रजायते ।
बहुरोगेण संयुक्तो भार्या कष्टयुता सदा ॥ ९ ॥
अथ शान्तिं प्रवक्ष्यामि शृणु देवि सविस्तरम् ।
गृहवित्ताष्टमं भागं पुण्यकार्यं करोतु सः ॥ १० ॥
गायत्रीमूलमन्त्रेण लक्षजाप्यं च कारयेत् ।
हवनं तद्दशांशेन मार्जनं तर्पणं तथा ॥ ११ ॥
त्र्यम्बकेति च मन्त्रेण दशायुतजपं पुनः ।
दशवर्णां ततो दद्यात्कूष्माण्डं रत्नसंयुतम् ॥१२॥
काश्यां वै ग्रहणे दद्यात्पत्न्या सार्द्धं महद्धनम् ।
कार्त्तिके माघवैशाखे प्रातःस्नानं समाचरेत् ॥१३॥
तिलधेनुं ततो दत्त्वा सद्यः पापात्प्रमुच्यते ।
एवं कृते न संदेहो वंशलाभो भवेद् ध्रुवम् ॥ १४ ॥
कन्यकाजननी यापि सापि पुत्रवती भवेत् ।
मृतवत्सा लभेत्पुत्रं चिरंजीविनमुत्तमम् ॥ १५ ॥

रोगात्प्रमुच्यते शीघ्रं ज्वरो नैव प्रजायते ॥ १६ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
उत्तरानक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं
नाम पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

अथैकपञ्चाशत्तमोऽध्यायः ।

शिव उवाच ।

गयापुर्यां पुरा देवि ब्राह्मणोऽध्यवसत्प्रिये ।
वेदकर्मपरिभ्रष्टो मद्यपानरतः सदा ॥ १ ॥
स्तेयवेश्यासु संगामी स प्रतिग्रहवानपि ।
वयः सर्वं गतं चेत्थं वृद्धे जाते मृतः स वै ॥ २ ॥
यमदूतो महाघोरे कटाहनरकेऽक्षिपत् ।
लक्षत्रयमितं देवि भुक्तं नरकजं फलम् ॥ ३ ॥
चाणूरस्य कुले जन्म ततः प्रेतोऽगमत्पुरा ।
बिडालत्वं ततो यातः फल्गुतीर्थे मृतः स वै ॥४॥
पुनर्मानुषयोनित्वं मध्यदेशे सुरेश्वरि ।
कन्यकाजननी भार्या शरीरे सततं ज्वरः ॥ ५ ॥

चिन्तोद्विग्नः सदा देवि बहुदुःखेन पीडितः ।
अस्य शान्तिं शृणुष्वादौ यतः पापक्षयो भवेत् ६
केशवस्यार्चनं चादौ साधूनां सेवनं सदा ।
ब्राह्मणे दृढभक्तिश्च दाने वै भोजने तथा ॥ ७ ॥
गां सवत्सां ततो दद्याद्विप्राय प्रतिवत्सरम् ।
श्रवणं विष्णुशास्त्रस्य हरिवंशश्रुतिं तथा ॥ ८ ॥
एवं कृते न संदेहो बहुपुत्रः प्रजायते ।
रोगाः सर्वे क्षयं यान्ति काकवन्ध्या च पुत्रिणी ९

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे उत्तरानक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं नामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

अथ द्विपञ्चाशत्तमोऽध्यायः ।

शिव उवाच ।

स्वर्णकारोऽवसद्देवि पुरे भोजकटे तथा ।
स्त्री तस्यासीन्महादुष्टा परपुंसि रता सदा ॥ १ ॥

तद्गृहे वैश्य एकोपि ह्यागतो धनसंयुतः ।
तयोः प्रीतिरभूद्देवि स्वर्णकारकवैश्ययोः ॥ २ ॥
व्यापारार्थं गृहीतं तु वैश्यस्वर्णं तदा प्रिये ।
पलं शतमितं देवि विक्रयं चाकरोत्किल ॥ ३ ॥
स्वर्णकारस्य या पत्नी सुन्दरी कुलटापरा ।
प्रीत्या तदाऽभजत्पत्नी वैश्याय धनिकाय वै ॥ ४ ॥
एवं बहुगते काले वैश्यस्य मरणे सति ।
पश्चान्मृतस्तदा सोपि स्वर्णकारो वरानने ॥ ५ ॥
उभौ च नरके प्राप्तौ बहुकालं तु दोषतः ।
युगैकसंमितं देवि भुक्त्वा नरकयातनाम् ॥ ६ ॥
नरकान्निःसृतौ तौ तु शुनो योनिं तदा गतौ ।
पुनर्वृषभयोनिं च नरयोनिस्ततोऽभवत् ॥ ७ ॥
महद्धनैः समायुक्तो देशे पुण्यतमे शुभे ।
पूर्वजन्मप्रसंगेन स वैश्यः पुत्रतां गतः ॥ ८ ॥
भार्या तस्य तु भो देवि या पुरा व्यभिचारिणी ।
पुत्रोत्पत्तिस्तदा तस्यां मरणं शीघ्रमाप्नुयात् ॥ ९ ॥

शरीरे महती पीडा सततं चिन्तया युतः।
अस्य शांतिं प्रवक्ष्यामि यथोक्तं शृणु वल्लभे॥१०॥
गृहवित्ताष्टमं भागं पुण्यकार्य्यं च कारयेत्।
जातवेदेति मंत्रेण पंचायुतजपं तथा॥ ११॥
दशांशं हवनं कुर्यात्तर्पणं मार्जनं तथा।
पापशांत्यै च भो देवि भोजयेद्ब्राह्मणाञ्छतम् १२
गोदानं च विशेषेण शय्यादानं तथा प्रिये।
प्रतिमां कारयेद्देवि सुवर्णस्य तदा प्रिये॥ १३॥
एकादशपलेनैव रचितां वस्त्रभूषिताम्।
पूजयेद्विधिवद्देवि मंत्रेणानेन वै शिवे॥ १४॥
श्रीविष्णो पुण्डरीकाक्ष भुवनानां च पालक।
चंदनैः प्रतिमां दिव्यां पूजयामि गृहाण भोः॥१५॥
नरसिंहाय नमः पादयोः। गोविन्दाय नमः उदरे।
विश्वजिते नमः कट्याम्। अनिरुद्धाय नमः उरसि।
शितिकण्ठाय नमः कण्ठे। वैनतेयाय नमः शिरसि।
असुरध्वंसनाय नमः चक्रे। तोयात्मने नमः शङ्खे।

वैकुण्ठाय नमः गदायाम् । सर्वात्मने नमः पद्मे ।
भो किरीटिन्महादेव शंखचक्रगदाधर ।
पापं मया कृतं पूर्वं तत्क्षमस्व दयानिधे ॥ १६ ॥
ततः प्रदक्षिणां कुर्यात्पत्न्या सह वरानने ।
प्रतिमां पूजितां चैव ब्राह्मणाय समर्पयेत् ॥ १७ ॥
एवं कृते तदा देवि पुत्रो भवति नान्यथा ।
रोगाः सर्वे क्षयं यान्ति नात्र कार्या विचारणा ॥ १८ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
हस्तनक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं
नाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

अथ त्रिपञ्चाशत्तमोऽध्यायः ।

शिव उवाच ।

वंगदेशे महादेवि केशवं नाम वै पुरम् ।
खड्गनामेति विख्यातो नापितो वसति प्रिये ॥ १ ॥
महाधनसमायुक्तो भाग्यवान् देवपूजकः ।
तस्य पत्नी विशालाक्षी लीलानाम्नीति विश्रुता ॥ २ ॥

तस्यां पुत्रद्वयं जातं नापितस्य तदा प्रिये ।
एको द्यूतपरः पुत्रो द्वितीयश्चौरसंमतः ॥ ३ ॥
परस्त्रीलम्पटो देवि नापितस्य च वै सुतः ।
ज्येष्ठपुत्रस्य या भार्या पुंश्चली चातिसुंदरी ॥ ४ ॥
नापितं प्राभजत्सा तु श्वशुरं खड्गनामकम् ।
एवं बहुगते काले तस्य मृत्युरभूत्तदा ॥ ५ ॥
तदा पत्नी सती जाता नापितस्य चिताग्निना ।
सत्यलोकमभूद्देवि भार्यया सहितस्य वै ॥ ६ ॥
युगमेकायुतं देवि सत्यलोकेऽवसत्तदा ।
ततः पुण्यक्षये जाते पुनर्मानुषतां गतः ॥ ७ ॥
धनधान्यसमायुक्तो ह्यपुत्रश्च सुशोभने ।
पंच कन्याः प्रजायंते व्याधिस्तस्य प्रजायते ॥८॥
अस्य शांतिं प्रवक्ष्यामि पूर्वपापक्षयं यतः ।
गृहवित्ताष्टमं भागं ब्राह्मणाय समर्पयेत् ॥ ९ ॥
गायत्रीमूलमन्त्रेण लक्षजाप्यं च कारयेत् ।
हवनं तद्दशांशेन तर्पणं मार्जनं तथा ॥ १० ॥

वाटिकाकूपमार्गांश्च तडागं चैव कारयेत् ।
तुलसीसेवनं नित्यमेकादश्यां व्रतं ततः ॥ ११ ॥
वृन्ताकं मूलिकां चैव न भोक्तव्यं कदाचन ।
दशवर्णां ततो दद्याद्धरिवंशश्रुतिं तथा ॥ १२ ॥
एवंकृते न संदेहः पुत्रो भवति तस्य वै ।
कन्यका नैव जायन्ते वन्ध्यात्वं च प्रशाम्यति॥१३॥
रोगाःसर्वे क्षयं यान्ति काकवंध्या लभेत्सुतम्॥१४॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
हस्तनक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं
नाम त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

अथ चतुःपंचाशत्तमोऽध्यायः ।

शिव उवाच ।

कौशिक्या दक्षिणे कूले कारुको न्यवसत्प्रिये ।
विष्णुभक्तिरतो नित्यं कृषिकर्मसु तत्परः ॥ १ ॥
धनं तु संचितं देवि कार्पण्यं पुण्यवर्जितम् ।
एकस्मिन्समये रात्रौ क्षेत्रे व्याघ्रेण वै हतः ॥ २ ॥

यमदूतैर्महाघोरे रौरवे पातितस्तदा।
षष्टिवर्षसहस्राणि भुक्त्वा नरकयातनाम् ॥ ३ ॥
ततः कर्मवशाद्देवि बिडालत्वं ततो गतः।
पुनः कुक्कुटयोनिर्वै शृगालत्वं ततोऽभवत् ॥ ४ ॥
पुनर्मानुषयोनिश्च मध्यदेशे वरानने।
पुत्रकन्याविहीनश्च अर्शोरोगेण पीडितः ॥ ५ ॥
अस्य शान्तिं प्रवक्ष्यामि पूर्वपापविशुद्धये।
सूर्यमाराधयेन्नित्यं व्रतं सूर्यस्य वासरे ॥ ६ ॥
गायत्रीमूलमन्त्रेण दशायुतजपं तथा।
प्रयागे नियतः स्नानं माघवैशाखकार्त्तिके ॥ ७ ॥
भूमिदानं ततो देवि वित्तशाठ्यं न कारयेत्।
गोमिथुनं ततो दद्यात्सर्वालंकारभूषितम् ८
कूष्मांडं नारिकेरञ्च पंचरत्नसमन्वितम्।
गङ्गामध्ये प्रदातव्यं तुलसीपत्रसंयुतम्।
माल्यस्य रचना कार्या स्वर्णैर्दशपलैः शुभा ॥ ९ ॥
विधिपूर्वं विशेषेण विविधं गंधचर्चितम्।

आचार्याय ततो दद्यात् सर्वपापविशुद्धये ॥ १० ॥
पुत्रश्च जायते देवि कन्यका नैव जायते ।
सर्वे रोगाः क्षयं यान्ति वंध्यात्वं च प्रणश्यति ।
काकवंध्या लभेत्पुत्रं मृतवत्सा च पुत्रिणी ॥ ११ ॥
अधनो धनमाप्नोति नात्र कार्या विचारणा ॥ १२ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
हस्तनक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं
नाम चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

अथ पञ्चपञ्चाशत्तमोऽध्यायः ।

शिव उवाच ।

हस्तिना नगरे कश्चित्कायस्थो वसति प्रिये ।
केवलेति समाख्यातस्तस्य स्त्री कमला शुभे ॥१॥
महाधनसमायुक्तो मद्यपानरतः सदा ।
वेश्यासुरतसंतृप्तो ब्राह्मणस्य विदूषकः ॥ २ ॥
एकस्मिन्समये देवि कश्चिद्विप्रः समागतः ।
गङ्गाजलसमायुक्तं याचितं तेन भोजनम् ॥ ३ ॥

तच्छ्रुत्वा देहजक्रोधाद् ब्राह्मणं निरभर्त्सयत् ।
ताडिता भर्त्सितस्तेन विषं पीत्वा द्विजो मृतः ॥४॥
ततो बहुगते काले मरणं तस्य चाभवत् ।
तस्य पत्नी सती जाता तद्दिने च वरानने ॥ ५ ॥
बहून्यब्दसहस्राणि सत्यलोकेऽवसत्तदा ।
सौख्यानि बहुधा तत्र प्रभुक्तानि वरानने ॥ ६ ॥
ततः पुण्यक्षये जाते मानुषत्वं पुनर्गतः ।
धनधान्यसमायुक्तो विप्रवंशे प्रजायते ॥ ७ ॥
जाताश्च बहवः पुत्रा गौराङ्गप्रियदर्शनाः ।
गुणज्ञा रूपसंपन्ना म्रियन्ते प्रीतिवर्द्धनाः ॥ ८ ॥
द्वौ पुत्रौ शीलसंपन्नौ चोद्वाहेन समायुतौ ।
पितुः कर्मवशाद्देवि ब्रह्महत्या पुरा यतः ॥ ९ ॥
राजरोगसमायुक्तो जायागर्भो विनश्यति ।
अस्य शान्तिं प्रवक्ष्यामि शृणु देवि पतिव्रते॥१०॥
विष्णोररराटमंत्रेण लक्षजाप्यं च कारयेत् ।
दशांशं हवनं कुर्यात्तर्पणं मार्जनं तथा ॥ ११ ॥

वित्तस्य च षडंशं च ब्राह्मणे दानमाचरेत् ।
वापीकूपतडागानि पथि मध्ये च कारयेत् ॥ १२ ॥
गामेकां कपिलां दद्यात्सवत्सां वस्त्रभूषिताम् ।
सुवर्णस्य कृतं विप्रं पलपञ्चदशस्य तु ॥ १३ ॥
दद्याद्विप्राय विदुषे सर्वप्राणिरताय वै ।
हरिवंशश्रुतिं देवि विधिपूर्वं च कारयेत् ॥ १४ ॥
पुत्रश्च जायते देवि गर्भपातश्च शाम्यति ।
काकवंध्या लभेत्पुत्रं निश्चयो नात्र संशयः ॥१५॥
पुत्राणां मरणं देवि पूर्वपापप्रसंगतः ।
प्रायश्चित्तं विना देवि कुतः शान्तिमवाप्नुयात्॥१६॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
हस्तनक्षत्रस्य चतुर्थचरणप्रायाश्चित्तकथनं
नाम पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

अथ षट्पञ्चाशत्तमोऽध्यायः ।

शिव उवाच ।

गयापुर्यां महादेवि क्षत्री ह्येकोऽवसत्पुरा ।

कुकर्मणि रतो नित्यं धनाढ्यः कृपणः शठः ॥ १ ॥
स्त्री भवेच्चञ्चला तस्य द्वौ पुत्रौ च वरानने।
कन्या चैका विशालाक्षी जाता तस्यां वरानने ॥२॥
उद्वाहिता तदा देवि कन्यका व्यभिचारिणी।
महिषीपुत्रघातं च प्रत्यब्दमकरोत्प्रिये ॥ ३ ॥
अनेनैवं प्रकारेण वयः सर्वं क्षयं गतम्।
ततः सर्पेण वै दष्टस्तस्य मृत्युरभूत्तदा ॥ ४ ॥
यमदूतैर्महाघोरे निक्षिप्तो नरकार्णवे।
त्रिसप्ततिसहस्राणि वर्षाणि च वरानने ॥ ५ ॥
भुक्त्वा कष्टं विशालाक्षि गर्भत्वं च ततो गतः।
मध्यदेशे विशालाक्षि नरजन्मा च क्षत्रियः ॥ ६ ॥
पुत्रो न जायते देवि पूर्वपापानुसारतः।
कन्यका रजसा युक्ता विधवा जायते प्रिये ॥ ७ ॥
महिषीपुत्रघातेन रोगोत्पत्तिश्च जायते।
अस्य पापस्य शान्त्यर्थं पुण्यं शृणु वरानने ॥ ८ ॥
स्ववित्तस्याष्टमं भागं ब्राह्मणाय ददेत वै।

एकां कृष्णां च गां देवि स्वर्णशृङ्गीं सवत्सकाम् ॥९॥
सर्वलक्षणसंपन्नां वस्त्रमुक्तादिभूषिताम् ।
ब्राह्मणाय तदा दद्याच्छय्यादानं विशेषतः ॥१०॥
गायत्रीजातवेदाभ्यामयुतं जपमाचरेत् ।
हवनं तद्दशांशेन तर्पणं मार्जनं ततः ॥ ११ ॥
पथिमध्ये वरारोहे पञ्चवृक्षस्य वाटिकाम् ।
कारयेद्विभवेनैव विष्णुवृक्षादिभिर्वृताम् ॥ १२ ॥
भोजयेद्देवि षट्षष्टिब्राह्मणान्वेदपारगान् ।
निष्कत्रयसुवर्णस्य प्रतिमां वस्त्रभूषिताम् ॥ १३ ॥
ब्राह्मणाय ततो दद्याद्विष्णुभक्ताय सुंदरि ।
एवं कृत्वा विशालाक्षि पूर्वजन्मकृतं च यत् ॥१४॥
पापं प्रणाशयेद्देवि नात्र कार्या विचारणा ।
काकवन्ध्या च या नारी लभते पुत्रमुत्तमम् ॥१५॥
पुत्रश्च जायते देवि सुरूपेण समन्वितः ।
रोगाः सर्वे क्षयं यान्ति नात्र कार्या विचारणा॥१६॥

मृतवत्सा लभेत्पुत्रं चिरंजीविनमुत्तमम् ॥ १७ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे चित्रानक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं नामषट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

अथ सप्तपञ्चाशत्तमोऽध्यायः ।

शिव उवाच ।

पुण्येन जायते पुत्रः पुण्येन लभते श्रियम् ।
पुण्येन रोगनाशः स्यात् सर्वशास्त्रेण संमतः ॥ १ ॥
मध्यदेशे वरारोहे ब्राह्मणो न्यवसत्प्रिये ।
सरय्वा दक्षिणे कूले कालिकापुरशोभने ॥ २ ॥
तत्र कालीपुरे शुभ्रे द्विजोऽतिष्ठन्महाशनः ।
तेन वेश्यापरस्त्रीणां रतिसंसर्गतत्परः ॥ ३ ॥
मद्यपानं विना देवि निद्रा तस्य न जायते ।
तस्य स्त्री सुभवानाम्नी पतिसेवापरायणा ॥ ४ ॥
प्रत्यहं पूजयेद्देवि स्वपतिं पापकारिणम् ।
ततो बहुगते काले मरणं व्याघ्रतोभवत् ॥ ५ ॥

तस्य पत्नी सती जाता चिताग्नौ च तदा हिता।
सत्यलोके ततो देवि कल्पमेकं बुभोज सा ॥ ६ ॥
पत्या सह वरारोहे ततः पुण्यक्षये सति।
मृत्युलोकेभवज्जन्म कुले महति पूजिते ॥ ७ ॥
धनधान्यसमायुक्तो बाल्यतो रोगवानपि।
पुण्यसम्बन्धयोगेन पुण्यस्त्री या च संस्थिता ॥८॥
पुनर्विवाहिता सैव यायात्पुत्रविवर्जिता।
अस्य पापस्य शान्त्यर्थं पुण्यं शृणु वरानने ॥ ९ ॥
गृहवित्तषडंशस्य पुण्यकार्यं च कारयेत्।
गायत्रीमूलमन्त्रेण त्रिलक्षं जपमाचरेत् ॥ १० ॥
हवनं तद्दशांशेन तर्पणं मार्जनं तथा।
दशवर्णास्ततो दानं भूमिदानं विशेषतः ॥ ११ ॥
गोविन्देति ततो नाम जपेन्नित्यं वरानने।
प्रातःस्नानं सदा कुर्यान्माघवैशाखकार्त्तिके॥१२॥
कृष्णस्य शतकं देवि भूर्जपत्रेण संयुतम्।

---

१ 'ॐ नमो भगवते वासुदेवाय' यह द्वादशाक्षर मन्त्र है।

लेखयित्वा विधानेन स्थापयेत्स्वगृहं प्रति ॥ १३ ॥
हरिवंशश्रुतिं कुर्यादेकादश्यां व्रतं चरेत् ।
एवंकृत्वा वरारोहे सर्वरोगक्षयो भवेत् ॥ १४ ॥
पुत्रश्च जायते देवि नात्र कार्या विचारणा ॥ १५ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
चित्रानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं
नाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

अथाष्टपञ्चाशत्तमोऽध्यायः ।

शिव उवाच ।

अयोध्यापुरतो देवि योजनत्रयदक्षिणे ।
सुधर्मपुरविख्यातो न्यवसन्बहवो जनाः ॥ १ ॥
रतिदासेति विख्यातो बभूव वस्तुविक्रयी ।
दलाक्षीति समाख्याता तस्य पत्नी च स्वैरिणी॥२॥
पतिं न पूजयेद्देवि रूपगर्ववशात्तथा ।
महिष्यो बहुला आसन्गावो विक्रयकारणात् ॥३॥
महिषीपुत्रघातं च प्रत्यहं खलु जायते ।

छागस्य विक्रयो नित्यं छागानां वध एव च ॥ ४ ॥
गोप एको महाप्राज्ञो धनार्थी स्वर्णसंयुतः ।
तत्र जातो महादेवि वैश्यमित्रं हि बाल्यतः ॥ ५ ॥
तस्य गेहे स्थितो देवि धनधान्यसमन्वितः ।
वैश्यपत्नी तदा देवि गोपं प्रति तदाऽभजत् ॥ ६ ॥
एवं बहुगते काले तस्य गोपस्य वै मृतिः ।
वैश्यगेहे महादेवि धनं गोपस्य वै खलु ॥ ७ ॥
वैश्येनैव तु तत्सर्वं धनं तस्य व्ययं कृतम् ।
ततः सर्वं वयो यातं वैश्यमृत्युरभूत्तदा ॥ ८ ॥
गङ्गायां च विशालाक्षि पत्नी तस्य तथा मृता ।
वैश्यस्याभूत्तथा स्वर्गो वर्षषष्टिसहस्रकम् ॥ ९ ॥
वैश्यपत्नी ततो देवि कर्दमे नरके गता ।
षष्टिवर्षसहस्राणि भुक्त्वा नरकयातनाम् ॥ १० ॥
नरकान्निःसृता सा तु सर्पयोनिं तथा गता ।
सर्पयोनिं ततो भुक्त्वा गङ्गायां मरणं खलु ॥ ११ ॥
शूद्रं प्रति पुरा स्नेहस्ततः शूद्रः स चाभवत् ।

वैश्यः स्वर्गफलं भुक्त्वा मानुषत्वं ततोगमत्॥१२॥
धनधान्यसमायुक्तो रूपवानतिथेर्हितः।
बहुधनी गुणी ज्ञानी पुत्रकन्याविवर्जितः॥ १३ ॥
वैश्यस्य शूद्रजातित्वं पूर्वस्नेहफलं यतः।
पत्नी सा च समायाता पूर्वसंबन्धकारणात्॥१४॥
यतो द्रव्यं समाभुक्तं सर्वं शूद्रस्य पापिना।
ततश्चैव समुत्पन्नाः कन्या बह्वयः सुरेश्वरि॥ १५॥
महिषीपुत्रघातित्वाद्वायुरोगादयस्तथा।
स्वपतेर्वञ्चनं कृत्वा परपुंसि रता यतः॥ १६॥
तस्मात्पुत्रस्य मरणं गर्भपातः पुनः पुनः।
अस्य शान्तिमहं वक्ष्ये शृणु देवि वरेऽनघे॥१७॥
गृहवित्तषडंशेषु पुण्यं कार्यं च यत्नतः।
वापीकूपतडागादि पथिमध्ये च कारयेत्॥ १८॥
शिवस्य पूजनं चैव शिवभक्तिमहर्निशम्।
नमःशिवाय मन्त्रं च पञ्चलक्षं च जापयेत्॥ १९॥
पार्थिवाल्लँक्षसंख्याकान्पूजयेच्च यथाविधि।

ॐ नमः शिवाय मन्त्रस्तु सर्वपापप्रणाशनः ॥ २० ॥
देहान्ते मुक्तिदश्चैव मर्त्यलोके च कामदः ।
हवनं कारयेद्देवि कुण्डे चैव तु शोभने ॥ २१ ॥
चतुरस्रे विशालाक्षि तिलधान्यादितण्डुलैः ।
ताम्रवर्णां ततो देवि गां दद्याद्विदुषे प्रिये ॥ २२ ॥
निष्कमात्रं तथा स्वर्णं ब्राह्मणाय प्रदापयेत् ।
एवंकृते न संदेहो व्याधिनाशो भवेद् ध्रुवम् ॥ २३ ॥
पुत्रश्च जायते देवि पुनर्गर्भो न नश्यति ।
काकवन्ध्या पुनः पुत्रं प्रसूयेत न संशयः ॥ २४ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
चित्रानक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं
नामाष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

अथैकोनषष्टितमोऽध्यायः ।

शिव उवाच ।

देशे पुण्यतमे देवि प्रतिष्ठानपुरे तथा ।
ब्राह्मणो वेदविभ्रष्टस्तत्र वासमकारयत् ॥ १ ॥

सुरामांसस्य वै भोक्ता नित्यमत्स्यामिषस्य च ।
पापकार्ये विशालाक्षि व्ययकर्ता दिने दिने ॥ २ ॥
तस्य स्त्री परमा नाम्नी भ्रष्टा चातीव सुन्दरी ।
परपुंसि रता नित्यं निर्भया पतिवञ्चिका ॥ ३ ॥
एवं सर्वं वयो यातं तयोर्मृत्युरभूत्किल ।
पुण्यक्षेत्रे च गङ्गायां देवगन्धर्वपूजिते ॥ ४ ॥
तस्य विप्रस्य वै स्वर्गे कल्पमेकं वरानने ।
भुक्त्वा च विविधं सौख्यं देवकन्याभिरावृतः॥५॥
ततः पुण्यक्षये जाते मृत्युलोके सुरेश्वरि ।
महाढ्यकुलसंपन्ने तस्य जन्माभवत्तदा ॥ ६ ॥

जन्माभवत्तस्य नरस्य शुद्धे
महत्कुले पुण्यजने धनाढ्ये ।
कान्ता तु सैव प्रबभूव या पुरा
स्थिता तदीया व्यभिचारचित्ता ॥ ७ ॥

मद्यपानादिकं पापं पूर्वजन्मनि यत्कृतम् ।
तत्फलेन महादेवि व्याधिग्रस्तस्ततोभवत् ॥ ८ ॥

अथ शान्तिं प्रवक्ष्यामि यतः पापक्षयो भवेत् ।
गायत्रीमूलमन्त्रेण लक्षजाप्यं वरानने ॥ ९ ॥
हवनं तद्दशांशेन तर्पणं मार्जनं तथा ।
देवस्याराधनं नित्यं सूर्य्यस्य व्रतमाचरेत् ॥ १० ॥
प्रयागे नियतः स्नानं माघे मासि यथाविधि ।
पत्न्या सह विशालाक्षि ततः पापं प्रणश्यति॥ ११॥
षडंशं च ततो देवि विप्रेभ्यो दानमाचरेत् ।
ततो वर्षेण महतीं गां च दद्यात्पयस्विनीम् ॥ १२॥
भूमिं वृत्तिकरीं दद्यात्पुत्रपौत्रानुजीविनीम् ।
एवं कृते न संदेहो वंशो भवति नान्यथा ॥ १३ ॥
रोगार्तो मुच्यते रोगात्काकवन्ध्या सुतं लभेत् ।
गर्भभ्रष्टा लभेत्पुत्रं चिरञ्जीविनमुत्तमम् ॥ १४ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
चित्रानक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं
नामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥

अथ षष्टितमोऽध्यायः ।

शिव उवाच ।

कान्यकुब्जे महादेवि राजाप्येकोऽवसत्पुरा ।
राजधर्मरतः शान्तः प्रजापालनतत्परः ॥ १ ॥
रुद्रधर्मेति विख्यातो भार्या तस्य प्रभावती ।
एकस्मिन्दिवसे देवि ब्राह्मणो भयपीडितः ॥ २ ॥
शरणं श्रावयामास शरणार्थी द्विजोत्तमः ।
तस्य भार्या महादेवि सुरूपाप्यतिसुन्दरी ॥ ३ ॥
राजपुत्रेण तस्यां तु गमनं मोहतः कृतम् ।
शरणं दत्तवान् राजा पुत्रस्नेहेन यन्त्रितः ॥ ४ ॥
एवं बहुगते काले नृपस्य मरणं यदा ।
तदा यमाज्ञया दूतैः क्षिप्तो नरककर्दमे ॥ ५ ॥
षष्टिवर्षसहस्राणि नरके परिपच्यते ।
नरकान्निःसृतो देवि शूकरत्वं ततोऽलभत् ॥ ६ ॥
पुनः शृगालयोनिं च मानुषत्वं ततोऽगमत् ।
धनधान्यसमायुक्तो बहुशो गुणवानपि ॥ ७ ॥

पुनर्विवाहिता जाता पत्नी तस्य प्रभावती ।
पूर्वकर्मफलाद्देवि तस्य पुत्रो न जायते ॥ ८ ॥
शरीरं सततं देवि ज्वरेणैव प्रपीडितम् ।
वातपित्तकफानां च सम्भवः स्याद्वयोगते ॥ ९ ॥
अस्य दानं शृणु त्वं हि यथा पापक्षयस्तथा ।
गृहवित्ताष्टमं भागं पुण्यकार्यं च कारयेत् ॥ १० ॥
वापीकूपतडागानां जीर्णोद्धारं यदा भवेत् ।
तदा पापं क्षयं याति पूर्वजन्मसमुद्भवम् ॥ ११ ॥
विष्णोरराटमन्त्रेण जपं कुर्याद्विचक्षणः ।
दद्याद्गां वेदविदुषे सवत्सां चैव शोभने ॥ १२ ॥
वस्त्ररत्नसमायुक्तां घण्टाचामरभूषिताम् ।
ग्रहणेर्कहिमांश्वोश्च काश्यां स्नानं समाचरेत्॥१३॥
निष्कत्रयसुवर्णस्य कमलं कारयेत्ततः ।
ब्राह्मणाय वरारोहे प्रदद्यात्कमलं शुभम्॥ १४ ॥
एवंकृते वरारोहे सर्वपापक्षयो भवेत् ।
अपि वन्ध्या लभेत्पुत्रं चिरंजीविनमुत्तमम् ॥

सर्वे रोगाः क्षयं यान्ति नात्र कार्या विचारणा॥१५॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
स्वातिनक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं
नाम षष्टितमोऽध्यायः ॥ ६० ॥

अथैकषष्टितमोऽध्यायः।

शिव उवाच।

गङ्गाया दक्षिणे कूले विन्ध्ये च नगरोत्तमे।
द्विजोप्येकोऽवसद्देवि ब्रह्मकर्मविवर्जितः ॥ १ ॥
अनाचाररतो नित्यं परस्त्रीलम्पटः शठः।
व्यापारं कुरुते नित्यं गोहिरण्यगजादिकम् ॥ २ ॥
बहुद्रव्यमभूत्तस्य त्रिंशत्कोटिप्रमाणकम्।
द्रव्यस्य संग्रहं नित्यं न च किञ्चिद्ददाति सः ॥ ३ ॥
स्वभार्यां च परित्यज्य परभार्यारतो द्विजः।
धनेश्वर इति ख्यातं तस्य नाम पुराभवत् ॥ ४ ॥
ततो बहुगते काले तस्य मृत्युरभूत्किल।
यमदूतेन वै बद्ध्वा निक्षिप्तो नरकार्णवे ॥ ५ ॥

महाघोरे सुरश्रेष्ठे कल्पमेकं तदाऽवसत् ।
पुनर्व्याघ्रस्य योनिं च वृषयोनिं ततोऽलभत् ॥ ६ ॥
पुनर्मानुषयोनिं च मृतवत्सत्वमाप्तवान् ।
महारोगसमायुक्तो न सुखं लभते क्वचित् ॥ ७ ॥
अस्य शान्तिं प्रवक्ष्यामि शृणु देवि वरानने ।
गायत्रीमूलमन्त्रेण दशलक्षजपं यदा ॥ ८ ॥
दशांशहवनं चैव तदा पापक्षयो भवेत् ।
गोविन्दस्य सदा ध्यानं सदा गोविन्दकीर्तनम् ॥ ९ ॥
नित्यं तु पूजयेद्देवं शङ्खचक्रगदाधरम् ।
पीताम्बरधरं श्यामं श्रीवत्सेन विराजितम् ॥ १० ॥
प्रत्यब्दं कार्त्तिके मासि तुलसीं विष्णुरूपिणीम् ।
पूजयेद्दीपदानं च दद्याद्भार्यासमन्वितः ॥ ११ ॥
गोदानं शास्त्ररीत्या च गोदानाच्च वसुन्धराम् ।
यथाशक्ति च भो देवि ब्राह्मणाय शिवात्मने ॥ १२ ॥
एवंकृते न संदेहः पूर्वजन्मकृतं च यत् ।
तत्पापं नाशमायाति सर्वरोगक्षयो भवेत् ॥ १३ ॥

वन्ध्यात्वं प्रशमं याति पुत्रलाभो भवेद् ध्रुवम्।
काकवन्ध्या लभेत्पुत्रं नात्र कार्या विचारणा ॥१४॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे स्वातिनक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नामैकषष्टितमोऽध्यायः ॥ ६१ ॥

अथ द्विषष्टितमोऽध्यायः।

शिव उवाच।

कुरुक्षेत्रे महातीर्थे वल्लवो न्यवसत्प्रिये।
कृषिकर्मरतो नित्यं क्रयविक्रयतत्परः॥ १ ॥
महिषीगोवृषाणां च सङ्ग्रहं चाकरोद्बहु।
तस्य भार्या वरारोहे परपुंसि रता सदा ॥ २ ॥
स्वपतिं तर्जयेन्नित्यं सदा निष्ठुरभाषणात्।
सङ्ग्रहो बहुद्रव्याणां न दानं दत्तवान् क्वचित्॥३॥
एकस्मिन् दिवसे देवि चन्द्रपर्वणि शोभने।
दशसंख्यं च गोदानं कृतं क्षेत्रे तदा किल॥ ४ ॥

ततो बहुगते काले तस्य मृत्युरभूत्किल ।
यमदूतेन भो देवि निक्षिप्तो नरके किल ॥ ५ ॥
त्रिंशद्वर्षसहस्राणि भुक्त्वा नरकयातनाम् ।
पुनर्माहिषयोन्यां च जातः खलु वरानने ॥ ६ ॥
नरयोनिं पुनर्लेभे धनधान्यसमन्वितः ।
जातः खलु वरारोहे पुत्रकन्याविवर्जितः ॥ ७ ॥
रोगवान्नात्र संदेहो जङ्घापीडा ततोधिका ।
अस्य शान्तिं प्रवक्ष्यामि शृणु त्वं च यथायथम् ॥ ८ ॥
षडंशं च ततो दानं विप्राय विदुषे तथा ।
गायत्रीलक्षजाप्यं च ततो होमं प्रकल्पयेत् ॥ ९ ॥
दशांशं तर्पणं कुर्यात्तद्दशांशं च मार्जनम् ।
गामेकां कपिलां दद्यात् स्वर्णशृङ्गीं सहाम्बराम् १०
ब्राह्मणान्पञ्चपञ्चाशत् पक्वान्नेन च भोजयेत् ।
पञ्चपात्राणि दद्याद्वै शय्यादानं यथाविधि ॥ ११ ॥
दशवर्णाः प्रदातव्या ब्राह्मणेभ्यो यथाविधि ॥ १२ ॥
एवंकृते न सन्देहः शीघ्रं पुत्रः प्रजायते ।

रोगाः सर्वे क्षयं यान्ति नात्र कार्या विचारणा॥१३॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे स्वातिनक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥

अथ त्रयषष्टितमोऽध्यायः ।

शिव उवाच ।

हस्तिना नगरं ख्यातमासीज्जन्तुमनोहरम् ।
अवसंस्तत्र भो देवि ! नराः सर्वे विचक्षणाः ॥ १ ॥
तन्मध्ये शूद्र एको हि धर्मात्मा ज्ञानवानपि ।
स्वधर्मकर्मणः कृत्वा व्ययकर्त्ता दिने दिने ॥ २ ॥
तस्य पुत्रद्वयं जातं शठं पापयुतं सदा ।
प्रत्यहं जीवघातेन मद्यवेश्यारतौ च तौ ॥ ३ ॥
द्यूतेनैव महादेवि राजा वह्निश्च जक्षतः ।
न च वारयितुं शक्यौ शूद्रेणैतौ तदा शिवे ४ ॥
ततस्तु दैवयोगेन प्रयागे शूद्र आगतः ।
मासमेकं ततः स्थित्वा तस्य मृत्युरभूत्किल ॥ ५ ॥

विष्णुदासांस्तदा लब्ध्वा मृत्युलोके वरानने ।
विमानवरमारूढो गतः स्वर्गे वरानने ॥ ६ ॥
तस्य भार्या विशालाक्षि मृत्युलोके सुरेश्वरि ।
सा जाता विधवा नारी किञ्चित्काले गते सति ॥७॥
परपुंसि रता जारे प्रत्यहं व्यभिचारिणी ।
ततो बहुगते काले तस्या मृत्युरभूत्किल ॥ ८ ॥
यमदूतैर्महाघोरे निक्षिप्ता नरके तदा ।
विंशत्यब्दसहस्राणि नरके संप्रपीडिता ॥ ६ ॥
शूद्रः पुण्यक्षये जाते मृत्युलोके सुरेश्वरि ।
जन्म संप्राप्तवान्देवि मध्यदेशे सुरेश्वरि ॥ १० ॥
तदा सा तु भवेन्नारी या पुरा व्यभिचारिणी ।
पूर्वजन्मप्रसङ्गाच्च वंशच्छेदो हि जायते ॥ ११ ॥
रोगश्च जायते देवि कष्टं चैव दिने दिने ।
अस्य पापस्य वै शान्ति तत्समासेन मे शृणु ॥ १२ ॥
स्वर्णवृक्षवरं कृत्वा स्वाङ्गुष्ठपरिमाणकम् ।
फलपुष्पसमायुक्तं पलपञ्चदशस्य तु ॥ १३ ॥

तस्य वृक्षस्य वै मूले शालग्रामशिलां शुभाम् ।
पूजयित्वा विधानेन विष्णुरूपं वरानने ॥ १४ ॥
ब्राह्मणाय ततो दद्याद् गां च दद्यात्पयस्विनीम् ।
गायत्रीमन्त्रजाप्यं तु लक्षमेकं तु कारयेत् ॥१५॥
ततः पापविशुद्धिः स्यात्पुत्रो भवति नान्यथा ।
सर्वे रोगाः क्षयं यान्ति काकवन्ध्या लभेत्सुतम्१६
इति श्रीकर्म० स्वातिनक्षत्रस्य चतुर्थचरणप्राय-
श्चित्तकथनं नाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

अथ चतुःषष्टितमोऽध्यायः ।

शिव उवाच ।

कपिले नगरे देवि क्षत्री वै न्यवसत्पुरा ।
क्षत्रधर्मविहीनश्च वैश्यकर्मरतः सदा ॥ १ ॥
प्रत्यहं वैश्यवृत्त्या तु व्ययं कुर्याद्दिने दिने ।
बहु द्रव्यं तदा तेन सञ्चितं त्यक्तधर्मणा ॥ २ ॥
महालोभेन संयुक्तो धर्मचर्चा न कुत्रचित् ।
पत्नीपुत्राय भोगार्थं नादात्कृपणकेसरी ॥ ३ ॥

एवं बहुगते काले मरणं सर्पतस्तदा ॥ ४ ॥
आसीत्तदीयप्रमदापि तादृक्
यतो जनो योग्यमुपैति सर्वम् ।
यथार्थतः क्षिप्तमतीवदुःखे
यमस्य दूतैः कृतपादशृङ्खलः ॥ ५ ॥
युगमेकं वरारोहे कष्टं भुक्त्वा सुदारुणम् ।
ततोऽभूत्स ततो देवि महिषी वृषभो हयः ॥ ६ ॥
पुनश्च मानुषो भूत्वा तस्य भार्या च या पुरा ।
विवाहिता च सा देवि तस्य पुत्रो न जायते ॥ ७ ॥
पुरा ह्येकाभवत्कन्या पुनः सूतिविवर्जिता ।
रोगो भवति देहे च मध्ये मध्ये ज्वरो भवेत् ॥ ८ ॥
अस्य शान्तिं प्रवक्ष्यामि शृणु देवि वरानने ।
कल्पवृक्षवरं कुर्यात् स्वाङ्गुष्ठपरिमाणकम् ॥ ९ ॥
सुवर्णस्य महादेवि पलपञ्चदशस्य तु ।
वेदीं रौप्यमयीं कुर्यात् पलपञ्चदशस्य तु ॥ १० ॥
तत्र वृक्षं समारोप्य फलपुष्पेण संयुतम् ।

अष्टम्यां च चतुर्दश्यां नवम्यां च सुरेश्वरि ॥ ११ ॥
तस्य वृक्षस्य वै मूले वृषकेतुं सुरेश्वरि ।
सगणं देवमीशानमर्चयित्वा यथाविधि ॥ १२ ॥
यथाशक्ति वरारोहे गन्धधूपादिभिस्तथा ।
साष्टाङ्गदण्डवत्तत्र देवदेवं समापयेत् ॥ १३ ॥
मन्त्रेणानेन भो देवि विसर्जनमथाचरेत् ।
ॐ नमः शिवाय देवाय शिवायै सततं नमः ॥१४॥
मम पूर्वकृतं पापं जन्मजन्मसमुद्भवम् ।
तत्सर्वं क्षम्यतां देव देव्या सह महेश्वर ॥ १५ ॥
ततो वै पूजयेद्विप्रं वेदब्रह्मस्वरूपिणम् ।
पट्टवस्त्राद्यलङ्कारैर्विविधैर्मोदकैरपि ॥ १६ ॥
ततो वृक्षं च वेदीं च कपिलां गां सवत्सकाम् ।
ब्राह्मणाय ततो दद्यात् पूर्वपापविशुद्धये ॥ १७ ॥
भक्त्या मम महादेवि शिवरात्र्यां विशेषतः ।
आजन्ममरणाद्देवि व्रतं कुर्यात्प्रयत्नतः ॥ १८ ॥
एवंकृते महादेवि शीघ्रम्पुत्रः प्रजायते ।

रोगाः सर्वे क्षयं यान्ति वन्ध्या च लभते सुतम् १६
मृतवत्सा लभेत्पुत्रं चिरंजीविनमुत्तमम् ॥ २० ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
विशाखानक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं
नाम चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥

अथ पञ्चषष्टितमोऽध्यायः ।

शिव उवाच ।

विष्णुकांच्यां महादेवि ब्राह्मणो वेदपारगः ।
अत्याचाररतः शान्तो विष्णुभक्तिपरायणः ॥ १ ॥
लक्षितो विष्णुचक्रेण विप्रो विद्याविवर्जितः ।
न वेदः पाठ्यते तेन न विप्रः स्पृश्यते क्वचित् ॥२॥
द्विजानां स्मार्तवृत्तीनां विद्वेषं च करोति सः ।
शिवशक्तिरतानां च नाभिवादनमाचरेत् ॥ ३ ॥
एवं वयोगते देवि वृद्धे जाते वरानने ।
मरणं तस्य वै जातं ब्राह्मणस्य वरानने ॥ ४ ॥
यमदूतैर्महाघोरे नरके पातितस्तदा ।

रौरवे च तदा देवि षष्टिवर्षसहस्रकम् ॥ ५ ॥
भुक्त्वा नरककष्टं च पुनर्जातः सरीसृपः ।
मानुषत्वं पुनर्जातः कष्टानि विविधानि च ॥ ६ ॥
पुत्रस्य मरणं कान्ते प्रतिवर्षे महाव्यथा ।
पुनःस्त्री काकवन्ध्या स्यात्पूर्वजन्मप्रसंगतः ॥ ७ ॥
धनधान्यसमायुक्तोप्ष्येवं दुःखं महद्भवेत् ।
अथ वक्ष्ये महादेवि पूर्वपापस्य निष्कृतिम् ॥ ८ ॥
गङ्गामध्ये प्रदातव्यं पूर्वपापविशुद्धये ।
निष्कत्रयसुवर्णस्य कमलं निर्मितं शुभम् ॥ ९ ॥
दद्याद्वेदविदे देवि ब्राह्मणाय शुभार्थिने ।
अष्टांशं विभवं देवि ब्राह्मणाय समर्पयेत् ॥ १० ॥
गायत्रीजातवेदाभ्यां दशायुतजपं तथा ।
कूष्माण्डं नारिकेरं च पञ्चरत्नसमन्वितम् ॥ ११ ॥
एवंकृते भवेद्देवि पूर्वपापविशुद्धता ।
पुत्रं चैव लभेद्देवि चिरंजीविनमुत्तमम् ॥ १२ ॥
व्याधयः प्रशमं यान्ति ज्वराः सर्वे तथाविधाः ।

काकवंध्या लभेत्पुत्रं चिरंजीविनमुत्तमम् ॥ १३ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे विशाखानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

अथ षट्षष्टितमोऽध्यायः ।

शिव उवाच ।

विदर्भनगरे देवि क्षत्री ह्येकोऽवसत्पुरा ।
तेजवर्मेति विख्यातो द्विजानां वृत्तिहारकः ॥ १ ॥
प्रजानां दुःखदो नित्यं वेदानां चैव निन्दकः ।
तस्य त्रासवशात्सर्वाः प्रजा ग्रामात्पलायिताः ॥२॥
एवं बहुगते काले तस्य मृत्युरभूत्किल ।
यमदूतैर्महाघोरे निक्षिप्तो नरके ततः ॥ ३ ॥
द्विसप्ततिसहस्राणि घोरे नरककर्दमे ।
भुक्तं नरककष्टं च सूचीमुखसमुद्भवम् ॥ ४ ॥
नरकान्निर्गतो देवि गर्दभत्वं ततोऽगमत् ।

रासभत्वात्ततो देवि मानुषत्वं ततोऽभवत् ॥ ५ ॥
तस्य भार्याभवद् वंध्या पूर्वजन्मफलाच्छिवे ।
तस्माद्गात्रे भवेद्रोगो दद्रुरर्शादयस्तथा ॥ ६ ॥
न सुखं लभते देवि चिन्तया व्याकुलेन्द्रियः ।
शृणु सर्वं वरारोहे पूर्वपापस्य निग्रहे ॥ ७ ॥
दशांशं विभवं देवि ब्राह्मणाय समर्पयेत् ।
वापीकूपतडागादि पथिमध्ये च कारयेत् ॥ ८ ॥
गृहदानं ततो देवि सर्ववस्तुसमन्वितम् ।
प्रदद्याद्वेदविदुषे ब्राह्मणाय वराय च ॥ ९ ॥
आकृष्णेति जपं देवि लक्षमेकं च कारयेत् ।
होमं कुर्याददद्रिसुते तिलाज्यमधुतण्डुलैः ॥ १० ॥
ततो गां कपिलां देवि ब्राह्मणाय प्रपूजिताम् ।
प्रदद्याद्विधिवच्चैव सर्वालङ्कारभूषिताम् ॥ ११ ॥
सुवर्णनिष्कमात्रं तु ब्राह्मणाय ततो ददेत् ।
एवंकृते वरारोहे रोगनाशो भवेद् ध्रुवम् ॥ १२ ॥
पुत्रश्च जायते देवि वंध्यात्वं च प्रणश्यति ।

काकवंध्या लभेत्पुत्रं नात्र कार्या विचारणा ॥१३॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
विशाखानक्षत्रस्य तृतीयचरणप्रायश्चित्त-
कथनं नाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥

अथ सप्तषष्टितमोऽध्यायः ।

शिव उवाच ।

मायापुर्यां महादेवि क्षत्री ह्येकोऽवसत्पुरा ।
स शूरश्च धनी मानी देवताऽतिथिपूजकः ॥ १ ॥
तस्य भार्या विशालाक्षी शतानाम्नी वराङ्गना ।
ब्राह्मणातिथिदेवानां पूजने चातितत्परा ॥ २ ॥
एकस्मिन् समये देवि हेमकारः समागतः ।
धनाढ्यः स्वर्णसंयुक्तो गृहे तस्यावसत्स च ॥ ३ ॥
क्षत्रियाय स्वमित्राय शतं स्वर्णस्य वै पलम् ।
प्रदत्तं हेमकारेण चान्यत्स्वर्णं समर्पितम् ॥ ४ ॥
अत्रान्तरे महादेवि स्वर्णकारस्ततो मृतः ।
दष्टः सर्पेण तीव्रेण पुत्रहीनः सुवर्णकृत् ॥ ५ ॥

स्वर्णं सर्वं गृहीत्वा तु प्रभुक्तं क्षत्रियेण तत् ।
पुत्रदारयुते जाते न दत्तं तद्द्विजाय च ॥ ६ ॥
ततो बहुगते काले तस्य मृत्युरभूत्किल ।
क्षत्रियस्य महादेवि सुरलोकस्ततोऽभवत् ॥ ७ ॥
सौख्यं सुराङ्गनासार्द्धं षष्टिवर्षप्रमाणकम् ।
ततः पुण्यक्षये जाते बभूव मनुजः क्षितौ ॥ ८ ॥
धनधान्ययुतस्तस्य भूयो भार्याऽभवत् किल ।
कन्यका चैव पुत्रौ च जातौ तस्यां वरानने ॥ ६ ॥
गर्भश्च जायते देवि तद्गर्भपतनं भवेत् ।
रोगमुग्रं भवेद्देवि न सुखं जायते खलु ॥ १० ॥
शान्तिं शृणु वरारोहे यतः पापक्षयो भवेत् ।
षडंशं च ततो देवि ब्राह्मणाय समर्पयेत् ॥ ११ ॥
दशवर्णां ततो दद्याद्विप्राय ज्ञानिने प्रिये ।
गायत्रीमूलमन्त्रेण लक्षजाप्यं च कारयेत् ॥१२॥
पक्वान्नेनैव भो देवि ब्राह्मणान् भोजयेच्छतम् ।
वृक्षस्वर्णस्य वै देवि फलपुष्पसमन्वितम् ॥ १३ ॥

दद्याद्विप्राय विदुषे पलं दशप्रमाणकम् ।
सूर्यस्य पूजनं चैव रविवारे विशेषतः ॥ १४ ॥
एवंकृते वरारोहे शीघ्रं पुत्रश्च जायते ।
ज्वरस्य वै भवेन्मुक्तिः काकवन्ध्या सुतं लभेत् ॥ १५ ॥
मृतवत्सा लभेत्पुत्रं चिरञ्जीविनमुत्तमम् ॥ १६ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
विशाखानक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं
नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

अथाष्टषष्टितमोऽध्यायः ।

शिव उवाच ।

कल्याणनगरे गौरि मायापुर्याः समीपतः ।
वणिग्जनोवसत्तत्र धनाढ्यो धनगर्वितः ॥ १ ॥
क्रयकृत्सर्ववस्तूनां विक्रयं च सदाकरोत् ।
महालोभवशाद्देवि न दत्तं पापिना क्वचित् ॥ २ ॥
तस्य भार्या विशालाक्षी पुंश्चली कुलटाधमा ।
यमौ पुत्रौ वरारोहे पुंश्चल्यां जज्ञिरे तदा ॥ ३ ॥

एको द्यूतरतः पुत्रो द्वितीयो ब्राह्मणीरतः।
वैश्येनैव विशालाक्षि धनं च बहु सञ्चितम् ॥ ४ ॥
प्रत्यहं भुज्यते छागविक्रयं कुरुते सदा।
वृद्धे सति महादेवि वैश्यस्य मरणं ह्यभूत् ॥ ५ ॥
यमदूतैस्तदा बद्धा निक्षिप्तो नरकार्णवे।
स्वरूपं दर्शयामास तस्मै वैश्याय सूर्यजः ॥ ६ ॥
नवत्यब्दसहस्राणि घोरे नरकदारुणे।
महाकष्टं तदा दत्तं कृमिभिर्घोररूपिभिः ॥ ७ ॥
ततो व्याघ्रस्य वै योनिं काककुक्कुटयोः पुनः।
मानुषत्वं ततो यातः पुत्रकन्याविवर्जितः ॥ ८ ॥
पुनर्विवाहिता सा तु या पत्नी पूर्वजन्मनि।
रोगवान् सापि रोगार्त्ता मृतवत्सा पुनः पुनः ॥ ९ ॥
एकापत्या भवेद् दुष्टा न स्यादन्यसुतः प्रिये।
यदा सर्वस्वदानं वै सूर्यस्याराधनं तदा ॥ १० ॥
हरिवंशश्रुतिश्चैव दुर्गास्तोत्रजपस्तदा।
गायत्रीमूलमन्त्रेण लक्षजाप्यं यदा भवेत् ॥११॥

तदा पुत्रो भवेद्देवि व्याधिनाशो भवेद् ध्रुवम् ॥१२॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे अनुराधानक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं नामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥

अथैकोनसप्ततितमोऽध्यायः ।

शिव उवाच ।

मगधे वै शुभे देशे काष्ठकारोऽवसत्प्रिये ।
पुत्रपौत्रसमायुक्तो धनाढ्यो गुणवानपि ॥ १ ॥
यदा चार्द्धं वयो यातं दरिद्रत्वं तदागमत् ।
गृहीतं यतिनो द्रव्यं शतपञ्चपलं तथा ॥ २ ॥
व्ययं कृत्वा तदा तेन न दत्तं यतिने शिवे ।
ततस्तस्य ह्यभून्मृत्युः काष्ठकारस्य मागधे ॥ ३ ॥
द्वे दत्त्वा कपिले गावौ स्वर्णरौप्यविभूषिते ।
पुत्रेणापि कृतं श्राद्धं शास्त्ररीत्या गयादिकम् ॥४॥
यक्षलोकं तदा यातो वर्षं शतसहस्रकम् ।
पुनः पुण्यक्षये जाते कपियोनिं ततोलभत् ॥ ५ ॥

ऋक्षस्यैव पुनर्योनिं मानुषत्वं ततोगमत् ।
धनधान्यसमायुक्तो गुणज्ञोप्यतिसुन्दरः ॥ ६ ॥
पूर्वजन्मनि भो देवि काष्ठच्छेदः कृतः सदा ।
तेन पापेन भो देवि शरीरे महती व्यथा ॥ ७ ॥
यतिद्रव्यं गृहीतं च न दत्तं यतिने तदा ।
तेन जातः सुतो देवि ऋणसम्बन्धकारणात् ॥ ८ ॥
द्यूतवेश्यारतो नित्यं पितृमात्रोर्विरोधकृत् ।
युवारूपो यदा जातस्तदा मृत्युर्भवेद् ध्रुवम् ॥ ९ ॥
पुनः पुत्रस्य संदेहः काकवन्ध्यात्वमाप्नुयात् ।
पत्नी तस्य वरारोहे मृतवत्सा पुनः पुनः ॥ १० ॥
अस्य शान्तिमहं वक्ष्ये शृणु देवि प्रयत्नतः ।
गृहवित्ताष्टमं भागं पुण्यकार्यं च कारयेत् ॥ ११ ॥
सूर्यमन्त्रस्य वै जाप्यं वैदिकस्य वरानने ।
आकृष्णेति महामन्त्रः सर्वव्याधिविनाशनः ॥ १२ ॥
सर्वकामप्रदो देवि मोक्षदो मुक्तिकारणम् ।
सूर्यदेवस्य यो भक्तिं कुरुते नियतो नरः ॥ १३ ॥

न किंचिद्दुर्लभन्तस्य पुत्रश्चैव धनं बहु ।
ममातीव प्रियो नित्यं सूर्यदेवे ह्युपासिते ॥ १४ ॥
मद्गणास्तं हि रक्षन्ति यतश्च मत्कलारविः ।
कमलं सूज्ज्वलं देवि वंशपात्रं सुशोभनम् ॥ १५ ॥
तस्योपरि सुवर्णस्य सूर्यं रत्नविभूषितम् ।
पलपञ्चमितं देवि मन्त्रेणानेन पूजयेत् ॥ १६ ॥
ॐ नमः सूर्याय देवाय भद्राय भद्ररूपिणे ।
पूर्वजन्मकृतं सर्वं मम पापं व्यपोहतु ॥ १७ ॥
प्रतिमां पात्रसंयुक्तां ब्राह्मणाय च दापयेत् ।
ततो गां कपिलां शुभ्रां सवत्सां स्वर्णभूषिताम् १८॥
ब्राह्मणाय ततो दद्यात् पट्टवस्त्रेण संयुताम् ।
सप्तमीरविसंयुक्तो पोष्टव्याङ्गनया सह ॥ १९ ॥
पूर्वजन्मकृतं पापं नश्यत्येवं कृते प्रिये ।
रोगाः सर्वे क्षयं यान्ति पुत्रलाभो भवेद् ध्रुवम्॥२०॥
काकवन्ध्या लभेत्पुत्रं मृतवत्सा च पुत्रिणी॥२१॥
इतिश्रीक.अनु.न.२ चरणैकोनसप्ततितमोऽध्यायः।

अथ सप्ततितमोऽध्यायः ।

शिव उवाच ।

सुकर्मनगरं ख्यातं सौराष्ट्रविषये शुभे ।
तत्रातिष्ठत्खलो विप्रो ब्रह्मकर्मविवर्जितः ॥ १ ॥
विक्रेता सर्ववस्तूनां गोवाजिकरिणां तथा ।
राजमृत्युं समालोक्य ग्रामदाहस्तथा कृतः ॥ २ ॥
ब्राह्मणा बहवस्तत्र ब्राह्मण्यश्च तथा शिवे ।
मृता ग्रामस्य वै दाहे बह्व्यो गावो मृताः खलु ॥ ३ ॥
ततो बहुतिथे काले मृतः सोपि द्विजाधमः ।
ततस्तु यमदूतेन नरके घोरकर्दमे ॥ ४ ॥
यमाज्ञया च निक्षिप्तः कष्टं भुक्तं मुहुर्मुहुः ।
नरकान्निर्गतो देवि गजयोनिं ततोऽलभत् ॥ ५ ॥
कच्छपत्वं ततो यातः काकयोनिस्ततोऽभवत् ।
मानुषत्वं ततो यातः कुले महति शोभने ॥ ६ ॥
सर्वसंपत्तिसंयुक्तो वंशस्तस्य न जायते ।
बहुकन्यासमायुक्तो रोगयुक्तो भवेन्नरः ॥ ७ ॥

भार्या तस्य ज्वरग्रस्ता मासे वर्षे भवेज्ज्वरः ।
अतः शान्तिं प्रवक्ष्यामि यतः खलु सुखी भवेत् ॥ ८ ॥
चतुर्भागं गृहद्रव्यं ब्राह्मणाय समर्पयेत् ।
प्रयागे मकरे मासि पत्न्या सह वरानने ॥ ९ ॥
स्नानं तु नियतः कुर्य्यात्सप्ताहं च ततः शिवे ।
हेमदानं ततः कुर्य्याद्भूमिदानं च पार्वति ॥ १० ॥
गायत्रीजातवेदाभ्यां त्र्यम्बकेण तदा जपम् ।
दशायुतप्रमाणेन हवनं मार्जनं तथा ॥ ११ ॥
ब्राह्मणान् भोजयेद्भक्त्या पक्वान्नैः पायसेन च ।
विप्रेभ्यो दक्षिणां दद्याद्धस्त्ररत्नविभूषिताम् ॥ १२ ॥
दशवर्णास्ततो दद्याद्धरिवंशश्रुतिस्तथा ।
एवंकृते वरारोहे शीघ्रं पुत्रमवाप्नुयात् ॥ १३ ॥
काकवन्ध्या लभेत्पुत्रं पुनर्देवि न संशयः ।
रोगाः सर्वे क्षयं यान्ति मृतवत्सा लभेत् सुतम् १४

इति श्रीक० अनुराधा नक्षत्रस्य ३ चरणप्रायश्चित्तकथनं नाम सप्ततितमोऽध्यायः ॥ ७० ॥

अथैकसप्ततितमोऽध्यायः ।

शिव उवाच ।

बन्दीजनोऽवसच्चैकः सौराष्ट्रविषये शुभे ।
स कविर्भाग्यवान्देवि स्वधर्मनिरतः सदा ॥ १ ॥
तस्य स्त्री सुन्दरी देवि पतिसेवासु तत्परा ।
एकस्मिन् दिवसे देवि ब्रह्मचारी समागतः ॥ २ ॥
आतिथ्यकरणे तस्य चासमर्थस्तथा शिवे ।
उपोषणं कृतं तेन द्वारे बन्दिजनस्य च ॥ ३ ॥
प्रभाते स वरारोहे शापं दत्त्वा गतस्तु वै ।
ततस्तु दैवयोगेन मार्जारी तत्र सूतिका ॥ ४ ॥
पञ्चपुत्रा वरारोहे घातितास्तस्य च स्त्रिया ।
मार्जारी च तदा देवि क्षुधार्ता च तदा मृता ॥ ५ ॥
ततो बहुतिथे काले तस्य मृत्युरभूत्पुरा ।
पत्नी पतिव्रता तस्य सती जाता च तत्क्षणात् ॥६॥
सत्यलोके वरारोहे युगमेकमुवास सः ।
पत्न्या सह वरारोहे सौख्यं हि मानसेप्सितम् ॥७॥

भुक्तं देवाङ्गना सार्द्धं पुनः पुण्यक्षये सति ।
मानुषत्वं ततो लेभे सह पत्न्या वरानने ॥ ८ ॥
धनधान्यसमायुक्तो वरा भार्य्या विवाहिता ।
पुत्राश्च बहवो जातास्तेषां मृत्युरभूत्किल ॥ ९ ॥
सा ज्वरेण समुद्विग्ना मध्ये तापयुता पुनः ।
तस्य पापस्य वै शान्तिं शृणु त्वं गिरिजे वरे॥१०॥
जातवेदस्य मन्त्रेण लक्षजाप्यं च कारयेत् ।
बिडाली प्रतिमां कृत्वा पञ्चबालेन संयुताम् ॥११॥
स्वर्णस्याथ च रौप्यस्य पलपञ्चदशस्य तु ।
सवस्त्रां वै तदा दद्याद्ब्राह्मणाय वरानने ॥ १२॥
गामेकां रक्तवर्णां च तां विप्राय प्रदापयेत् ।
अमायां पिण्डदानं च सोमवारे तथा गुरौ ॥ १३॥
व्रतं च रविसप्तम्यां कुर्य्याद्वै भार्यया सह ।
ततः पुत्रो भवेद्देवि चिरंजीवी तथोत्तमः ॥ १४ ॥
व्याधिनाशो भवेद्देवि वन्ध्यात्वं च प्रशाम्यति॥१५॥
इति श्रीक. अनु. न.४चरणेक.सप्ततितमोऽध्यायः ।

अथ द्विसप्ततितमोऽध्यायः ।

शिव उवाच ।

ब्राह्मणो न्यवसच्चैको महाराष्ट्रपुरे शुभे ।
स वेदपाठतत्त्वज्ञो वेदपाठं सदाऽकरोत् ॥ १ ॥
तडागं खानयामास तत्र द्रव्यं च लब्धवान् ।
द्रव्यस्यार्थं तदा देवि विग्रहो भ्रातरं प्रति ॥ २ ॥
भ्रात्रा तस्य महादेवि द्रव्यार्थं भक्षितं विषम् ।
बहुकाले तदा देवि व्ययं सर्वधनं कृतम् ॥ ३ ॥
ततश्च पञ्चतां यातो ब्राह्मणश्च सुरेश्वरि ।
यमदूतैर्महाघोरैर्नरके देवि कर्दमे ॥ ४ ॥
षष्टिवर्षसहस्राणि निक्षिप्तश्च यमाज्ञया ।
भुक्त्वा नरकजं दुःखं काकयोनिरभूत्पुनः ॥ ५ ॥
पुनर्मानुषयोनिं च पुत्रकन्याविवर्जितः ।
पूर्वजन्मनि भो देवि भ्रात्रंशं नैव दत्तवान् ॥ ६ ॥
तेन पापेन भो देवि महारोगसमुद्भवः ।
अस्य शान्तिं प्रवक्ष्यामि शृणु त्वं गिरिजे वरे ॥७॥

गृहवित्ताष्टमैर्भागैः पुण्यकार्यं च कारयेत् ।
वापीकूपतडागादिजीर्णोद्धारं प्रयत्नतः ॥ ८ ॥
प्रतिमां कारयेद्देवि स्वर्णां पलदशस्य तु ।
भ्रातुश्चित्रं तदा देवि पूजयित्वा यथाविधि ॥ ९ ॥
गन्धधूपादिभिर्देवि भूषणैर्विविधैरपि ।
गायत्रीलक्षजाप्येन दशांशहवनेन तु ॥ १० ॥
प्रयागे मकरे स्नानं सर्वपापक्षयो भवेत् ।
ब्राह्मणाय ततो दद्याद्गां च दद्यात्पयस्विनीम्॥११॥
भूमिं वृत्तिकरीं दद्यात् पुत्रपौत्रानुयायिनीम् ।
अश्वदानं ततो दद्याद् ब्राह्मणान् भोजयेत्ततः॥ १२॥
एवंकृते वरारोहे पुत्रो भवति नान्यथा ।
व्याधिस्तस्य निवर्तेत काकवन्ध्या लभेत्सुतम् १३
मृतवत्सा लभेत्पुत्रं चिरंजीविनमुत्तमम् ॥ १४ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
ज्येष्ठानक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं
नाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

अथ त्रिसप्ततितमोऽध्यायः ।

शिव उवाच ।

पट्टने वै पुरे शुभ्रे लोहकारोऽवसत्पुरा ।
गोवर्द्धनाभिधः पत्नीयुक्तोभूत्परमेश्वरि ॥ १ ॥
धनधान्यसमायुक्तो धर्मकर्मरतस्तथा ।
तस्य पुत्रद्वयं जातं लोहकारस्य पार्वति ॥ २ ॥
ज्येष्ठपुत्रश्च भो देवि भार्यया सह तेन वै ।
निस्सारितो गृहाद्देवि दत्तं तस्मै न किंचन ॥ ३ ॥
एको गृहे स्थितः पुत्रो द्रव्यं तस्मै प्रदत्तवान् ।
लोहकारेण भो देवि स्वभार्या पुत्रसंयुता ॥ ४ ॥
त्यक्ता चैव महादेवि गोपालस्य तु कन्यका ।
भार्या कृता पुनस्तेन पत्न्यास्त्यागश्च वै कृतः॥५॥
ततो बहुगते काले लोहकारस्य वै शिवे ।
व्याघ्रेण मरणं जातं यमदूतैर्यमाज्ञया ॥ ६ ॥
निक्षिप्तो नरके घोरे कृमिविष्ठादिसंयुतः ।
त्रिंशद्वर्षसहस्राणि भुक्त्वा नरकयातनाम् ॥ ७ ॥

नरकान्निर्गतो देवि मानुषत्वं ततोऽलभत् ।
पुनः सर्पस्य योनिश्च ततो नकुलतां गतः ॥ ८ ॥
मानुषत्वं ततो देवि धनधान्यसमाकुलः ।
शूरोऽभूत्किल विज्ञश्च ज्ञानवान् राजवल्लभः ॥९॥
पुरैव यत्कृतं सर्वं तत्प्राप्नोति न संशयः ।
पुरैव कार्त्तिके मासि पौर्णमास्यां सदाशिवे ॥१०॥
धेनुः प्रदत्ता युवती विधिवन्मम वल्लभे ।
तेन दानफलेनेह धनाढ्यत्वं प्रलब्धवान् ॥ ११ ॥
स्वभार्यां च परित्यज्य परकीया रतः स वै ।
अतः पुत्रस्य वै मृत्युः पुनः पुत्रो न जायते ॥१२॥
कन्यकाजनयित्री च तस्य भार्याभवत्खलु ।
पुत्रस्त्रियश्च कृतवान् त्यागं परकलत्रवान् ॥१३॥
तत्पापेन महादेवि रोगग्रस्तकलेवरः ।
व्याधयश्च समुत्पन्ना दद्रुपामादयस्तदा ॥ १४ ॥
ख्यातवंशे समुत्पन्नो भूमिभागं न लब्धवान् ।
अथ शांतिं प्रवक्ष्यामि पूर्वपापविशुद्धये ॥ १५ ॥

एकादशीव्रतं नित्यं षडंशं दानमाचरेत् ।
षडङ्गं पाठयेन्नित्यं रुद्रपूजनपूर्वकम् ॥ १६ ॥
हरिवंशश्रुतिं कुर्याच्चण्डीपाठं निरन्तरम् ।
तिलधेनुप्रदानं वै ह्यमाश्राद्धं विशेषतः ॥ १७ ॥
एवंकृते महादेवि पुत्रस्तस्य भविष्यति ।
वन्ध्यात्वं प्रशमं याति सर्वरोगक्षयो भवेत् ॥ १८ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे ज्येष्ठानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

अथ चतुःसप्ततितमोऽध्यायः ।

शिव उवाच ।

बीजापुरमिति ख्यातं पुरं देवि मनोहरम् ।
न्यवसन् बहवो वर्णा ब्राह्मणाश्च वणिग्जनाः ॥ १ ॥
तन्मध्ये शूद्र एको हि ताम्बूलं च करोति सः ।
सुरापी च स वै नित्यं ताम्बूलविक्रयी शिवे ॥ २ ॥
तस्य पुत्रद्वयं जातं धनं च बहु संचितम् ।

ततस्तु दैवयोगेन महाधनमदेन च ॥ ३ ॥
ज्येष्ठपुत्रस्य हननं कृतं तेन वरानने ।
स्वभार्यार्थे तदा नीता पत्नी तस्य तु तेन हि ॥ ४ ॥
पुत्राभ्यां च भवेद्वैरं पत्न्या सह विशेषतः ।
प्रत्यहं भजते सोपि पुत्रपत्नीं तथाऽधमः ॥ ५ ॥
एवं बहुदिने जाते तस्य मृत्युरभूच्छिवे ।
ततो वै नरके घोरे यमदूतैर्यमाज्ञया ॥ ६ ॥
निक्षिप्तो वै ततो देवि षष्टिवर्षसहस्रकम् ।
कृमिभिर्घोरवक्त्रैश्च भुक्त्वा नरकयातनाम् ॥७॥
नरकान्निर्गतो देवि शुनो योनिं ततोऽलभत् ।
ततो वृषभयोनिं च मानुषत्वं ततो गतः ॥ ८ ॥
पूर्वजन्मनि भो देवि दशवर्णा ददौ बहु ।
तत्फलेनेह भो देवि धनधान्ययुतस्तदा ॥ ६ ॥
पुत्रपत्न्यां च भोगार्थे पुत्रस्यैव वधः कृतः ।
तत्पापफलतो देवि ह्यपुत्रश्च ज्वरी तथा ॥ १० ॥
व्याधिश्च बहुधा तस्य चाङ्गे च महती तथा ।

महाचिन्तां समापन्नो ह्यतः शान्तिं शृणु प्रिये॥११॥
स्ववित्तस्य तृतीयांशं प्रगृह्य हरवल्लभे।
कूपं च खनयेत्कान्ते तडागं जीर्णमुद्धरेत्॥ १२ ॥
पौर्णमासीव्रतं देवि सकलत्रः समाचरेत्।
शिवस्य पूजनं लक्षं ब्राह्मणेभ्यश्च कारयेत्॥१३॥
कृष्णां च गां च वृषभं ब्राह्मणाय प्रदापयेत्।
गायत्रीमूलमन्त्रेण तथा लक्षप्रमाणतः॥ १४ ॥
जपं वै कारयेत्तत्र हवनं तद्दशांशतः।
मार्जनं तर्पणं देवि दशांशं स च कारयेत्॥ १५ ॥
पुत्रस्य प्रतिमां तद्वत्स्वर्णवस्त्रसमन्विताम्।
पलपञ्चदशस्यैव निर्मितां रत्नभूषिताम्॥ १६ ॥
पूजां कृत्वा विधानेन ब्राह्मणाय प्रदापयेत्।
एवं कृते न संदेहः शीघ्रं पुत्रमवाप्नुयात्॥ १७ ॥
व्याधिश्च प्रशमं यायात्काकवन्ध्या लभेत्सुतम्।
मृतवत्सा लभेत्पुत्रं चिरञ्जीविनमुत्तमम्॥ १८ ॥
इति श्रीक.ज्ये.न.३ च. चतुःसप्ततितमोऽध्यायः ७४

अथ पञ्चसप्ततितमोऽध्यायः ।

शिव उवाच ।

चतुर्भुजाभिधे क्षेत्रे वेणीपश्चिमतः शिवे ।
पट्टकारोऽवसद्देवि लक्ष्मणेति च सञ्ज्ञकः ॥ १ ॥
तस्य पत्नी विशालाक्षि परपुंसि रता सदा ।
पुत्राश्च बहवो जाता धनं च बहु सञ्चितम् ॥ २ ॥
क्रयविक्रयधर्मेण व्ययकारी दिने दिने ।
तस्य गेहेऽकरोद्वासं चटकानामपक्षिणी ॥ ३ ॥
एकस्मिन्समये देवि चाण्डान्साऽसूत तत्र वै ।
बहून्वै पोषितांश्चाण्डान् सपक्षान्कृतवांस्तथा ॥ ४ ॥
फलं गृह्य सदा पक्षी मध्याह्ने बालकान्प्रति ।
भोजनं प्रददौ नित्यं स्वकुलाय तदा शिवे ॥ ५ ॥
ततस्तु दैवयोगेन पट्टकारस्तु तद्गृहे ।
भोजनार्थं गतो देवि पत्नी चाऽन्नं तदाप्यदात् ॥ ६ ॥
भुक्तं च विविधं चान्नं तत्क्षणे पक्षिबालकाः ।
विष्ठां चक्रुस्तथा दृष्ट्वा पट्टकारो रुषा खलु ॥ ७ ॥

कुलं तस्याकरोन्नष्टं बालानां हननेन सः ।
एवं बहुगते काले पट्टकारस्य सुव्रते ॥ ८ ॥
गङ्गायां मरणं जातं भार्यया सहितस्य वै ।
स्वर्गवासोऽभवद्देवि पट्टकारस्य सुव्रते ॥ ९ ॥
सप्ततिर्वै सहस्राणि स्वयं भुक्त्वा फलं बहु ।
पुनः पुण्यक्षये जाते स्वर्गभ्रष्टो यदाभवत् ॥ १० ॥
मनुष्यश्चाऽभवद्देवि गङ्गागण्डकिमध्ययोः ।
धनधान्यसमायुक्तो विवाहमकरोद्यदा ॥ ११ ॥
पूर्वजन्मस्थिता भार्या सा तस्य गृहमेधिनी ।
प्रेष्ययुक्ताऽभवत्सा तु गर्भस्य पतनं मुहुः ॥ १२ ॥
कन्यका नैव जायन्ते पुत्रस्यैव तु का कथा ।
ज्वरयुक्ता सदा नारी स्वशरीरेऽभवत्खलु ॥ १३ ॥
सुखं न लभते क्वापि दुःखं याति दिने दिने ।
अस्य शान्तिं प्रवक्ष्यामि शृणु सर्वं वरानने ॥१४॥
चन्द्रार्कयोर्मन्त्रजपं गायत्रीजपमाचरेत् ।
लक्षमेकं वरारोहे पूर्वपापविशुद्धये ॥ १५ ॥

गृहवित्ताष्टमं भागं पुण्यकार्यं च कारयेत् ।
कपिलां गां सवत्सां च ब्राह्मणाय प्रदापयेत्॥१६॥
दशवर्णास्ततो दद्याद्ब्राह्मणान्भोजयेत्ततः ।
चटकस्याकृतिं कृत्वा सार्भकस्य वरानने ॥ १७ ॥
रौप्यस्य ताम्रस्वर्णस्य पञ्चविंशपलस्य तु ।
ब्राह्मणाय ततो दद्याद्भूमिदानं विशेषतः ॥ १८ ॥
हरिवंशश्रुतिं कुर्याद्भार्यया सहितस्तु वै ।
हवनं तर्पणं कुर्यान्मार्जनं तु ततः परम् ॥ १९ ॥
जातवेदेति मन्त्रेण दशायुतजपं तथा ।
गोपालमन्त्रजपनात्पुत्रलाभो भवेदनु ॥ २० ॥
रोगनाशो भवेद्देवि काकवन्ध्या लभेत्सुतम् ॥२१॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
ज्येष्ठानक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं
नाम पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

अथ षट्सप्ततितमोऽध्यायः ।

शिव उवाच ।

अयोध्यानगरे देवि कायस्थोऽवसदद्विजे ।
रामदास इति ख्यातस्तस्य भार्या तु देविका ॥ १ ॥
विष्णुभक्तिरतो नित्यं ब्राह्मणस्य च सेवकः ।
भार्या पतिव्रता तस्य पतिसेवासु तत्परा ॥ २ ॥
भाग्यवान् सर्ववस्तूनां विक्रेता गजवाजिनाम् ।
तस्य सखाऽभवद्विप्रो ब्राह्मणो वेदपारगः ॥ ३ ॥
आगतो वै गृहे तस्य प्रेम्णा मित्रस्य भामिनि ।
चतुर्मास्ये स्थितस्तत्र स्वर्णं शतपलं तदा ॥ ४ ॥
कायस्थस्य गृहे तत्तु स्थापितं ब्राह्मणेन वै ।
वाराणस्यां गतो देवि स्नानार्थं स द्विजोत्तमः ॥५॥
शरीरं त्यक्तवांस्तत्र ब्रह्मचारी द्विजस्तदा ।
ततो बहुगते काले कायस्थस्य दरिद्रता ॥ ६ ॥
तद्धनं ब्राह्मणस्यैव भुक्तं तेन वरानने ।
कालव्यालस्य कवलः कायस्थः कामिनीयुतः ॥७॥

अयोध्यायामभूद्देवि तयोः स्वर्गो ह्यजायत।
नवत्यब्दसहस्राणि ब्रह्मलोके वरानने ॥ ८ ॥
भुक्तं सौख्यमनेकं तु देवानामपि दुर्लभम्।
ततः पुण्यक्षये जाते मर्त्यलोके सुरेश्वरि ॥ ९ ॥
तत्पापेनाभवद्देवि कन्यापुत्रप्ररोधनम्।
अस्य पापस्य वै शान्तिं शृणु त्वं परमेश्वरि ॥१०॥
प्रायश्चित्तं महादेवि पूर्वजन्मसमुद्भवम्।
गृहवित्तषडंशेन ततो दानं प्रकल्पयेत् ॥ ११ ॥
गायत्रीत्र्यम्बकाभ्यां च जातवेदेन चानघे।
जपं वै कारयेत्कान्ते प्रतिमन्त्रं दशायुतम् ॥१२॥
ततो होमं दशांशेन तर्पणं मार्जनं तथा।
पलैर्दशमितैर्हैमैर्ब्राह्मणस्य तदाकृतिम् ॥ १३ ॥
पूजयित्वा यथान्यायं ब्राह्मणाय ततो ददेत्।
ततो गां कपिलां दद्यात्स्वर्णवस्त्रविभूषिताम्॥१४॥
प्रतिवर्षं ततो देवि दशवर्णां ददेत्पुनः।
एवंकृते न संदेहो वंशो ह्यस्य भवेत्खलु ॥ १५ ॥

रोगः शरीरजन्यो यस्तस्य नाशः प्रजायते ।
काकवन्ध्या लभेत्पुत्रं मृतवत्सा ततः प्रिये ॥१६॥
लभेत्तु सुसुतं चैव नात्र कार्या विचारणा ॥ १७ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
मूलनक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं
नाम षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

अथ सप्तसप्ततितमोऽध्यायः ।

शिव उवाच ।

पश्चिमस्यामयोध्यायां योजनानां त्रयोपरि ।
राघवस्य पुरे देवि न्यवसन्बहवो जनाः ॥ १ ॥
तन्मध्ये ब्राह्मणो ह्येको योगशर्माद्रिनन्दिनि ।
तस्य पत्नी समाख्याता गुणज्ञा परमा शुभा ॥२॥
तत्र वासो भवेद्देवि ज्ञानिनस्तस्य कामिनी ।
स पुरोधा महादेवि धनाढ्यः कृपणस्तथा ॥ ३ ॥
प्रतिग्रहेण भो देवि व्ययकारी दिने दिने ।
तस्य भ्राता कनिष्ठश्च व्यापारकरणे रतः ॥ ४ ॥

उभौ द्वौ ब्राह्मणौ देवि शान्तिमन्तौ परस्परम् ।
ततो बहुगते काले वैरं जातं तदा शिवे ॥ ५ ॥
स्वधनस्य विभागार्थं युद्धं जातं सुदारुणम् ।
तदुद्देशेन भो देवि मृतो भ्राता कनिष्ठकः ॥ ६ ॥
तद्धनं गृह्य वै स्वर्णं सर्वं पुत्राय दत्तवान् ।
दानं नैव कृतं तेन ततो वै मरणं खलु ॥ ७ ॥
यमदूतैर्महाघोरे निक्षिप्तो रक्तकर्दमे ।
बहून्यब्दसहस्राणि भुक्त्वा नरकयातनाम् ॥ ८ ॥
नरकान्निर्गतो देवि गर्दभत्वमजायत ।
वृकयोनिस्ततो भूत्वा मानुषत्वं ततोऽभवत् ॥ ९ ॥
वेदविद्यारतो देवि कन्यावान् पुत्रवर्जितः ।
रोगयुक्तो महादेवि सदाभिक्षारतो नरः ॥ १० ॥
पूर्वपापविशुद्ध्यर्थं प्रायश्चित्तं शृणुष्व मे ।
हरिवंशश्रुतिं कुर्याच्छिवपूजनमेव च ॥ ११ ॥
अमायां पिण्डदानं च गोदानं च विशेषतः ।
षडक्षरं तथा मन्त्रं शुद्धं मम सुरेश्वरि ॥ १२ ॥

जपं वै कारयेत्सत्यं दशलक्षं वरानने ।
होमं वै कारयेत्कान्ते कुण्डे चित्रे वरानने ॥ १३ ॥
चतुरस्रे वरारोहे तिलधान्यादितण्डुलैः ।
प्रतिमां कारयेत्कान्ते भ्रातुः स्वर्णस्य वै शिवे ॥ १४ ॥
पलैर्द्विपञ्चसंख्याकैर्मन्त्रेणानेन पूजयेत् ।
"ॐ नमः सवित्रे देवाय वेदवेदाङ्गधारिणे ॥ १५ ॥
पूर्वजन्मकृतं सर्वं मम पापं व्यपोहतु ।
अज्ञानाद्वा प्रमादाद्वा भ्रातुरंशापहारतः ॥ १६ ॥
त्वदर्थे गौर्मया दत्ता सूर्यदेवाय ते नमः ।"
प्रतिमां पूजयित्वा तु ब्राह्मणाय ददेत सः ॥ १७ ॥
एवंकृते विधाने च शीघ्रं पुत्रमवाप्नुयात् ।
काकवन्ध्या पुनः पुत्रजनयित्री भवेद्ध्रुवम् ॥ १८ ॥
व्याधयो नाशमायान्ति तूलराशिर्यथाऽनले ॥ १९ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
मूलनक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं
नाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

अथाष्टसप्ततितमोऽध्यायः ।

शिव उवाच ।

सरय्वाश्चोत्तरे कूले मङ्गलं नाम वै पुरम् ।
तत्र क्षत्त्रयवसञ्चैको मद्यमांसस्य भोगकृत् ॥ १ ॥
भावसेनश्च नाम्ना स तस्य पत्नी मनोहरा ।
वेश्याद्यूतरतश्चासौ लुब्धश्चौरेषु सम्मतः ॥ २ ॥
प्रत्यहं चौरकृत्येन धनसञ्चयसंमुखः ।
ततो बहुगते काले तस्य मृत्युरभूत्किल ॥ ३ ॥
सर्पेणापि महादेवि यमदूतैर्यमाज्ञया ।
रौरवे नरके क्षिप्तः षष्टिवर्षसहस्रकम् ॥ ४ ॥
नरकान्निर्गतो देवि व्याघ्रयोनिं ततोऽलभत् ।
मानुषत्वं ततो लेभे कुले महति पूजिते ॥ ५ ॥
पूवजन्मनि भो देवि दीपदानं कृतं यतः ।
तत्फलेन महादेवि धनाढ्यत्वमजायत ॥ ६ ॥
मद्यपानफलाद्देवि नानाज्वरसमुद्भवः ।
वेश्यासुरतसंयुक्तो यतोभूत्पूर्वजन्मनि ॥ ७ ॥

तेन पापेन भो देवि पुत्राणां मरणं खलु ।
मनस्युद्वेगता नित्यं जातो द्यूतरतः पुरा ॥ ८ ॥
अस्य शान्तिं प्रवक्ष्यामि सर्वपापविशुद्धये ।
गृहवित्तषडंशेन पुण्यकार्यं च कारयेत् ॥ ९ ॥
वापीकूपतडागांश्च पथिमध्ये च कारयेत् ।
गायत्रीमूलमन्त्रेण लक्षजाप्यं वरानने ॥ १० ॥
दशांशं हवनं तद्वत्तर्पणं मार्जनं तथा ।
दशवर्णां ततो दद्याद्वृषभेण समन्विताम् ॥ ११ ॥
एवं पापविशुद्धिः स्यान्नात्र कार्या विचारणा ।
पुत्रश्च जायते देवि वन्ध्यात्वं च प्रणश्यति ॥ १२ ॥
मृतवत्सा लभेत्पुत्रं चिरञ्जीविनमुत्तमम् ।
रोगा विनाशमायान्ति व्याधयश्च तथा शिवे ॥ १३ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे मूलनक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

अथैकोनाशीतितमोऽध्यायः।

शिव उवाच।

मध्यदेशे विशालाक्षि हिडम्बं नाम वै पुरम्।
लवणाकारोऽवसत्तत्र भीमो गुणविचक्षणः॥ १॥
प्रत्यहं लवणं कृत्वा विक्रयं चाकरोत्सदा।
तस्य भार्य्या पुण्यवती पुत्रत्रयमजीजनत्॥ २॥
धनधान्यवृषच्छागगोमाहिष्यादिकं तथा।
बहूनि संचितानि स्युर्लवणस्यालयः प्रिये॥ ३॥
तस्य ज्येष्ठः सुतो देवि वेश्यासुरततत्परः।
एकस्मिन्समये देवि लवणाब्धौ निशामुखे॥ ४॥
स्त्रिया सहाद्रितनये वृषभौ पतितौ तदा।
श्रुत्वा तत्र तदा देवि निशायां न गतोपि सः॥५॥
त्रयाणां वै भवेन्मृत्युः स्वकाले जातिना सह।
भार्या निःसारिता तेन वृषभौ मृत्युसंयुतौ॥ ६॥
ततः सर्वं वयो जातं वृद्धे सति वरानने।
मरणं तस्य वै जातं लवणकारस्य पार्वति॥ ७॥

यमदूतैर्महाघोरैर्नरके घोरसंज्ञके ।
पातितस्तत्र देवेशि द्वाविंशतिसहस्रकम् ॥ ८ ॥
वर्षं सुभुज्यते देवि कृमिसूचिमुखैर्युतम् ।
नरकान्निःसृतो देवि व्याघ्रयोनावजायत ॥ ९ ॥
पुनश्छागस्य वै योनिं बिडालस्य ततोऽगमत् ।
मानुषत्वं ततो लेभे देशे पुण्यतमे शुभे ॥ १० ॥
स्वकर्मवशगो नित्यं धनधान्यसमन्वितः ।
गुणज्ञः सर्वविद्यानां कन्यापुत्रैश्च वर्जितः ॥ ११ ॥
लवणकारस्य मरणं गङ्गायां पूर्वजन्मतः ।
तत्फलेन महादेवि धनाढ्यत्वं प्रजायते ॥ १२ ॥
स्वभार्या पतिता देवि लवणकूपे निशामुखे ।
नैव निःसारिता तेन ततः कन्या प्रजायते ॥ १३ ॥
वृषभौ पतितौ कूपे पातितौ मृत्युमागतौ ।
तेन दोषेण देवेशि पुत्रो नैव प्रजायते ॥ १४ ॥
परस्त्रीरतिसंयोगं यत्कृतं पूर्वजन्मनि ।
तेन पापेन भो देवि शरीरे रोगसम्भवः ॥ १५ ॥

अस्य शान्तिं प्रवक्ष्यामि शृणु देवि सुशोभने।
गृहवित्ताष्टमं भागं ब्राह्मणाय समर्पयेत् ॥ १६ ॥
गायत्रीलक्षजाप्यं च विप्रद्वारा च कारयेत्।
हवनं तद्दशांशेन मार्जनं तर्पणं तथा ॥ १७ ॥
सुवर्णप्रतिमां कृत्वा लक्ष्म्याः पञ्चपलेन वै।
रौप्यस्यैव वरारोहे वृषभौ द्वौ सुनिर्मलौ ॥ १८ ॥
पलैर्दशमितैः कुर्यात्पूजयित्वा यथाविधि।
मन्त्रेणानेन देवेशि स्वोपचारैः पृथक् पृथक्॥१६॥
"ॐ लक्ष्मि देवि महालक्ष्मि कमले सर्वसिद्धिदे।
मम पूर्वकृतं पापं तत्क्षमस्व दयानिधे ॥ २० ॥"

मन्त्रः। ॐ लक्ष्म्यै नमः पाद्यं सम०॥ ॐ लक्ष्म्यै नमः अर्घ्यं०॥ ॐ देव्यै नमः स्नानं०॥ ॐ कमलायै नमः गन्धं०॥ ॐ सर्वायै नमः धूपं० ॥ ॐ सिद्धिदायै नमः दीपं० ॥ ॐ पाद्यादिसर्वाणि दापयेत् ॥

"ॐ नन्दिकेश्वर भूतेश गणानामधिपो भवान्।
मम पूर्वकृतं पापं क्षम्यतां परमेश्वर ॥ २१ ॥

इति मन्त्रेण वृषभौ पूजितौ शुभ्ररूपिणौ ।
पूजयित्वा यथान्यायं ब्राह्मणाय ददेत्ततः ॥२२॥”
ततो गां कपिलां दद्यात्स्वर्णशृङ्गीं सभाषिताम् ।
एवंकृते वरारोहे यत्कृतं पूर्वजन्मनि ॥ २३ ॥
तत्सर्वं नाशमायाति शीघ्रमेव न संशयः ।
पुत्रोपि जायते देवि वन्ध्यात्वं च प्रशाम्यति॥२४॥
रोगाः सर्वे क्षयं यान्ति नात्र कार्या विचारणा ।
मृतवत्सा लभेत्पुत्रं चिरञ्जीविनमुत्तमम् ॥ २५ ॥
काकवन्ध्या लभेत्पुत्रं पुनर्देवि न संशयः ॥ २६ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे मूलनक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं नामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥

अथाशीतितमोऽध्यायः ।

शिव उवाच ।

अयोध्यायां महादेवि वशिष्ठस्यैव चाश्रमे ।
श्रीधनेश्वरशर्म्मेति ब्राह्मणो न्यवसत्प्रिये ॥ १ ॥

स पण्डितो गुणज्ञश्च धनी मानी विचक्षणः ।
स्त्री च पतिव्रता तस्य पतिसेवासु तत्परा ॥ २ ॥
पुत्रद्वयं तथा जातं विद्यावृत्तिर्बभूव सः ।
भागिनेयस्ततो देवि तद्धनेश्वरशर्मणः ॥ ३ ॥
तत्र वासार्थमायातः सपत्नीको वरानने ।
तीर्थयात्राप्रसङ्गेन गृहे तस्यावसद्द्विजः ॥ ४ ॥
मासमेकं स्थितस्तत्र भागिनेयस्ततो मृतः ।
दष्टः सर्पेण देवेशि कालपाशावृतो द्विजः ॥ ५ ॥
वर्षमात्रे ततो जाते भागिनेयस्य या वधूः ।
धनेश्वरे महाप्रीतिमकरोत्सा मम प्रिये ॥ ६ ॥
पुत्राणां मरणं देवि जातं तस्याघरूपिणः ।
गृहे स्वर्णं च रौप्यं च सर्वं तस्यै न्यवेदयत् ॥ ७ ॥
ततो बहुगते काले तस्य मृत्युरभूत्किल ।
यमदूतैर्महाघोरे नरके पातितः शिवे ॥ ८ ॥
यमाज्ञया वरारोहे षष्टिवर्षसहस्रकम् ॥ ९ ॥
अन्यत्रापि कृतं पापं प्रयागे च विनश्यति ।

प्रयागे यत्कृतं पापं रामपुर्यां विनश्यति ॥
अयोध्यायां कृतं पापं वज्रलेपो भविष्यति ॥१०॥
नरकान्निःसृतो देवि बकयोनावजायत ।
पुनर्दर्दुरयोनिं वै काकयोनिं ततोऽगमत् ॥ ११ ॥
पुनर्मानुषयोन्यां वै धनधान्यसमन्वितः ।
जातः पुण्यतमे देशे देवगन्धर्वसेविते ॥ १२ ॥
सर्वविद्यासु विख्यातो गुणज्ञो रूपवांस्तथा ।
पूर्वजन्मनि देवेशि भागिनेयवधूं प्रति ॥ १३ ॥
सम्भोगं कृतवान् विप्रः कुक्षिपीडा ततः परम् ।
वंशच्छेदो विशालाक्षि कन्या वै बहवस्तथा ॥१४॥
भागिनेयस्य वै द्रव्यं भुक्तं पूर्वमनेन वै ।
शरीरे बहुधा पीडा परस्त्रीगमनादनु ॥ १५ ॥
अस्य शान्तिं प्रवक्ष्यामि शृणु त्वं मम वल्लभे ।
गृहवित्तषडंशेन पुण्यकार्यञ्च कारयेत् ॥ १६ ॥
गायत्रीजातवेदाभ्यां जपं वै कारयेत्ततः ।
दशांशं हवनं कृत्वा तर्पणं मार्जनं तथा ॥ १७ ॥

जाणाद्धारं वरारोहे कूपं चैव तडागकम् ।
तद्वदेव च वै कुर्य्यात्षष्टिवृक्षप्ररोपणम् ॥ १८ ॥
प्रयागे माघमासे तु तुलादानं प्रयत्नतः ।
धूम्रवर्णां तथा गां वै दद्याद्विप्राय सत्कृताम् ॥१६॥
एवंकृते वरारोहे पूर्वपापं विशुद्ध्यति ।
पुत्रोपि जायते देवि वन्ध्यात्वञ्च प्रशाम्यति ॥२०॥
काकवन्ध्यात्वशान्त्यर्थं रवियुक्तां तु सप्तमीम् ।
कृत्वा व्रतं वरारोहे सुवर्णं दानमाचरेत् ॥ २१ ॥
शय्यादानं ततो दद्यान्मृतवत्सा सुपुत्रिणी ।
सर्वे रोगाः क्षयं यान्ति नात्र कार्या विचारणा॥२२॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे पूर्वाषाढनक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं नामाशीतितमोऽध्यायः ॥ ८० ॥

अथैकाशीतितमोऽध्यायः ।

शिव उवाच ।

कर्णाटे वै ततो देवि पुरं च शिवसञ्ज्ञकम् ।

वसन्ति तत्र बहवो वैश्याः पण्योपजीविनः ॥ १ ॥
तन्मध्ये वैश्य एको हि धरणीकरविश्रुतः ।
तस्य रूपवती भार्या सुन्दरी बहुसंयुता ॥ २ ॥
व्यापारेण महादेवि धनं च बहु सञ्चितम् ।
ततो बहुदिने काले तस्य मित्रं द्विजोऽप्यभूत् ॥ ३ ॥
ब्राह्मणः सोपि वै भ्रष्टः कष्टं भुक्त्वा दिने दिने ।
स्वर्णं शतपलं देवि हीरकं मौक्तिकं तथा ॥ ४ ॥
स्थापितं ब्राह्मणद्रव्यं स्वगृहे मित्रकारणात् ।
ततो वृद्धे तु संजाते वैश्यमृत्युरभूत्पुरा ॥ ५ ॥
पश्चात्पत्नी मृता तस्य व्रतिनी गर्ववर्जिता ।
वैश्यस्य चाभवत्स्वर्गं दिव्यवर्षसहस्रकम् ॥ ६ ॥
पत्न्या सह वरारोहे भुक्त्वा स्वर्गफलं ततः ।
बकयोनिं ततो लेभे चक्रवाकस्ततोभवत् ॥ ७ ॥
हंसयोन्यां ततो जातो मानुषत्वं ततोऽगमत् ।
पूर्वसम्बन्धतः पूर्वपुण्यात्पातिव्रतादपि ॥ ८ ॥
पुनर्विवाहिता देवि ब्राह्मणस्वापहारतः ।

वन्ध्या जाता तु सा नारी दुःखिता साप्यहर्निशम् ९ ॥
तस्य देहेऽभवद्व्याधिः कफवातसमन्वितः ।
धनाढ्यो बहुधा कन्या जायन्ते च पुनः पुनः ॥१०॥
अस्य निग्रहहेत्वर्थं शृणु सर्वं वरानने ।
यद् गृहे वित्तमर्द्धं तद् ब्राह्मणाय समर्पयेत् ॥११॥
ॐ लक्ष्म्यै नमोऽथ मंत्रेण दशायुतजपं ततः ।
दशांशहवनं तद्वत्तर्पणं मार्जनं तथा ॥ १२ ॥
गामेकां कृष्णवर्णां वै स्वर्णयुक्तां सवत्सकाम् ।
ब्राह्मणाय ततो दद्यान्मुक्तालाङ्गूलसंयुताम्॥१३॥
भोजनं कारयेत्पूज्यान्ब्राह्मणान्वेदपारगान् ।
शतं वा द्विशतं देवि त्रिशतं वा विशेषतः ॥ १४ ॥
पलैः शतैः सुवर्णस्य वेदीं कृत्वा विचक्षणः ।
तन्मध्ये च द्विजस्यैव रौप्यस्यैव च चाकृतिम् १५॥
पूजयेच्छ्रद्धया देवि मन्त्रेणैव पुनः पुनः ॥ १६ ॥
'ब्रह्मंस्त्वं कपिलो विष्णुः सर्वसाक्षी जगन्मयः ।
ममापराधं देवेश क्षम्यतां पूर्वजन्मनः ॥

द्रव्यं मित्रस्य भो देव स्थापितं स्वगृहे मया ॥१७॥
न दत्तं वै मयाऽज्ञानात् क्षम्यतां परमेश्वर ।'
मन्त्रेणानेन देवेशि पूजनं विधिपूर्वकम् ॥ १८ ॥
पूजयित्वा ततो देवि ब्राह्मणाय प्रदापयेत् ।
एवंकृत्वा वरारोहे शीघ्रं पुत्रः प्रजायते ॥ १९ ॥
काकवन्ध्या पुनर्देवि कन्यका जननी तथा ।
पुत्रं प्रसूयते देवि न च कन्यां प्रसूयते ॥ २० ॥
मृतवत्सा लभेत्पुत्रं चिरञ्जीविनमुत्तमम् ।
व्याधयः संक्षयं यान्ति नात्र कार्या विचारणा॥२१॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
पूर्वाषाढनक्षत्रस्य द्वितीयचरणप्रायश्चित्त-
कथनं नामैकाशीतितमोऽध्यायः ॥८१॥

अथ द्व्यशीतितमोऽध्यायः ।

शिव उवाच ।

अन्तर्वेदे विशालाक्षि लोध्रोऽवात्सीत् स पुण्यकृत् ।
गंधर्वाख्ये पुरे देवि विख्याते यमुनान्तरे ॥ १ ॥

सुभाग्यवान् गुणज्ञो हि बहुभृत्यैः सुपूजितः ।
भूपतिस्तस्य देशस्य दाता भोक्ता विचक्षणः ॥२॥
ब्राह्मणस्य हृता भूमिरज्ञानाद्वै सुरेश्वरि ।
ब्राह्मणोऽपि विषं भुक्त्वा मृतस्तस्योपरि प्रिये ॥३॥
ततो बहुगते काले तस्य मृत्युरभूत्पुरा ।
यमदूतैर्महाघोरे कुम्भीपाके निपातितः ॥ ४ ॥
यमाज्ञया वरारोहे युगमेकं च पातितः ।
महादुःखेन संतप्तो बहु कष्टं प्रलब्धवान् ॥ ५ ॥
नरकान्निःसृतो देवि सूकरत्वं ह्यजायत ।
ऋक्षयोनिं ततो भूत्वा शुकयोनिं ततोऽगमत् ॥ ६ ॥
पुनर्मानुषयोनिर्वै मध्यदेशे वरानने ।
धनधान्यसमायुक्तो वंशहीनोऽभवत्तदा ॥ ७ ॥
पूर्वजन्मनि देवेशि हृता भूमिर्वरानने ।
ब्राह्मणो वै मृतः पूर्वं तदुद्देशेन वै शिवे ॥ ८ ॥
अतः पुत्रविहीनोयं कन्यका बहु जायते ।
महारोगेण सन्तप्तो मृतपुत्रः पुनः पुनः ॥ ९ ॥

अस्य शान्तिमहं वक्ष्ये पूर्वपापस्य शान्तये ।
गायत्रीजातवेदाभ्यां त्र्यम्बकेन वरानने ॥ १० ॥
दशायुतं जपं कार्यं प्रतिमंत्रैः सुरेश्वरि ।
दशांशं हवनं तद्वत् तर्पणं मार्जनं तथा ॥ ११ ॥
दशवर्णां ततो दद्याच्छतब्राह्मणभोजनम् ।
भूमिदानं ततो कुर्याच्छतविग्रहमानकम् ॥ १२ ॥
पलपञ्चसुवर्णस्य ब्राह्मणस्य तथाऽऽकृतिम् ।
पूजयित्वा यथान्यायं ब्राह्मणाय प्रदापयेत् ॥ १३ ॥
प्रयागे मकरे मासि पत्न्या सह वरानने ।
स्नानं कुर्याच्च देवेशि पूर्वपापस्य शुद्धये ॥ १४ ॥
एवंकृत्वा वरारोहे पुत्रोत्पत्तिर्भवेच्छिवे ।
वंध्यात्वं नाशमायाति काकवन्ध्या च गर्भिणी ॥ १५ ॥
मृतवत्सा लभेत्पुत्रं चिरञ्जीविनमुत्तमम् ।
रोगाः सर्वे क्षयं यान्ति नात्र कार्या विचारणा ॥ १६ ॥
इति श्रीकर्म० पूर्वाषाढनक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

अथ त्र्यशीतितमोऽध्यायः ।

शिव उवाच ।

अयोध्यायां विशालाक्षि मालाकारोऽवसत्पुरा ।
साधुवृत्तिरतः श्रीमान् ब्राह्मणानां च सेवकः ॥ १ ॥
तस्य पत्नी महादुष्टा कुलटा व्यभिचारिणी ।
माल्यं कृत्वा विशालाक्षि जीवयामास बान्धवान् २॥
तस्य मित्रं द्विजोप्येकः स्वर्णं लक्षद्वयं तथा ।
स्थापितं स्वगृहे तस्य गताश्च बहुवासराः ॥ ३ ॥
याचितं तेन स्वं द्रव्यमर्धं प्राप्तं तदा प्रिये ।
तदर्धं च व्ययं जातं मालाकारस्य वै गृहे ॥ ४ ॥
एवं बहुगते काले मालाकारो मृतः पुरा ।
अयोध्यायां विशालाक्षि स्वर्गस्तस्याभवत्किल॥५॥
लक्षवर्षं वरारोहे भुक्तं स्वर्गफलं शुभम् ।
ततः पुण्यक्षये जाते मानुषत्वेऽभवत्पुनः ॥ ६ ॥
मध्यदेशे च देवेशि पुत्रकन्याविवर्जितः ।
तस्य पत्नी पुनर्देवि या स्थिता पूर्वजन्मनि ॥ ७ ॥

विवाहिता च सा देवि व्याधियुक्ता ज्वरातुरा ।
अस्य शान्ति वरारोहे शृणु मे परमेश्वरि ॥ ८ ॥
षडङ्गं जापयेत्प्राज्ञैः शिवपूजनपूर्वकम् ।
षडक्षरेण मन्त्रेण लक्षजाप्यं वरानने ॥ ९ ॥
हवनं तद्दशांशेन मार्जनं तर्पणं तथा ।
श्रवणं मासमेकं तु चण्डिकाचरितत्रयम् ॥ १० ॥
ततः षडंशं देवेशि ब्राह्मणाय समर्पयेत् ।
ततो गां कपिलां दद्यात्तिलधेनुं सुपूजिताम् ॥ ११ ॥
अश्वं दद्याद्विशालाक्षि महिषीं दुग्धसंयुताम् ।
सुवर्णस्य कृतं वृक्षं फलपुष्पसमन्वितम् ॥ १२ ॥
दद्याद्दशपलं देवि ततः पुत्रः प्रजायते ।
मृतवत्सा च या नारी काकवन्ध्या च रोगिणी ॥ १३ ॥
सर्वासां वाञ्छितं कार्यं जायते नात्र संशयः ॥ १४ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे पूर्वाषाढनक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं नाम त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

अथ चतुरशीतितमोऽध्यायः ।

शिव उवाच ।

श्वेतपर्वे महातीर्थे रामपुर्यां वरानने ।
कान्यकुब्जोऽवसद्विप्रो व्यापारकरणे रतः ॥ १ ॥
अश्वादिकं वरारोहे वृषचर्माजिनाम्बरम् ।
प्रत्यहं गृह्यते देवि विक्रयं क्रियते सदा ॥ २ ॥
द्यूतवेश्यारतो नित्यं परस्त्रीगमनं तथा ।
प्राकरोच्च सुरापानं गुरुदेवाऽपमानकृत् ॥ ३ ॥
एवं बहुगते काले मरणं प्रबभूव ह ।
यमदूतैर्महाघोरे लब्ध्वा क्षिप्तः सुदारुणे ॥ ४ ॥
षष्टिवर्षसहस्राणि भुक्त्वा नरकयातनाम् ।
नरकान्निःसृतो देवि वानरस्य गतिं गतः ॥ ५ ॥
ततो रासभयोन्यां वै तुरगस्य ततोऽगमत् ।
मानुषत्वं ततो लेभे पूर्वजन्मफलाच्च सः ॥ ६ ॥
धनधान्यसमायुक्तो रोगयुक्तोऽप्यपुत्रकः ।
कदाचिद् दैवयोगेन पुत्रो भवति भामिनि ॥ ७ ॥

मरणं तस्य वै शीघ्रं ततः कन्या प्रजायते ।
अस्य शान्तिं शृणुष्वादौ यथापापं निवर्तते ॥ ८ ॥
गृहवित्तषडंशं च पुण्यकार्यं च कारयेत् ।
पूर्वजन्मनि देवेशि कनिष्ठं भ्रातरं निजम् ॥ ९ ॥
रात्रौ खड्गेन हतवान् तत्पापाच्च सुतक्षयः ।
गायत्रीमूलमन्त्रेण पञ्चलक्षं वरानने ॥ १० ॥
जपं वै कारयेत्प्राज्ञैर्नित्यं गोविन्दकीर्तनम् ।
होमं वै कारयेत्कान्ते कुण्डे षट्कोणसंयुते ॥ ११ ॥
पायसेन विशालाक्षि तिलसर्पिर्युतेन च ।
दशवर्णां ततो दद्याद् ब्राह्मणाय शिवात्मने ॥१२॥
भूमिदानं ततो दद्याच्छय्यादानं विशेषतः ।
भ्रातुश्चैवाकृतिं कृत्वा रौप्येणैव वरानने ॥ १३ ॥
पलसप्तप्रमाणेन पूजां कृत्वा प्रसन्नधीः ।
"देवदेव महादेव चर्मभस्मविभूषण ॥ १४ ॥
पूर्वजन्मनि देवेश भ्रातृनाशः कृतो मया ।
तत्पापं क्षम्यतां देव प्रपद्ये शरणं तव ॥ १५॥"

प्रतिमां पूजितां देवि मन्त्रेणानेन वै शिवे ।
दद्याद्विप्राय विदुषे श्रोत्रियाय द्विजात्मने ॥१६॥
ततो वै भोजयेद्भक्त्या ब्राह्मणान्वेदपारगान् ।
एकाधिकशतं देवि पायसैर्मोदकेन च ॥ १७ ॥
एवं कृत्वा वरारोहे पूर्वपापस्य संक्षयः ।
वन्ध्यात्व प्रशमं याति पुत्रः सत्यं प्रजायते ॥१८॥
काकवन्ध्या लभेत्पुत्रं मृतवत्सा सुपुत्रिणी ।
व्याधयः संक्षयं यान्ति नात्र कार्या विचारणा॥१९॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
उत्तरानक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं
नाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥

अथ पञ्चाशीतितमोऽध्यायः ।

शिव उवाच ।

सकेश्वरपुरे देव्यवात्सीच्चैको द्विजो वरः ।
म्लेच्छवाणीं वदेन्नित्यं म्लेच्छसेवारतः सदा ॥१॥
अतिष्ठन् म्लेच्छनिकटे म्लेच्छविद्यासु पण्डितः ।

मत्स्यं मांसं च मद्यं च भोजनं चाकरोत्सदा ॥ २ ॥
एवं सर्वं वयो जातं धनं बहु सुसंचितम् ।
तद्धनं भूमिमध्ये हि स्थापितं तु गृहे शुभे ॥ ३ ॥
एकस्मिन्समये देवि भ्रातुः पुत्रः समागतः ।
रत्नव्यापारकरणे स दक्षश्चतुरस्तथा ॥ ४ ॥
ततो गेहस्थितो नित्यं रत्नं बहु सुसंचितम् ।
रत्नलोभेन भो देवि रात्रौ क्षुरिकया तदा ॥ ५ ॥
कृत्वा शिरश्छेदनं च सुप्तं निशि ममार तम् ।
तत्सर्वं भूमिमध्ये तु स्थापितं रत्नसञ्चयम् ॥ ६ ॥
भ्रातृजस्य धनं गृह्य व्ययं कृत्वा दिने दिने ।
ततो बहुदिने याते द्विजः पूर्वं मृतः स च ॥ ७ ॥
पश्चात्पत्नी मृता तस्य तौ गतौ नरकार्णवे ।
षष्टिवर्षसहस्राणि महाकष्टेन पीडितौ ॥ ८ ॥
नरकान्निःसृतौ द्वौ तु गजयोनी बभूवतुः ।
पुनः कच्छपयोनी वै गोधायोनी बभूवतुः ॥ ९ ॥
एवं योनित्रयं भुक्त्वा सरय्वा उत्तरे तटे ।

मानुषत्वं ततो लेभे भाग्यवान् साधुसञ्ज्ञितः॥१०॥
सुशीलः सुमतिर्दक्षः स्वल्पविद्यायुतो नरः।
अपुत्रो रोगवान् देवि भूपतिर्नरपूजितः ११॥
पूर्वजन्मनि देवेशि भ्रातृपुत्रवधः कृतः।
निशायां च पुरा देवि तेन दोषेण नो सुतः॥ १२॥
म्लेच्छस्य सेवनाद्देवि म्लेच्छस्याऽशुचिभाषणात्।
तेन पापेन भो देवि शरीरे रोगसम्भवः॥ १३॥
यत्तु दानं कृतं पूर्वं दत्ता शय्या सुरेश्वरि।
तत्फलेन महादेवि धनाढ्यत्वमजायत॥ १४॥
अनाचारः कृतः पूर्वं पुत्रदारयुतेन च।
तेन पापेन भो देवि नरः कन्याप्रजो भवेत्॥ १५॥
अथ शान्तिं प्रवक्ष्यामि शृणु देवि सुशोभने।
गायत्रीमलमन्त्रेण पञ्चलक्षं वरानने॥ १६॥
जपञ्च कारयेद्देवि षडंशं दानमाचरेत्।
होमञ्च कारयेत्कान्ते कुण्डे चैव सुसंस्कृते॥ १७॥
दशांशं तर्पणं देवि मार्जनं तद्दशांशतः

भ्रातृपुत्रस्य प्रतिमां कारयेदद्रिनन्दिनि ॥ १८ ॥
पलं दशसुवर्णस्य विधिवत्पूजयेत्ततः ।
मन्त्रेणानेन देवेशि गन्धधूपादिभिस्तथा ॥ १९ ॥
गणाधिप सुराध्यक्ष सर्वसिद्धिप्रदायक ।
मम पूर्वकृतं पापं तत्क्षमस्व दयानिधे ॥ २० ॥
रौप्यपात्रे स्थितां तां तु प्रतिमां प्रार्थयेत्ततः ।
अज्ञानाद्वा प्रमादाद्वा पापं मम पुराकृतम् ।
तत्सर्वं क्षम्यतां देव प्रपद्ये शरणं तव ॥ २१ ॥

ॐ गणपतये नमः । ॐ लक्ष्म्यै नमः । ॐ सूर्याय नमः । ॐ शिवाय नमः । ॐ विश्वयोनये नमः । ॐ गरुडाय नमः । ॐ नंदिकेश्वराय नमः ॥

एभिर्मन्त्रैस्तु सर्वाणि वस्तूनि दापयेत्ततः ।
कलशं पूजयेद्देवि गणाधिपस्वरूपिणम् ॥ २२ ॥
गन्धपुष्पैश्च ताम्बूलैर्वस्त्रैर्नानाविधैरपि ।
प्रतिमां पूजितां देवि ब्राह्मणाय प्रदापयेत् ॥ २३ ॥
दशवर्णास्ततो दद्याद्वृषमेकं वरानने ।

पञ्चपात्रं ततो दद्याद् ब्राह्मणान् भोजयेत्ततः ॥२४॥
रविवारेण संयुक्तसप्तम्यां विधिपूर्वकम् ।
उपोषणं नियमतः पत्न्या सह वरानने ॥ २५ ॥
सप्तवत्सरपर्यन्तं प्रकुर्याद्वै सुरेश्वरि ।
ततस्तूद्यापनं कुर्याद्यथाशक्ति सदाशिवे ॥ २६ ॥
दद्याद्विप्राय विदुषे श्रोत्रियाय तपस्विने ।
कूष्माण्डं नारिकेलं च पञ्चरत्नसमन्वितम् ॥ २७ ॥
गङ्गामध्ये प्रदातव्यं पूर्वपापविशुद्धये ।
एवंकृते वरारोहे शीघ्रं पुत्रः प्रजायते ॥ २८ ॥
सर्वे रोगाः क्षयं यान्ति नीहारा भास्कराद्यथा॥२९॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
उत्तराषाढनक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं
नाम पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

अथ षडशीतितमोऽध्यायः ।

शिव उवाच ।

मध्यदेशे महादेवि ब्राह्मणो वेदपारगः ।

जयदेवाभिधो विप्रो विख्यातश्चातिशीलवान् ॥ १ ॥
तस्य भार्या शीलवती सुशीला शीलरूपिणी ।
तस्याः पुत्रत्रयं जातं गुणज्ञं वेदपारगम् ॥ २ ॥
पुत्राः सर्वे गुणज्ञाश्च वेदवेदाङ्गपारगाः ।
ज्येष्ठपुत्रस्य चोद्वाहे स्वसा तस्य समागता ॥ ३ ॥
भगिन्याश्चादरं कृत्वा बहुमानेन पार्वति ।
विवाहे च समाप्ते तु ज्ञातयः स्वेषु वेश्मसु ॥ ४ ॥
गताः सर्वे विशालाद्व्ययाचयद्भगिनी च सा ।
ताटंकं स्वर्णरत्नाढ्यं भ्रातृपत्नी प्रकोपिता ॥ ५ ॥
श्रुत्वेर्ष्यया सवत्सा तु तदायाता स्ववेश्मनि ।
स्त्रीस्वभावाच्च देवेशि मृता सा भगिनी गृहे ॥ ६ ॥
तदुद्देशेन देवेशि शरीरं निशि सात्यजत् ।
ततो बहुदिने याते तस्य मृत्युरभूत्तदा ॥ ७ ॥
पत्नी तस्य सती जाता सत्यलोकमभूत्तदा ।
वर्षं कोटित्रयं देवि सत्यलोकेऽवसत्पुनः ॥ ८ ॥
मर्त्यलोके मनुष्यत्वं लब्धं पुण्यक्षये सति ।

धनधान्यसमायुक्तो विद्यावाञ्छास्त्रपारगः ॥ ९ ॥
कृतं तेन पुरा पापं भगिन्या दारकारणात् ।
पुत्रो न जायते देवि कन्योत्पन्ना विनश्यति ॥१०॥
शरीरे सततं दुःखं मध्ये तस्य प्रजायते ।
काकवन्ध्या भवेद्भार्या मृतवत्सा सुदुःखिता ॥११॥
अस्य शान्तिं प्रवक्ष्यामि तत्सर्वं शृणु पार्वति ।
गृहवित्तषडंशेन पुण्यकार्यं च कारयेत् ॥ १२ ॥
वापीकूपतडागानां जीर्णोद्धारं प्रयत्नतः ।
वाटिकां मार्गमध्ये तु सहितां शीतवारिणा ॥१३॥
गायत्रीजातवेदाभ्यां जपं वै कारयेत्ततः ।
लक्षद्वयं विशालाक्षि हवनं तद्दशांशतः ॥ १४ ॥
तर्पणं मार्जनं तद्वद्गोदानं विधिवत्ततः ।
एवंकृते वरारोहे तस्य पुत्रः प्रजायते ॥ १५ ॥
गुणज्ञः सर्ववस्तूनां साधूनां संमतस्तथा ।
स्वर्णदानं विशालाक्षि पलपञ्चमितं तथा ॥ १६ ॥
ब्राह्मणाय ततो दद्यात्पूजयेद्युवतिं ततः ।

वस्त्रालङ्कारसिन्दूरैर्गन्धाद्यैः सुमनोहरैः ॥ १७ ॥
ताटङ्कैर्मुद्रिकाभिश्च गन्धमाल्यैस्तथैव च ।
सर्वं पापं क्षयं याति व्याधिनाशोभवेद्ध्रुवम् ॥ १८ ॥
ब्राह्मणीं पार्वतीरूपां ब्राह्मणं शिवरूपिणम् ।
भोजयेद्विविधैश्चान्नैर्मोदकैः शतसंख्यकैः ॥ १९ ॥
काकवन्ध्या लभेत्पुत्रं मृतवत्सा च पुत्रिणी ।
कन्यकाजननी या तु पुत्रवत्यापि जायते ॥ २० ॥
एवं न जायते चेत्तु सप्तजन्मस्वपुत्रकः ॥ २१ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे उत्तराषाढनक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नाम षडशीतितमोऽध्यायः ॥ ८६ ॥

अथ सप्ताशीतितमोऽध्यायः ।

शिव उवाच ।

गुर्जरे नगरे देवि न्यवसज्ज्ञानवान् द्विजः ।
बलभद्रः समाख्यातो वेदानां पाठकः सुधीः ॥ १ ॥
ऋग्वेदं च यजुर्वेदं सामवेदमथर्वणम् ।

पठनं चैव कुरुते चतुर्वेदी द्विजोत्तमः ॥ २ ॥
एकस्मिन्दिवसे देवि देशे कश्चिन्मृतः खलु ।
भोजनं तेन संस्कारं विना तत्र कृतं प्रिये ॥ ३ ॥
म्लेच्छद्रव्यं गृहीतं च भुक्तं पुत्रयुतेन च ।
पत्न्या सह वरारोहे ततो वृद्धवयो गतः ॥ ४ ॥
मरणं तस्य वै जातं शङ्खेश्वरपुरे यदा ।
यमाज्ञया तदा देवि यमदूतैरितस्ततः ॥ ५ ॥
नरके पातितं पश्चान्मर्त्यलोके ततोगमत् ।
कुक्कुटत्वं विशालाक्षि काकं पारावतं ततः ॥ ६ ॥
मानुषत्वं पुनर्लेभे शुभे देवि कुले महत् ।
स पण्डितो महाविद्वाञ्ज्ञातिधर्मविचक्षणः ॥ ७ ॥
पूर्वजन्मनि देवेशि म्लेच्छान्नं भोजनं कृतम् ।
तेन पापेन भो देवि पुत्रः कन्या न जायते ॥ ८ ॥
प्रेतान्नं भोजनं कृत्वा संस्कारो न कृतः पुरा ।
तेन पापेन भो देवि शरीरे रोगसम्भवः ॥ ९ ॥
अस्य शान्तिं शृणुष्वादौ पूर्वपापप्रणाशिनीम् ।

गृहवित्ताष्टमं भागं ब्राह्मणाय प्रकल्पयेत् ॥ १० ॥
गायत्रीमूलमन्त्रेण दशायुतजपं ततः ।
हवनं तद्दशांशेन मार्जनं तर्पणं तथा ॥ ११ ॥
दशवर्णां ततो दद्याच्छय्यादानं विशेषतः ।
कूष्माण्डं नारिकेलं च पञ्चरत्नसमन्वितम् ॥ १२ ॥
गङ्गामध्ये प्रदातव्यं पूर्वपापप्रणाशनम् ।
एवंकृते वरारोहे शीघ्रं पुत्रः प्रजायते ॥ १३ ॥
व्याधयः संक्षयं यान्ति काकवन्ध्या लभेत्सुतम् १४
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे उत्तराषाढनक्षत्रस्य चतुर्थचरणप्रायश्चित्त-कथनं नाम सप्ताशीतितमोऽध्यायः ॥८७॥

अथाष्टाशीतितमोऽध्यायः ।

शिव उवाच ।

पवनस्य महादेशे मारुते नगरे शुभे ।
गौतमो नाम विख्यातो ब्राह्मणो वेदपारगः ॥ १ ॥
तस्य भार्या विशालाक्षि मालिनी मातृपालिनी ।

धनञ्च बहु संगृह्य म्लेच्छसेवारतो हि सः ॥ २ ॥
तस्य मित्रो द्विजः कश्चित् तपस्वी सत्यवाक्छुचिः।
आगतस्तस्य निकटे प्रेम्णा तत्र तपोकरोत् ॥ ३ ॥
अब्दे चैके ततो जाते पुनः काश्यां गतोपि सः।
स्वर्णरत्नं महादेवि गौतमाय समर्पितम् ॥ ४ ॥
रक्षार्थं तेन द्रव्यं च गृहीतं गौतमेन च।
वाराणस्यां ततो गत्वा तपस्वी प्राणमत्यजत् ॥५॥
गौतमेन तु स्वद्रव्यं स्थापितं भूमिमध्यके।
तद्द्रव्यं ब्राह्मणस्यैव पुत्रदारयुतेन च ॥ ६ ॥
भक्षितं तेन विक्रीय बहुवर्षे गते शिवे।
गौतमस्य ततो मृत्युर्वृद्धे जाते वरानने ॥ ७ ॥
गन्धर्वस्य ततो लोकं विंशतिर्वै सहस्रकम्।
तेन भुक्तं विशालाक्षि गन्धर्वैः सह किन्नरैः ॥ ८ ॥
ततः पुण्ये क्षये जाते हंसयोनिं ततोऽगमत्।
मृगयोनिं ततो भुक्त्वा मानुषत्वं ततोऽगमत् ॥ ९ ॥
स भाग्यवान् महाधीरः पुण्याचारे सदा मतिः।

पूर्वजन्मनि देवेशि मित्रद्रव्यं विनाशितम् ॥ १० ॥
अदत्तं यद्विशालाक्षि तेन पापेन तत्प्रिया ।
वन्ध्या भवति वै नारी काकवन्ध्या च जायते॥ ११॥
रोगयुक्तोऽभवद्देहो ज्वराश्च विविधास्तथा ।
अस्य शान्तिं प्रवक्ष्यामि शृणु देवि सुशोभने॥ १२॥
गृहवित्तषडंशेन पुण्यकार्यं च कारयेत् ।
वापीकूपतडागानि जीर्णोद्धारं च कारयेत् ॥ १३ ॥
गायत्रीमूलमन्त्रेण दशायुतजपं शिवे ।
हवनं तद्दशांशेन पुण्यकार्यं च कारयेत् ॥ १४ ॥
गामेकां तरुणीं शुभ्रां कांस्यदोहां सवत्सकाम् ।
सतीं सवस्त्रां विप्राय दद्याद्वेदविदे ततः ॥ १५ ॥
ब्राह्मणान्भोजयेद्दत्वा यथाशक्त्या तु दक्षिणाम् ।
ज्ञातिभिः सह भुञ्जीत ततो नृत्यन्तु कारयेत्॥ १६॥
पुराणश्रवणं देवि चण्डिकाचरणार्चनम् ।
अन्नदानं च भो देवि घृतदानं विशेषतः ॥ १७ ॥
एवंकृते न सन्देहो वंशवृद्धिर्भविष्यति ।

रोगाः सर्वे क्षयं यान्ति सुखानि विविधानि च॥१८॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे श्रवणनक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं नामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥

अथैकोननवतितमोऽध्यायः ।

शिव उवाच ।

गान्धारदेशे वै शुभ्रे गान्धारस्य पुरे शुभे ।
वसन्ति तत्र बहवो जनाः पुण्योपजीविनः ॥ १ ॥
तन्मध्ये ब्राह्मणोप्येको लक्ष्मीवान् गुणवर्जितः ।
यवनानां महन्मित्रं सार्द्धं म्लेच्छेन तिष्ठति ॥ २ ॥
ऊर्णादिकं वरारोहे विक्रयं कुरुते सदा ।
म्लेच्छान्नं भुज्यते नित्यं म्लेच्छभार्याविहारकृत॥३॥
एवं बहु वयो जातं ततो वै मरणं खलु ।
यमदूतैर्महाघोरैर्नरकेऽत्यन्तदारुणे ॥ ४ ॥
निक्षिप्तं तेन वै देवि षष्टिवर्षसहस्रकम् ।
भुक्तं सुदुःसहं कर्म विविधं नरके फलम् ॥ ५ ॥

नरकान्निःसृतो देवि वृकयोनिरभूत्पुरा ।
रासभस्य ततो योनिमृक्षत्वेभूत्पुनः प्रिये ॥ ६ ॥
मानुषत्वं पुनर्लेभे मध्यदेशे सुरेश्वरि ।
पूर्वजन्मनि म्लेच्छान्नं भुक्तं पुत्रेण वै शिवे ॥ ७ ॥
अतो वंशस्य विच्छेदो व्याधीनां चोद्भवस्तथा ।
अस्य दोषस्य वै शान्तिं शृणु मे परमेश्वरि ॥ ८ ॥
गायत्रीमूलमन्त्रेण लक्षजाप्यं वरानने ।
हवनं तद्दशांशेन तर्पणं मार्जनं तथा ॥ ९ ॥
सवृषं पञ्च गोदानं वस्त्रदानं विशेषतः ।
सहस्रघटदानं च गोदानं च सुरेश्वरि ॥ १० ॥
एवंकृते न सन्देहो वंशवृद्धिर्भविष्यति ।
रोगा विनाशमायान्ति नात्र कार्या विचारणा॥ ११॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
श्रवणनक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं
नामैकोननवतितमोऽध्यायः ॥ ८९ ॥

अथ नवतितमोऽध्यायः ।

शिव उवाच ।

काश्मीरनगरे देवि ब्राह्मणोऽध्यवसत्पुरा ।
खण्डशर्मेति विख्यातो गङ्गाख्या स्त्री तु कर्कशा १
पतिवाक्यं न साकार्षीद्विक्रयं कुरुते सदा ।
घृततैलं च देवेशि दधि तक्रं पुनर्गुडम् ॥ २ ॥
अश्वं च वृषभं चैव चामरं धातुवस्तु च ।
प्रत्यहं विक्रयं कर्त्री व्ययकर्त्री दिने दिने ॥ ३ ॥
एवं सर्वं वयो जातं वृद्धे सति वरानने ।
मरणं तस्य वै जातं ब्राह्मणस्य तदा शिवे ॥ ४ ॥
यमराजाज्ञया दूतैर्नरके कर्दमे तथा ।
निक्षिप्तः षष्टिसाहस्रं भुक्ता वै यातना तथा ॥ ५ ॥
नरकान्निःसृतो देवि वृकयोनिस्ततोभवत् ।
रासभस्य पुनर्योनिर्मेषयोनिस्ततोऽभवत् ॥ ६ ॥
मानुषत्वं पुनर्लेभे मध्यदेशे वरानने ।
धनधान्यसमायुक्तः पुत्रकन्याविवर्जितः ॥ ७ ॥

पुनर्विवाहिता सा तु पूर्वजन्मफलाच्छुभे ।
शरीरे सततं रोगो वायोः सञ्जायते शिवे ॥ ८ ॥
ब्राह्मणस्य स्वयं धर्मं यतस्त्यक्तं पुरा शुभे ।
अतः पुत्रविहीनेयं मृतवत्सात्वमाप्नुयात् ॥ ९ ॥
अस्य शान्तिमहं वक्ष्ये शृणु देवि सुशोभने ।
गृहवित्तषडंशं च ब्राह्मणाय समर्पयेत् ॥ १० ॥
गायत्री चायुतं जप्त्वा मूलमन्त्रं शिवस्य तु ।
षडक्षरं सप्रणवं लक्षमेकं वरानने ॥ ११ ॥
हवनं तद्दशांशेन मार्जनं तर्पणं तथा ।
ब्राह्मणान्भोजयेद्भक्त्या हविषा पायसेन च ॥ १२ ॥
पञ्चाशत्संख्यया देवि यथाशक्त्या तु दक्षिणाम् ।
प्रयागे माघमासे तु स्नानं भार्यासमन्वितः ॥ १३ ॥
कूष्माण्डं नारिकेरं च पञ्चरत्नसमन्वितम् ।
गङ्गामध्ये प्रदातव्यं विधिपूर्वं वरानने ॥ १४ ॥
एवंकृते न संदेहो वंशवृद्धिर्भवेदनु ।

रोगाः सर्वे क्षयं यान्ति वन्ध्या भवति पुत्रिणी ॥१५॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे श्रवणनक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नाम नवतितमोऽध्यायः ॥ ९० ॥

अथैकनवतितमोऽध्यायः ।

शिव उवाच ।

अट्टकस्य प्रतीच्यां तु यादवं नाम वै पुरम् ।
वसन्ति बहवो देवि जनाः कर्मविचक्षणाः ॥ १ ॥
तन्मध्ये ब्राह्मणोप्येकः सिद्धलाल इति श्रुतः ।
तस्य भार्या विशालाक्षि देवीनाम्नी सदाशिवे ॥२॥
पतिव्रता गुणोपेता मिष्टवाक्यप्रवादिनी ।
सिद्धलालो महाचौरश्चौर्यवृत्तिरतः सदा ॥ ३ ॥
दारपुत्रादिभृत्यानां चौर्येण पोषणं कृतम् ।
एवं सर्वं वयो जातं ततो मृत्युमुपागतम् ॥ ४ ॥
तस्य भार्या सती जाता तत्प्रभावाद्गतो द्विजः ।
सत्यलोके वरारोहे सततं विविधं सुखम् ॥ ५ ॥

भुक्तं पूर्वकृतात्पुण्यात्ततः पुण्यक्षये सति ।
मानुषत्वे पुनर्जन्म दुर्लभं सर्वदेहिनाम् ॥ ६ ॥
धनधान्येन संयुक्तः कन्यापुत्रविवर्जितः ।
ब्राह्मण्यं च यतस्त्यक्त्वा शूद्रकर्म समाचरेत् ॥७॥
परद्रव्यं हृतं देवि तस्माद् व्याधिरजायत ।
तस्य शान्तिं प्रवक्ष्यामि यत्कृतं पूर्वजन्मनि ॥ ८ ॥
गृहवित्ताष्टमं भागं पुण्यकार्यं च कारयेत् ।
दशवर्णप्रदानं च पूर्वपापविशुद्धये ॥ ६ ॥
शय्यादानं ततः कुर्यादेकादश्यां व्रतं शुभम् ।
गायत्रीमूलमन्त्रेण विष्णुमन्त्रेण सुन्दरि ॥ १० ॥
लक्षजाप्यं प्रयत्नेनाऽश्वत्थबिल्वतलेऽबले ।
दशांशं हवनं कुर्यात्तर्पणं मार्जनं तथा ॥ ११ ॥
विप्राणां भोजनं देवि घटदानं विशेषतः ।
एवंकृते न संदेहो वंशो भवति नान्यथा ॥ १२ ॥
व्याधयः संक्षयं यान्ति मम वाक्यं न चान्यथा॥ १३॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे श्रवणनक्षत्रस्य चतुर्थचरणप्रायश्चित्त-कथनं नामैकनवतितमोऽध्यायः ॥ ६१ ॥

अथ द्विनवतितमोऽध्यायः ।

शिव उवाच ।

देशे पञ्चनदे देवि गङ्गानाम्नी पुरी शुभा ।
वसन्ति सर्वे वै वर्णा ब्राह्मणाः क्षत्रिया विशः ॥ १ ॥
स्वकर्मनिरताः सर्वे वर्णाचारसमाश्रिताः ।
तन्मध्ये ब्राह्मणोप्येकः कृषिकर्मरतः सदा ॥ २ ॥
एकस्मिन् समये तदीयभगिनीपुत्रो गृहे भिक्षुकः
प्राप्तस्तस्य बुभुक्षितो निशि तदा यष्ट्याऽहनत्तं खलः।
प्राप्तः कालकरालदन्तदलनं पुत्रः स्वसुस्तस्य तत्-
पापात् सत्वरमाजगाम मरणं दुष्टः स्वयं चान्धधीः३
यमदूतैर्महादेवि निक्षिप्तो नरकार्णवे ।
अष्टाशीतिसहस्राणि वर्षाणि च तदा शिवे ॥ ४ ॥
भुज्यते विविधं कष्टं नरकं चैव दारुणम् ।
नरकान्निःसृतो देवि मार्जारत्वे भवेत्किल ॥ ५ ॥
व्याघ्रस्य च पुनर्योनिं कुक्कुटत्वं ततोऽभवत् ।
पुनर्मानुषयोनिं च धनधान्यसमन्वितम् ॥ ६ ।

स प्रवीणो महावक्ता कुलाचाररतः सदा ।
पूर्वजन्मनि भो देवि भागिनेयस्य वै वधः ॥ ७ ॥
कृतो वै मन्दमतिना तत्पापेनेह दुःखभुक् ।
पुत्रो न जायते देवि व्याधिश्चैव पुनः पुनः ॥ ८ ॥
अस्य शान्तिं प्रवक्ष्यामि शृणु मत्तो वरानने ।
गृहवित्तषडंशेन पुण्यकार्यं च कारयेत् ॥ ९ ॥
गायत्रीत्र्यम्बकाभ्यां च द्यौःशान्तीति मनुत्रयम् ।
लक्षत्रयं वरारोहे जपं वै कारयेत्सुधीः ॥ १० ॥
दशांशहवनं देवि तर्पणं मार्जनं तथा ।
ब्राह्मणान्भोजयेद्भक्त्या पञ्चाशच्च वरानने ॥ ११ ॥
हविषा पायसेनापि खण्डेन मोदकेन वै ।
दशवर्णां ततो दानं तिलधेनुं प्रदापयेत् ॥ १२ ॥
पञ्चपात्रं च संदाय पिण्डदानं च कारयेत् ।
भागिनेयस्य वै मूर्त्तिः सुवर्णरजतान्विता ॥ १३ ॥
दशपलसुवर्णेन सवत्सां पीठसंयुताम् ।
पूजयामास विधिवन्मन्त्रेणानेन वै शिवे ॥ १४ ॥

'सुराराध्य जगत्स्वामिन् चराचरगुरो हरे।
मम पूर्वकृतं पापं तत्क्षमस्व दयानिधे ॥ १५ ॥
अज्ञानाद्वा प्रमादाद्वा भागिनेयवधः कृतः।
तत् क्षमस्व दयापूर्ण त्र्यम्बक त्रिपुरान्तक ॥१६॥'
ततो वै पूजयामास लोकपालान् पृथक् पृथक्।
पश्चान्माषबलिं दद्यात्प्रतिमां दापयेत्ततः ॥ १७ ॥
ब्राह्मणाय तदा देवि पूर्वपापविशुद्धये।
एवंकृते वरारोहे पुत्रः सञ्जायते खलु ॥ १८ ॥
व्याधयः सङ्क्षयं यान्ति न कन्या जायते खलु।
यदा न क्रियते देवि सप्तजन्मस्वपुत्रकः ॥ १९ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
धनिष्ठानक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं
नाम द्विनवतितमोऽध्यायः ॥ ९२ ॥

अथ त्रिनवतितमोऽध्यायः।

शिव उवाच।

पश्चिमायां महादेवि यवनस्य पुरं महत्।

महानन्द इति ख्यातः सर्वदेशे सुरेश्वरि ॥ १ ॥
वसन्ति बहवो म्लेच्छाः स्वविद्यायां विचक्षणाः ।
ब्राह्मणास्तत्र वै देवि विद्यायां निपुणास्तथा ॥ २ ॥
तिष्ठत्यशङ्कया नित्यं म्लेच्छान्नं भुज्यते सदा ।
स सन्ध्यारहितो विप्रः पिशुनो दुर्मतिः शठः ॥ ३ ॥
सञ्चितं बहुसाहस्रं स्वर्णरत्नगजादिकम् ।
ततो बहुदिने जाते तस्य मृत्युरभूत्पुरा ॥ ४ ॥
सर्पेण दष्टो देवेशि पङ्कके निर्जलेपि वा ।
यमदूतैर्महादेवि यमाज्ञां गृह्य वै द्विजम् ॥ ५ ॥
रौरवे क्षिप्तवाञ्छीघ्रं महाकष्टं प्रभुज्यते ।
षष्टिवर्षसहस्राणि भुक्त्वा नरकयातनाम् ॥ ६ ॥
नरकान्निःसृतो देवि ग्राहयोनिरभूत्पुरा ।
पुनः कच्छपयोनिश्च मानुषत्वं ततोऽभवत् ॥ ७ ॥
पूर्वजन्मनि भो देवि ब्राह्मणत्वं यतोऽत्यजत् ।
अपुत्रत्वं ततो देवि कन्यका नैव जायते ॥ ८ ॥
म्लेच्छान्नं भुज्यते देवि सन्ध्यां च तर्पणं विना ।

अतो व्याधियुतो नित्यं न सुखं लभते क्वचित् ॥९॥
शान्तिं शृणु वरारोहे पूर्वपापप्रणाशिनीम् ।
गृहं शुभ्रं वरारोहे धनधान्यसमन्वितम् ॥ १० ॥
सञ्चितान्नं वरारोहे ब्राह्मणाय प्रदापयेत् ।
गायत्रीमूलमन्त्रेण लक्षजाप्यं च कारयेत् ॥११॥
हवनं तद्दशांशेन मार्जनं तर्पणं तथा ।
त्रैमासिकव्रतं कुर्याद् व्रतं च रविसप्तमी ॥ १२ ॥
जातवेदेति मन्त्रेण लक्षजाप्यन्तु कारयेत् ।
ततो गां कपिलां देवि स्वर्णवस्त्रविभूषिताम् ॥१३॥
दद्यात्सवस्त्रां विधिवद्ब्राह्मणाय शिवात्मने ।
अश्वदानं च कर्तव्यं चामरं छत्रमेव च ॥ १४ ॥
एवंकृते न संदेहो व्याधिनाशो भवेद्ध्रुवम् ।
पुत्रोपि जायते देवि वन्ध्यात्वं च प्रणाशयेत् ॥१५॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे धनिष्ठानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नाम त्रिनवतितमोऽध्यायः ॥ ९३ ॥

अथ चतुर्नवतितमोऽध्यायः।

शिव उवाच।

यत्किञ्चित्क्रियते कर्म वैदिकं चापि लौकिकम्।
तत्तत्कर्मफलं भोग्यमिह लोके परत्र च ॥ १ ॥
सौराष्ट्रनगरे देवि क्षत्रियो वसति प्रिये।
क्षत्रधर्मरतो नित्यं मृगपक्षिप्रहारकः ॥ २ ॥
एकस्मिन् समये काले वनं यातः स दुर्मतिः।
मृगीं सगर्भां हतवान् बालकद्वयसंयुताम् ॥ ३ ॥
पुत्रेण भार्यया सार्धं भुक्तं तेन दुरात्मना।
ततो वृद्धे तु सञ्जाते तस्य मृत्युरभूत्किल ॥ ४ ॥
यमदूतैर्महादेवि नरके क्षिप्त एव सः।
षष्टिवर्षसहस्राणि भुक्त्वा नरकयातनाम् ॥ ५ ॥
नरकान्निःसृतो देवि महिषो जायते खलु।
वराहत्वं पुनर्जातं मानुषत्वं पुनर्भवेत् ॥ ६ ॥
देशे पुण्यतमे देवि धनधान्यसमन्वितः।
विद्यावान् गुणवान् वक्ता राजसेवासु तत्परः ॥ ७ ॥

पूर्वजन्मनि देवेशि हत्वा मृगगणान्बहून् ।
प्रसवोन्मुखीं मृगीं हत्वा मृगवृन्दसमन्विताम् ॥८॥
तत्पापेन महादेवि मृतवत्सत्वमाप्नुयात् ।
शरीरे बहवो रोगा ज्वराश्चातुर्थिकास्तथा ॥ ९ ॥
शान्तिं शृणु वरारोहे मृतवत्सत्वशान्तये ।
गृहवित्ताष्टमं भागं पुण्यकार्यं च कारयेत् ॥ १० ॥
गायत्रीमूलमन्त्रेण लक्षजाप्यं च कारयेत् ।
हवनं तद्दशांशेन मार्जनं तर्पणं ततः ॥ ११ ॥
पलपञ्चसुवर्णस्य मृगीं वत्ससमन्विताम् ।
कृत्वा समर्पयामास ब्राह्मणाय शिवात्मने ॥ १२ ॥
दशवर्णां ततो दद्याच्छय्यादानं विशेषतः ।
वाटिकारोपणं कुर्यात् पथि कूपं तथा शिवे ॥ १३ ॥
ब्राह्मणान् भोजयामास शतसङ्ख्यान्समोदकैः ।
एवंकृते वरारोहे पुत्रः सञ्जायते खलु ॥ १४ ॥
व्याधयः सङ्क्षयं यान्ति वन्ध्यात्वं च प्रशाम्यति ।
मृतवत्सा तु या नारी सुतं सानुग्रहं लभेत् ॥ १५ ॥

काकवन्ध्या पुनः पुत्रं लभते नात्र संशयः ॥ १६ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे धनिष्ठानक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नाम चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

अथ पञ्चनवतितमोऽध्यायः ।

शिव उवाच ।

मथुरादक्षिणे भागे योजने वै त्रयो यदि ।
पुरं सिद्धमिति ख्यातं वसन्ति बहवो जनाः ॥ १ ॥
क्षिप्रकारो वसत्येको धनधान्यसमन्वितः ।
बलभद्र इति ख्यातो वैष्णवो ज्ञानवल्लभः ॥ २ ॥
तस्य पुत्रत्रयं जातं कनीयांसस्य चादरः ।
नादरो ज्येष्ठपुत्रस्य मध्यमस्य तथैव च ॥ ३ ॥
धनं च सञ्चितं तेन महाशूद्रेण चानघे ।
भ्रातॄणां विग्रहो जातो विभागार्थं धनस्य तु ॥ ४ ॥
ब्राह्मणस्तस्य वै मित्रं विग्रहस्तेन वै श्रुतः ।
आगतस्तस्य निकटे क्षिप्रकारस्य वै शिवे ॥ ५ ॥

ब्राह्मणस्य वधो जातः शूद्राणां विग्रहे सति ।
सर्वद्रव्यं कनिष्ठाय क्षिप्रकारो ददौ स्वयम् ॥ ६ ॥
एवं बहुगते काले शूद्रस्य मरणं भवेत् ।
रौरवं नरकं यातः क्षीपकारोऽपि वै स्वयम् ॥ ७ ॥
लक्षवर्षं वरारोहे भुक्त्वा नरकयातनाम् ।
नरकान्निःसृतो देवि व्याघ्रयोनिस्ततोऽभवत् ॥ ८ ॥
भुक्त्वा व्याघ्रस्य योनिं स काकयोनिस्ततोभवत् ।
मानुषत्वं पुनर्जातं मध्यदेशे सुरेश्वरि ॥ ९ ॥
धनधान्यसमायुक्तो रोगवान् पुत्रवर्जितः ।
अस्य शान्तिं प्रवक्ष्यामि शृणु मे परमेश्वरि॥१०॥
गृहवित्तषडंशेन पुण्यकार्यं च कारयेत् ।
पूर्वपापविशुद्ध्यर्थं दशवर्णां ददेत्ततः ॥ ११ ॥
गायत्रीसूर्यमन्त्रेण लक्षजाप्यं वरानने ।
दशांशं हवनं देवि मार्जनं तर्पणं तथा ॥ १२ ॥
दशांशं भोजयेद्विप्रान् ब्राह्मणान्वेदपारगान् ।
कूष्मांडं नारिकेरं च पञ्चरत्नसमन्वितम् ॥ १३ ॥

गङ्गामध्ये प्रदातव्यं देवि सत्यव्रताय च ।
एवंकृते वरारोहे सर्वरोगक्षयो भवेत् ॥ १४ ॥
वंशवृद्धिर्भवेत्तस्य नात्र कार्या विचारणा ॥ १५ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
धनिष्ठानक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं
नाम पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

अथ षण्णवतितमोऽध्यायः ।

शिव उवाच ।

मथुरायां विशालाक्षि आभीरस्तत्र तिष्ठति ।
गोपालेति समाख्यातो सदा गोधनजीवितः ॥ १ ॥
तस्य भार्या विशालाक्षी सतीनामातिसुन्दरी ।
गोधनं बहुसाहस्रं गोपालस्य सुरेश्वरि ॥ २ ॥
वत्सानां वृषभानां च पालनं क्रियते सदा ।
शीतकाले महादेवि वृष्टिर्जाता वरानने ॥ ३ ॥
गौः सवत्सा महादेवि पीडिता भोजनं विना ।
गृहाभावे मृता बाह्ये वत्सेनैव च संयुता ॥ ४ ॥

ततो बहुगते काले गोपालस्य मृतिस्तदा ।
यमदूतैर्महाघोरे नरके नाम कर्द्दमे ॥ ५ ॥
क्षिप्तं यमाज्ञया देवि षष्टिवर्षसहस्रकम् ।
नरकान्निःसृतो देवि भेकयोनिस्ततोभवत् ॥ ६ ॥
सरटस्य ततो देवि मानुषत्वं ततोऽभवत् ।
धनधान्यसमायुक्तो व्याधिना पीडितः सदा ॥ ७ ॥
अपुत्रत्वं ततो लेभे कन्यका जायते खलु ।
तस्य शान्तिमहं वक्ष्ये शृणु देवि सुशोभने ॥ ८ ॥
निर्बीजं वृषभं तेन कृतं योगेन वै शिवे ।
तेन पापेन भो देवि गर्भपातः पुनः पुनः ॥ ९ ॥
वसन्ते मासि वै कुर्याद्घटदानं सहस्रशः ।
एकादशीव्रतं नित्यं वेण्याः स्नानं समाचरेत्॥ १०॥
दशवर्णगवां दानं शय्यादानं तथैव च ।
आकृष्णेति जपं कुर्याल्लक्षसङ्ख्यं वरानने ॥ ११॥
दशांशं हवनं तद्वन्मार्जनं तर्पणं तथा ।
भोजयेद्विविधैश्चान्नैर्ब्राह्मणाञ्छ्रोत्रियाञ्छतम् १२

पायसान्नेन खण्डेन घृतेन दधिना तथा ।
एवंकृते न सन्देहो ज्वरमोक्षः प्रजायते ॥ १३ ॥
वंशवृद्धिर्भवेत्तस्य मृतवत्सा च पुत्रिणी ।
काकवन्ध्या पुनः पुत्रं लभते नात्र संशयः ॥ १४ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे शतभिषानक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं नाम षण्णवतितमोऽध्यायः ॥ ९६ ॥

अथ सप्तनवतितमोऽध्यायः ।

शिव उवाच ।

मध्यदेशे महेशानि लुब्धको वसति प्रिये ।
मृगारिर्नाम विख्यातो मृगमांसेन जीवति ॥ १ ॥
प्रत्यहं मृगयां याति पक्षिणां मारणे रतः ।
मांसक्रयं च कुरुते कलत्रं पोषयेत्सदा ॥ २ ॥
एवंवयो गतं सर्वं वृद्धे सति वरानने ।
मरणं तस्य वै जातं यमदूतैर्यमाज्ञया ॥ ३ ॥
रौरवे नरके क्षिप्तं तत्र कष्टं मुहुर्मुहुः ।

सप्ततिर्वै सहस्राणि नरके परिपच्यते ॥ ४ ॥
नरकान्निःसृतो देवि श्येनयोनिं प्रजायते ।
उष्ट्रस्य च पुनर्योनिं शृगालत्वं ततः पुनः ॥ ५ ॥
मानुषत्वं ततो जातो धनधान्येन संयुतः ।
पूर्वजन्मनि देवेशि पक्षिणो बहवो हताः ॥ ६ ॥
तेन पापेन भो देवि व्याधिना पीडितो हि सः ।
मृगं हत्वा वरारोहे हतं च मृगशावकम् ॥ ७ ॥
एतद्दोषेण भो देवि पुत्राणां मरणं खलु ।
काकवन्ध्या भवेन्नारी कन्यका जायते सदा ॥ ८ ॥
वन्ध्या भवति वै नारी शान्तिं शृणु वरानने ।
गृहवित्तषडंशेन पुण्यकार्यं च कारयेत् ॥ ९ ॥
गायत्रीजातवेदाभ्यां लक्षजाप्यं वरानने ।
दशांशं हवनं तद्वत्तर्पणं मार्जनं तथा ॥ १० ॥
दशधेनूस्ततो दद्यात्स्वर्णदानं विशेषतः ।
हरिवंशश्रुतिं देवि व्रतं च हरिवासरम् ॥ ११ ॥
ब्राह्मणान् भोजयामास यथाशक्तिस्तु दक्षिणा ।

एवंकृते वरारोहे वंशस्तस्य भविष्यति ॥ १२ ॥
वन्ध्यात्वं प्रशमं याति काकवन्ध्या पुनः सुतम् ।
मृतवत्सा सुतं लेभे चिरञ्जीविनमुत्तमम् ॥ १३ ॥
व्याधयः संक्षयं यान्ति ज्ञानं च लभते क्वचित्॥ १४॥
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे शतभिषानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नाम सप्तनवतितमोऽध्यायः ॥ ९७ ॥

अथाष्टनवतितमोऽध्यायः ।

शिव उवाच ।

गोमतीनिकटे देवि पुरमास्ति धुरंधरम् ।
वसन्ति बहवो देवि जना धर्मविचक्षणाः ॥ १ ॥
तन्मध्ये ब्राह्मणोप्येको ब्रह्मकर्मविवर्जितः ।
द्यूतकर्मरतः सोपि वेश्यासुरततत्परः ॥ २ ॥
मद्यपानरतो नित्यं वेदशास्त्रविनिन्दकः ।
ततो बहुदिने देवि तस्य मृत्युरभूत्पुरा ॥ ३ ॥
यमदूतैर्महाघोरैर्नरके तु निपातितः ।

क्षिप्तः स नरके घोरे लक्षवर्षं महेश्वरि ॥ ४ ॥
नरकान्निःसृतो देवि वृकयोनिरभूत्पुरा ।
वराहस्य पुनर्योनिर्गर्दभत्वं ततोऽभवत् ॥ ५ ॥
मानुषत्वं ततो लेभे देशे पुण्यतमे शुभे ।
पूर्वजन्मनि देवेशि मद्यपानरतस्सदा ॥ ६ ॥
तेन पापेन भो देवि शरीरे रोगसम्भवः ।
द्यूतवेश्यारतो नित्यं यत्कृतं पूर्वजन्मनि ॥ ७ ॥
तत्पापेन महादेवि वंशच्छेदश्च जायते ।
शान्तिं शृणु वरारोहे पूर्वपापप्रणाशिनीम् ॥ ८ ॥
गृहवित्तषडंशेन पुण्यकार्यं च कारयेत् ।
विष्णोरष्टमन्त्रेण लक्षजाप्यं वरानने ॥ ९ ॥
दशांशं हवनं तद्वन्मार्जनं तर्पणं तथा ।
ब्राह्मणान्भोजयेत्पश्चात्पञ्चाशच्च वरानने ॥ १० ॥
ततो गां कृष्णवर्णां च स्वर्णशृङ्गीं विभूषिताम् ।
वस्त्रयुक्तां सवत्सां च दद्याद्द्विजवराय च ॥ ११ ॥
प्रतिमां तु ततः कुर्याद्विष्णोः साम्बस्य वा शिवे ।

पलं दशसुवर्णस्य विष्णोर्मुक्ताविभूषिताम् ॥ १२ ॥
तद्वदेव शिवस्यैव रजतस्य वरानने ।
नानावस्त्रैरलङ्कारैः पूजयित्वा यथाविधि ॥ १३ ॥
मन्त्रेणानेन देवेशि तद्वदेव गणं नमेत् ।
गरुडध्वज देवेश भूतनाथ दयानिधे ॥ १४ ॥
मम पूर्वकृतं पापं तत् क्षमस्व दयानिधे ।
गन्धधूपादिभिर्देवि पूजयित्वा पृथक् पृथक् ॥ १५ ॥

ॐ सुदर्शनाय नमः । ॐ त्रिशूलाय नमः ।
ॐ गरुडाय नमः । ॐ भैरवाय नमः ।
ॐ जयाय नमः । ॐ विजयाय नमः ।
ॐ वटुकाय नमः । ॐ कालभैरवाय नमः ।

प्रतिमां पूजयित्वा तु विप्राय प्रददौ स्वयम् ।
ततो विष्णुं नमस्कृत्य शिवं सर्वसुखप्रदम् ॥ १६ ॥
एवंकृते न सन्देहः सर्वपापक्षयो भवेत् ।
वंशवृद्धिर्भवेत्तस्य व्याधिनाशस्तथैव च ॥ १७ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे शतभिषानक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नामाष्टनवतितमोऽध्यायः ॥ ९८ ॥

अथैकोनशततमोऽध्यायः ।

शिव उवाच ।

पञ्चक्रोशमिते देवि मथुराउत्तरे तथा ।
हेमन्तपुरसद्ग्रामे वसन्ति बहवो जनाः ॥ १ ॥
तन्मध्ये वैश्य एको हि क्रयविक्रयतत्परः ।
स सुकर्मा इति ख्यातो धनं च बहु सञ्चितम् ॥२॥
तस्य स्त्री पार्वतीनाम रूपयौवनसंयुता ।
वैश्यश्चैव महादेवि प्रौढिं यातः सुरेश्वरि ॥ ३ ॥
दरिद्रत्वं भवेद्देवि दरिद्रत्वात्सुपीडितः ।
शतपञ्चऋणं नीतं ब्राह्मणस्य सुरेश्वरि ॥ ४ ॥
व्यापारार्थं विशालाक्षि न दत्तं ब्राह्मणाय वै ।
सर्वं भुक्तं महादेवि बहुकाले गते सति ॥ ५ ॥
वैश्यस्यैव भवेन्मृत्युः सभार्यस्य वरानने ।
मथुरायां विशालाक्षि लब्धं स्वर्गं वरं शुभम् ॥६ ॥
दशलक्षमितं स्वर्गे फलं भुक्त्वा वरानने ।
ततः सह कलत्रेण पुनः पुण्यक्षये सति ॥ ७ ॥

मानुषत्वं पुनर्लेभे देशे शुभ्रे मनोहरे ।
धनधान्यसमायुक्तो जायते वै सुरेश्वरि ॥ ८ ॥
पूर्वजन्मनि देवेशि ब्राह्मणस्य धनं हृतम् ।
न दत्तं वै ततो देवि ततः पुत्रो न जायते ॥ ९ ॥
ततः शान्तिं प्रवक्ष्यामि यतः पापस्य सङ्क्षयः ।
गृहवित्तषडंशेन पुण्यकार्यं च कारयेत् ॥ १० ॥
आकृष्णेति ततो मन्त्रं लक्षजाप्यं च कारयेत् ।
दशांशं हवनं कुर्याद्दशांशं तर्पणं तथा ॥ ११ ॥
हरिवंशश्रुतिं देवि चण्डीपाठशिवार्चनम् ।
विधिवत्कारयामास ब्राह्मणानाञ्च भोजनम् ॥ १२ ॥
दशवर्णा तु गौर्देया शय्यादानं विशेषतः ।
एवंकृते वरारोहे वंशो भवति नान्यथा ।
व्याधिनाशः समायाति मम वाक्यामृतं भवेत् ॥ १३ ॥

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे शतभिषानक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं नामैकोनशततमोऽध्यायः ॥ ९९ ॥

अथ शततमोऽध्यायः ।

शिव उवाच ।

मथुरापुरि मध्ये तु शूद्र एको हि तिष्ठति ।
शाकादीनां च सततं विक्रयन्तु सदाकरोत् ॥ १ ॥
विष्णुभक्तिरतः शान्तः पुण्यात्मा साधुसम्मतः ।
सेवादास इति ख्यातस्तस्य पत्नी तु राधिका ॥२॥
कुलाचारे रतः साधुर्द्विजसेवासु तत्परः ।
वाणिज्यं कुरुते साधुः पुरोहितधनेन च ॥ ३ ॥
बहुवर्षे गते देवि ब्राह्मणोपि तदागतः ।
आदरं बहुधा कृत्वा कलत्रेण तदा शिवे ॥ ४ ॥
विषं दत्तं चतुर्थेह्नि भोजनान्तर्विधानतः ।
न जानाति तदा साधुस्तद्वृत्तं ब्राह्मणस्य तु ॥ ५ ॥
मरणं वै ततो जातं ब्राह्मणस्य सुरेश्वरि ।
ब्राह्मणस्य वधे जाते हाहाकारो गृहे गृहे ॥ ६ ॥
श्रुत्वा तच्च पुरीं त्यक्त्वा प्रयागे साधुरागतः ।
देहं त्यक्त्वा तदा साधुर्हठं कृत्वा वरानने ७

पश्चात्तदैव सा गत्वा पत्नी प्राणास्ततोऽत्यजत् ।
प्रयागे मथुरां त्यक्त्वा तदुद्देशेन शोभने ८
बहुवर्षसहस्राणां स्वर्गवासस्ततोऽभवत् ।
ततः पुण्यक्षये जाते मानुषत्वं ततोऽभवत् ९
शूद्रयोनिं विशालाक्षि देहजस्य कुले तदा ।
पुनर्विवाहिता पत्नी पूर्वजन्मप्रसङ्गतः १०
धनधान्यसमायुक्तो विद्यावान् कुलपूजितः ।
गौराङ्गो नीचजातीनां मतज्ञो लब्धवान् स्वयम् ११
पूर्वजन्मनि भो देवि ब्राह्मणाय विषं ददौ ।
भार्या तस्य विशालाक्षि तत्पापेनैव पातकी १२
मासि पुष्पं ततस्तस्याः सन्तानं नैव जायते ।
अस्य पापस्य वै शान्तिं शृणु देवि सुशोभने १३
गृहवित्ताष्टमं भागं पुण्यकार्यं च कारयेत् ।
गायत्रीजातवेदाभ्यां त्र्यम्बकेन वरानने १४
लक्षत्रयं जपं देवि कारयामास यत्नतः ।
हरिवंशश्रुतिं देवि भार्यया सहितस्तदा १५

होमं वै कारयामास कुण्डे शुद्धे सुदारुणे।
चतुष्कोणे विशालाक्षि योनिपल्लवशोभिते १६
दशांशं विधिवद्देवि तर्पणं मार्जनं ततः।
ब्राह्मणस्य ततो मूर्तिं दशपञ्चपलात्मिकाम् १७
विधिवत्कारयेद्देवि पूजयेच्चैव बुद्धिमान्।
वस्त्रालङ्कारशय्याभिर्भूषणैर्विविधैस्तथा १८
मन्त्रेणानेन देवेशि गन्धपुष्पैः पृथक् पृथक्।
सर्वकारणकर्ता त्वं साक्षीभूतो जगत्त्रये १९
पापं ब्रह्मवधं घोरं हर मे भुवनाधिप।

मंत्र—ॐ चक्रधराय नमः। ॐ त्र्यम्बकाय नमः।
ॐ शङ्खहस्ताय नमः। ॐ सनकसनत्कुमारसनन्द-
नसनातनेभ्यो नमः २०

पूजयामास विविधैर्मोदकैश्च फलैरपि।
प्रतिमां पूजितां तान्तु सुविप्राय प्रदापयेत् २१
दशवर्णां सवृषभां पट्टवस्त्रविभूषिताम्।
दद्याद्विप्राय विदुषे श्रोत्रियाय तपस्विने २२

सप्तम्यां रविवारे च व्रतं कुर्याद्विधानतः ।
एवं करोति देवेशि पुत्रयुग्मं प्रजायते २३
कन्या नैव वरारोहे रोगं सर्वं विनश्यति २४
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
पूर्वाभाद्रपदनक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं
नाम शततमोऽध्यायः ॥ १०० ॥

अथैकोत्तरशततमोऽध्यायः ।

शिव उवाच ।

धर्मेण जायते पुत्रो धर्मेण लभते श्रियम् ।
धर्मेण व्याधिनाशः स्यात्तस्माद्धर्मपरोऽभवत् १
कापिल्ये नगरे देवि ब्राह्मणस्तत्र तिष्ठति ।
स वेदपाठनिरतो धनाढ्यश्च बहूद्यमी २
तस्य पत्नी वरारोहे पतिसेवासु तत्परा ।
एकदा चागता कन्या ब्राह्मणस्य किलानघे ३
पुत्रेण सह देवेशि चादरस्तेन वै कृतः ।

ततो बहुदिने जाते तस्य स्वर्णं च चोरितम् ४
कन्यापुत्रेण स्वर्णं हि हृतं चेति तदा शिवे।
वदन्ति बहवस्तत्र जनास्तु ब्राह्मणं प्रति ५
ततो रोषपरीतात्मा पौत्रो भवति वै शिवे।
विषं भुक्तं तदा तेन बहुरोषाकुलेन तु ६
मरणं तस्य वै जातं पौत्रस्यैव वरानने।
ततो बहुदिने जाते ब्राह्मणस्य तदा मृतिः ७
तस्य पत्नी सती जाता सत्यलोकेऽवसत्तदा।
ततः पुण्यक्षये जाते मर्त्यलोके सुरेश्वरि ८
मानुषत्वं ततो जातमयोध्यानगरे शिवे।
धनधान्यसमायुक्तो राजमन्त्री विचक्षणः ९
पौत्रस्तस्य मृतो देवि तदुद्देशेन भो शिवे १०
अतः पुत्रो न जायेत कन्या चैव प्रजायते।
शरीरे शततं चोग्रो ज्वरो जातः सुदारुणः ११
शत्रवो बहवः सन्ति न सौख्यं लभते क्वचित्।
पुण्यं शृणु वरारोहे पूर्वपापस्य संक्षयः १२

गृहवित्तषडंशेन पुण्यकार्यं च कारयेत् ।
गायत्रीत्र्यम्बकं चेति श्रीश्चते इति ऋक्त्रयम् १३
प्रतिमन्त्रं जपेल्लक्षं दशांशं हवनं ततः ।
दशांशतर्पणं देवि मार्जनं तद्दशांशतः १४
गोदानं तद्दशांशं च तद्दशांशं च भोजयेत् ।
ब्राह्मणांश्चैव देवेशि श्रद्धाभक्तिसमन्वितः १५
कूष्माण्डं नारिकेलं च पञ्चरत्नसमन्वितम् ।
गङ्गामध्ये प्रदातव्यं पूर्वपापविशुद्धये १६
वृषभस्तरुणः शुभ्रो घण्टाचामरशोभितः ।
ब्राह्मणाय प्रदातव्यः शय्यादानं विशेषतः १७
एवं कृते वरारोहे शीघ्रं पुत्रः प्रजायते ।
रोगस्यैव निवृत्तिः स्याज्ज्वरस्तस्य न जायते १८
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे पूर्वाभाद्रपदनक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नामैकाधिकशततमोऽध्यायः ॥ १०१ ॥

अथ द्व्युत्तरशततमोऽध्यायः ।

शिव उवाच ।

गांधारनगरे देवि ब्राह्मणो वसति प्रिये ।
दयाशर्मा इति ख्यातो मद्यपानरतः सदा १
वेश्यासुरतसंतृप्तश्चौरकर्मरतः सदा ।
म्लेच्छाचाररतः सोपि म्लेच्छान्नं भुज्यते सदा २
धनं तु संचितं तेन म्लेच्छभार्यासु तत्परः ।
श्राद्धकर्मविहीनश्च पितुर्मातुश्च निन्दकः ३
एवं बहुगते काले मरणं तस्य जायते ।
महारौद्रं च नामानं नरकं नामदारुणम् ४
निक्षिप्तः शृङ्खलैर्बद्ध्वा यमदूतैर्यमाज्ञया ५
नरकान्निःसृतो देवि गोधायोनिरभूत्पुरा ।
सरटस्य पुनर्योनिं चटकत्वं ततोऽभवत् ६
मानुषत्वं ततो लेभे मध्यदेशे वरानने ।
धनधान्यसमायुक्तो वंशहीनो महेश्वरि ७
पूर्वजन्मनि देवेशि ब्राह्मणत्वं यतोऽत्यजत् ।

तत्पापेनैव भो देवि पुत्रस्य मरणं मुहुः ८
अनेन पितरौ वृद्धौ त्यक्तौ दुर्मतिना यतः ।
अतः शरीरे वै रोगः काकवन्ध्या सहव्रणा ९
शान्तिं शृणु वरारोहे यतः पुत्रो हि जायते ।
गृहवित्ताष्टमं भागं पुण्यकार्ये च कारयेत् १०
पलपञ्चसुवर्णस्य गणाध्यक्षस्य चाकृतिम् ।
कृत्वा वै पूजयेद्देवि मन्त्रेणानेन सुव्रते ११
गणाध्यक्ष सुरेशान सर्वोपद्रवनाशन ।
मम पूर्वं कृतं पापं हर दुःखनिवारण १२
एवं कृत्वा विधानं च ब्राह्मणाय समर्पयेत् ।
ततो भवति वंशश्च व्याधिनाशश्च जायते १३

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे पूर्वाभाद्रपदनक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नाम द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

अथ त्र्यधिकशततमोऽध्यायः।

शिव उवाच।

वैदंडे च पुरे देवि लुब्धको वसति प्रिये।
सेमानाम्ना स विख्यातस्तस्य भार्यातिनिष्ठुरा १
प्रत्यहं मृगमांसेन व्ययं कुर्याद्दिने दिने।
एवं सर्वं वयो जातं लुब्धकस्य तदा प्रिये २
मरणं तस्य वै जातं यमदूतैर्यमाज्ञया।
निक्षिप्तो नरके घोरे षष्टिवर्षसहस्रकम् ३
भुक्तं च विविधं दुःखं कृमिसूचिमुखैर्युतम्।
मानुषत्वं ततो जातं धनधान्यसमन्वितम् ४
पुत्राणां मरणं देवि जायते हि विपाकतः।
पलपञ्चसुवर्णस्य माल्यं मेरुयुतं तु वै ५
ब्राह्मणाय ततो दद्याच्छय्यादानं विशेषतः।
एवंकृते वरारोहे पुत्रस्तस्य च जीवति ६
व्याधयः संक्षयं यान्ति काकवन्ध्या लभेत्सुतम् ७

इति श्रीकर्मविपाकसंहितायां शिवपार्वतीसंवादे पूर्वाभाद्रपदनक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं नाम त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

अथ चतुरधिकशततमोऽध्यायः।

शिव उवाच।

श्रीपुरे नगरे देवि द्विज एकोऽवसत्पुरा।
एकदा तस्य वै गेहे गुरुपुत्रः समागतः १
आदरं बहुधा कृत्वा मासमेकं तदा खलु।
गुरुपुत्रस्य घातं हि कृत्वा द्रव्यस्य लोभतः २
तेन पापेन भो देवि महापापयुतो नरः।
पुत्रहीनश्च देवेशि जायते धनवर्जितः ३
वंशगोपालमंत्रं वै गायत्रीमन्त्रमेव च।
हरिवंशश्रवणं देवि कुर्याच्च विधिपूर्वकम् ४
तुलसीवाटिकां कृत्वा तन्मूले विष्णुपूजनम्।
दशवर्णां ततो दद्यात्पूर्वपापप्रणाशिनीम् ५
स्वर्णनिष्कस्ततो दद्याद्दशगोदानमेव च।
एवंकृते वरारोहे वंशो भवति नान्यथा ६
व्याधिनाशो भवेद्देवि सत्यं सत्यं न संशयः ७

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे उत्तराभाद्रपदनक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं नाम चतुरधिकशततमोऽध्यायः॥ १०४ ॥

अथ पञ्चाधिकशततमोऽध्यायः।

शिव उवाच।

मणिकाख्यपुरे रम्ये वसन्ति बहवो जनाः।
लवणकारो वसत्येको नित्यं लवणविक्रयी १
ब्राह्मणीगमनं तेन कृतं शूद्रेण वै शिवे।
तेन पापेन भो देवि वंशहीनश्च जायते २
व्याधियुक्तो महेशानि पीडा चाङ्गेषु जायते।
शान्तिं शृणु महेशानि येन पापनिवर्तनम् ३
गृहवित्ताष्टमैर्भागैर्ब्राह्मणं तोषयेद्यदि।
हरिवंशश्रवं देवि विधिवद्यदि पार्वति ४
ब्राह्मणान्भोजयेद्देवि कूष्माण्डं चैव दापयेत्।
एवंकृते वरारोहे पुत्रो भवति नान्यथा ५

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे उत्तराभाद्रपदनक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नाम पञ्चाधिकशततमोऽध्यायः ॥१०५॥

अथ षडधिकशततमोऽध्यायः।

शिव उवाच।

अलर्काख्यपुरे देवि क्षत्रियो वसति प्रिये।
चन्द्रवर्मेति विख्यातो भार्या देवीतिसंज्ञिका १
क्षत्रधर्मरतो नित्यं धनाढ्यः शूरसंमतः।
कृष्णदास इति ख्यातो विप्रस्तस्य पुरोहितः २
क्रोधतः क्षत्रियस्यापि बभूव मरणं यतः।
पुरोहितस्य विप्रस्य सप्ताहाच्च सुतक्षयः ३
व्याधिपीडा गुल्मजालैः पीड्यते सततं हि सः।
गायत्रीमूलमन्त्रेण पञ्चलक्षजपञ्चरेत् ४
गृहवित्तषडंशेन पुण्यकार्यं च कारयेत्।
ब्राह्मणस्य ततो देवि प्रतिमां कारयेद् बुधः ५
पूजयित्वा ब्राह्मणाय दत्त्वा पापनिवृत्तये।
पलपञ्चसुवर्णस्य दद्याद्वै ब्राह्मणाय च ६
काकवन्ध्या लभेत्पुत्रं मृतवत्सा सुपुत्रिणी ७

इति श्रीकर्मविपाकसंहितायां शिवपार्वतीसंवादे उत्तराभाद्रपदनक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नाम षडधिकशततमोऽध्यायः॥ १०६॥

अथ सप्ताधिकशततमोऽध्यायः ।

शिव उवाच ।

अयोध्यानिकटे देवि विप्रश्चैकोऽवसत्पुरा ।
वैष्णवोक्तप्रकारेण दीक्षां प्राप्तो हि गर्वितः १
वेदनिन्दारतोऽसाधुः श्राद्धादिविधिवर्जितः ।
शिवभक्तिरतानां च नाभिवादं समाचरेत् २
विप्रद्रोहरतश्चैव हरिमन्दिरशोभितः ।
एकदा तस्य गेहे तु चागतः पथिकः प्रिये ३
रुद्राक्षालङ्कृतो दान्तस्तस्मै क्रूरमभाषत ।
विषमाहारपानादौ दत्तं तेन द्विजन्मने ४
रात्रौ तद्द्रव्यलोभेन घटं कृत्वा त्वपाहरत् ।
कूपमध्ये तु तं विप्रं पापीयान् वैष्णवाधमः ५
कालान्तरे मृतिर्जाता तस्य साधोर्दुरात्मनः ।
विष्णुनाम स्मरेन्नित्यं वैकुण्ठे वासमाप्तवान् ६
क्षीणे पुण्ये ततो देवि विड्भक्षो ग्रामशूकरः ।
ततो मनुष्ययोनिश्च दृश्यते पुत्रवर्जितः ७

रोगवानल्पकीर्तिश्च स एव सुरसुन्दरि ।
अतः शान्तिं प्रवक्ष्यामि शृणुष्व हरवल्लभे ८
लक्षमुद्रां ब्राह्मणाय दत्त्वा काश्यास्तु सेवनम् ।
ब्रह्मचर्यरतो नित्यं ततो मुच्येत पातकात् ९
इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे उत्तराभाद्रपदनक्षत्रस्य चतुर्थचरणप्रायश्चित्त-कथनं नाम सप्ताधिकशततमोऽध्यायः ॥१०७॥

अथाष्टाधिकशततमोऽध्यायः ।

शिव उवाच ।

मगधे विषये देवि लुब्धको वसति प्रिये ।
प्रत्यहं मृगमांसेन व्ययं कुर्याद्दिने दिने १
एवं सर्वं वयो जातं वृद्धे सति वरानने ।
मरणं तस्य वै यातं यमदूतैर्यमाज्ञया २
निःक्षिप्तो नरके घोरे षष्टिवर्षसहस्रकम् ।
भुक्तं विविधजं दुःखं कृमिसूचिमुखैर्युतम् ३
नरकान्निःसृतो देवि मृगत्वं जायते खलु ।

शृगालस्य ततो योनिं छागयोनिस्ततोऽभवत् ४
मानुषत्वं ततो जातं धनधान्यसमन्वितम् ५
पूर्वजन्मनि देवेशि जलदानं च वै कृतम् ।
धनाढ्यत्वं पुनर्जातो ह्यपुत्रो मृगताडनात् ।
पुत्राश्च बहवो जातास्तेषां मृत्युः प्रजायते ६
रोगाणां च तथोत्पत्तिर्ज्वरश्चैव पुनः पुनः ।
शान्तिं शृणु वरारोहे पूर्वपापप्रणाशिनीम् ७
गृहवित्तषडंशेन पुण्यकार्यं च कारयेत् ।
गायत्र्या वा शिवायेति जातवेदेति वै पुनः ८
दशायुतजपं कुर्याद्दशांशहवनं ततः ।
दशांशं तर्पणं देवि मार्जनं तद्दशांशतः ९
ततो वै भोजयेद्भक्त्या द्विजान् देवि दशांशतः ।
दशवर्णां ततो दद्याद् वृषभं भूषितं शुभम् १०
पलपञ्चसुवर्णस्य माल्यं मेरुयुतं तु वै ।
ब्राह्मणाय ततो दद्याच्छय्यादानमनन्तरम् ११
एवंकृते वरारोहे पुत्रः खलु प्रजायते ।

व्याधयःसङ्क्षयंयान्ति काकवन्ध्या लभेत्सुतम् १२

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे रेवतीनक्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं नामाष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

अथ नवाधिकशततमोऽध्यायः ।

शिव उवाच ।

श्रीपुरे नगरे देवि द्विज एकोऽवसत्पुरा ।
पुत्रपौत्रयुतो देवि धनधान्यसमन्वितः १
वैश्यकर्मरतो नित्यं क्रयविक्रयतत्परः ।
महिषीं वृषभं वस्त्रं चामरं गजवाजिनौ २
प्रत्यहं विक्रयं कृत्वा कृतश्च धनसङ्ग्रहः ।
एकदा तस्य वै गेहे गुरुपुत्रः समागतः ३
आदरं बहुधा कृत्वा मासे याते ततः शिवे ।
गमनं च हरिद्वारे स्नानार्थं कृतवांस्तथा ४
गुरुपुत्रेण भो देवि स्वर्णमूर्त्तिद्वयं तथा ।
ब्राह्मणाय तु दत्तं वै ततो वै गमनं कृतम् ५

हरिद्वारं ततो गत्वा तत्र प्राणमथात्यजत् ।
मूर्त्तिद्वयं गुरोश्चैव विक्रीतं तद्व्ययः कृतः ६
एवं बहुगते काले मरणं ब्राह्मणस्य च ।
यमाज्ञया महादूतैर्नरके नामकर्द्दमे ७
निःक्षिप्तो वै ततो देवि षष्टिवर्षसहस्रकम् ।
नरकान्निःसृतो देवि व्याघ्रयोनिस्ततोऽभवत् ८
तीर्थे पुण्यतमे देवि कौशलायां सुरेश्वरि ।
बिडालस्य ततो योनिं मानुषत्वं ततोभवत् ९
ब्राह्मणस्य कुले जन्म ज्ञानवान् प्रियदर्शनः ।
देवताराधने प्रीतिः परस्त्रीलम्पटस्तथा १०
तस्यापत्यत्रयं देवि कन्यकापुत्रकौ तथा ।
तेषां वै मरणं जातं पुनः पुत्रो न जायते ११
काकवन्ध्या भवेद्भार्या गौराङ्गी सुन्दरी तु सा ।
तन्वङ्गी दीर्घकेशी च स्वपतौ प्रियभाषिणी १२
तस्य पापक्षयं वक्ष्ये पुनः पुत्रो यतो भवेत् ।
हरिवंशश्रुतिं कुर्याद्गोपालस्य तु कीर्त्तनम् १३

वंशगोपालमन्त्रस्य गायत्रीमन्त्रकस्य च ।
लक्षद्वयं वरारोहे जपं वै कारयेत्सुधीः १४
हवनं तद्दशांशेन तर्पणं मार्जनं तथा ।
तुलसीवाटिकां कृत्वा तन्मूले विष्णुपूजनम् १५
दशवर्णगवां दानं शय्यादानं विशेषतः ।
ब्राह्मणान्भोजयेत्पश्चाच्छतसंख्यान्द्विजोत्तमान् १६
विष्णोश्च प्रतिमां कृत्वा सौवर्णी दशभिः पलैः ।
पूजयित्वा विधानेन ब्राह्मणाय प्रदापयेत् १७
एवंकृते न सन्देहो वंशो भवति नान्यथा १८

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे
रेवतीनक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं
नामनवाधिकशततमोऽध्यायः ॥ १०९ ॥

अथ दशाधिकशततमोऽध्यायः ।

शिव उवाच ।

माणिक्ये च पुरे देवि वसन्ति बहवो जनाः ।
लवणकृद्वसत्येको प्रत्यहं लवणं कृतम् १

लवणं विक्रयेन्नित्यं व्ययं कृत्वा दिने दिने।
तस्य मित्रं द्विजः कश्चिदागतस्तस्य वै गृहे २
धनाढ्यो रत्नसंयुक्तस्तत्र वासमकारयत्।
आदरं बहु सन्मानं कृत्वा मित्रेण वै शिवे ३
पत्नी शूद्रस्य वै दृष्टा पुंश्चली चपला तु सा।
मासमेकं वरारोहे तस्य मित्रस्य वै स्थितिः ४
मित्रपत्न्या विषं दत्तं ब्राह्मणाय तदा शिवे।
ब्राह्मणेन च न ज्ञातं भोजनाऽभ्यन्तरे तथा ५
ब्राह्मणस्याभवन्मृत्युरर्द्धरात्रे गते सति।
नद्यां शवं ततस्त्यक्त्वा समगृह्णाच्च तद्धनम् ६
ब्राह्मणार्थं च संगृह्य कृतं व्ययमहर्निशम्।
भार्यया सह पुत्राभ्यां भुक्त्वा द्रव्यं वरानने ७
ततो वृद्धे च वयसि मरणं समजायत।
पश्चान्मृता तु सा भार्या कुलटा व्यभिचारिणी ८
यमदूतैर्महाघोरे नरके पङ्कसंज्ञके।
कुम्भीपाके तदा देवि निःक्षिप्तश्च यमाज्ञया ९

युगमेकं विशालाक्षि भुक्त्वा नरकयातनाम् ।
नरकान्निःसृतो देवि सूकरत्वं प्रजायते १०
पुनः काकस्य वै योनिं बिडालत्वं ततोऽभवत् ।
मानुषत्वं ततो देवि देशे शुभ्रे तदाऽभवत् ११
पूर्वजन्मनि देवेशि कुरुक्षेत्रे यतो मृतः ।
अतो धनं भवेत्तस्य नापत्यं द्विजहत्यया १२
शरीरे जायते व्याधिर्भार्या तस्य मृतप्रजा ।
अस्य पापस्य शमनीं शान्तिं शृणु वरानने १३
गृहवित्ताष्टमं भागं ब्राह्मणाय समर्पयेत् ।
हवनं कारयेद्देवि कुण्डे योनिसुशोभिते १४
चतुरस्रे वरारोहे दशांशं विधिपूर्वकम् ।
तर्पणं तद्दशांशेन तद्दशांशेन मार्जनम् १५
गां सवत्सां ततो दद्यात्स्वर्णरत्नविभूषिताम् ।
ब्राह्मणान् भोजयेत्पश्चात्कूष्माण्डं प्रददेत्सुधीः १६
एवंकृते वरारोहे पुत्रो भवति नान्यथा १७

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे रेवतीनक्षत्रस्य तृतीयचरण प्रायश्चित्तकथनं नाम दशाधिकशततमोऽध्यायः ॥ ११० ॥

अथैकादशाधिकशततमोऽध्यायः।

शिव उवाच।

अलर्कस्य पुरे देवि क्षत्रियो वसति प्रिये।
चन्द्रवर्मेति विख्यातः पत्नी देवी ततोऽभवत् १
क्षत्रधर्मरतो नित्यं धनाढ्यः शूरसम्मतः।
कृष्णदास इति ख्यातो विप्रस्तस्य पुरोहितः २
विप्राय प्रददौ भूमिं गिरिजे विग्रहे सति।
ततो बहुदिने जाते दण्डस्तस्माच्च याचितः ३
ब्राह्मणोथावदद्देवि नाहं दण्ड्यः कदाचन।
ततो रोषपरीतात्मा क्षत्रियो ब्राह्मणं प्रति ४
दुर्वचश्चावदद्देवि ब्राह्मणं साधुसम्मतम्।
मरणं ब्राह्मणस्यैव भूम्युद्देशेन वै शिवे ५
ततो बहुगते वर्षे मरणं क्षत्रियस्य तु।
यमदूतैर्महाघोरैर्नरके नामदारुणे ६
कुम्भीपाके सदा घोरे क्षिप्तवान्यमशासनात्।
युगानां त्रयसङ्ख्यानां नरके वास एव च ७

नरकान्निःसृतो देवि प्रेतत्वं समजायत ।
शूकरस्य पुनर्योनिं ततो भवति मानुषः ८
मध्यदेशे विशालाक्षि हिमविन्ध्याद्रिमध्यमे ।
धनधान्यसमायुक्तो ब्राह्मणानां च सेवकः ९
इह जन्मनि देवेशि मरणं सन्ततेर्ध्रुवम् ।
काकवन्ध्या भवेन्नारी मृतवत्सा पुनः पुनः १०
शरीरे व्याधिरुत्पन्नो ज्वरश्चैव मुहुर्मुहुः ।
अस्य शान्तिं प्रवक्ष्यामि शृणु देवि वरानने ११
गृहवित्तषडंशं तु ब्राह्मणाय प्रकल्पयेत् ।
गायत्रीमूलमन्त्रेण पञ्चलक्षजपं तथा १२
दशांशं कारयेद्देवि हवनं विधिपूर्वकम् ।
तर्पणं मार्जनं तद्वद्ब्रह्मोदानं च विशेषतः १३
ब्राह्मणस्य ततो देवि प्रतिमां कारयेद्बुधः ।
पलपञ्चसुवर्णस्य वस्त्ररत्नविभूषिताम् १४
ततो निर्माय प्रतिमां पूजयित्वा यथाविधि ।
मन्त्रेणानेन देवेशि पाद्यं गन्धादिकं पृथक् १५

वासुदेव जगन्नाथ शरणागतवत्सल ।
ब्रह्महत्या कृता पूर्वं तत्सर्वं क्षन्तुमर्हसि १६
वल्मीकमृत्तिकां गृह्य वेदीं वै कारयेत्ततः ।
तन्मध्ये सर्वतोभद्रं रचितं दिव्यमण्डले १७
तन्मध्ये प्रतिमां स्थाप्य ततः पूजां तु कारयेत् ।
ॐवासुदेवाय नमः । ॐजगन्नाथाय नमः ।
ॐविष्णवे नमः । ॐशार्ङ्गिणे नमः ।
आचार्यं च ततो नत्वा शिवविष्णुस्वरूपिणम् १८
प्रभोजयेत्ततो विप्रान् दक्षिणां दापयेत्ततः ।
ततो विसर्जनं कुर्याद्वाचकं प्रणिपत्य च ।
एवंकृते वरारोहे शीघ्रं पुत्रः प्रजायते १६
काकवन्ध्या लभेत्पुत्रं सर्वव्याधिप्रणाशनम् ।
मृतवत्सा च या नारी जीवत्पुत्रा च जायते २०
यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते ।
अतः परतरं नास्ति सत्यं सत्यं वरानने २१

इति श्रीकर्मविपाकसंहितायां पार्वतीशिवसंवादे रेवतीनक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं नामैकादशोत्तरशततमोऽध्यायः ॥ १११ ॥

(परिशिष्ट)

अथर्वणवाक्यम् ।

शिव उवाच ।

अथ चतुःषष्टिषु यातनास्थानेषु दुःखान्यनुभूय तत्रेमानि लक्षणानि भवन्ति। ब्रह्महार्द्रकुष्ठी, सुरापः श्यावदंतः, गुरुतल्पगः पङ्गुः, स्वर्णहारी कुनखी, श्वित्री वस्त्रापहारी, दर्दुरी तेजोपहारी, मण्डली स्नेहापहारी, क्षयी तथा अजीर्णवानन्नापहारी, ज्ञानापहारी मूकः, प्रतिहन्ता गुरोरपस्मारी, गोघ्नो जात्यन्धः, पिशुनः पूतिनासः, पूतिवक्त्रस्तु सूचकः, शूद्रोपाध्यायः, श्वपाकः त्रपुसीसचामरविक्रयी, मद्यपः, एकशाकविक्रयी मृगव्याधः, कुण्डाशी मृतकश्चैलिको वा, नक्षत्री चार्बुदी, नास्तिको रङ्गोपजीव्यभक्ष्यभक्षी, गडरी, ब्रह्मपुरुषतस्कराणां दैशिकः, पण्डितः षण्ढो महापथिको, गण्डकः

चाण्डाली पुष्कसी गोस्ववकीर्णी, मध्वामेही, धर्मपत्नीषु स्यान्मैथुनप्रवर्त्तकः, खल्वाटः, सगोत्रासमयस्त्र्यभिगामी, श्लीपदी, पितृमातृभगिनीस्त्र्यभिगम्याविजितस्तेर्षाकुब्जकुण्डमण्डव्याधितव्यङ्गदरिद्रात्मायुषोऽल्पबुद्धिः, चण्डषण्डशैलूषतस्करपरपुरुषप्रेष्यपरकर्मकराः, खल्वाटवक्त्राङ्गसङ्कीर्णक्रूरकर्माणः क्रमशश्चान्त्यजाश्चोपपद्यन्ते । तस्मात्कर्तव्यमेवेह प्रायश्चित्तं विशुद्धैर्लक्षणैर्जायन्ते, धर्मस्य धारणादिति ।